कायगुप्तिअतिचार — १. असमाहितचित्ततया कायक्रियानिवृत्तिः कायगुप्तेरतिचारः। एकपादादिस्थानं वा जनसंचरणदेशे, अशुभध्यानाभिनिविष्टस्य वा निश्चलता, आप्ताभासप्रतिबिम्बाभिमुखतया वा तदाराधनव्यापृत इवावस्थानम्, सचित्तभूमौ संपतत्सु समन्ततः अशेषेषु महति वा वाते हरितेषु रोषाद्वा दर्पात् तूष्णीमवस्थानम्, निश्चला स्थितिः कायोत्सर्गः, कायगुप्तिरित्यस्मिन् पक्षे शरीरममताया अपरित्यागः कायोत्सर्गदोषो वा कायगुप्तेरतिचारः। (भ. आ. विजयो. १६)। २. कायगुप्तेः (अतिचारः) असमाहितचित्ततया कायक्रियानिवृत्तिर्जनसंचरणदेशे एकपादादिना अवस्थानम्, अशुभध्यानाभिनिविष्टस्य निश्चलत्वम्, आप्ताभासप्रतिबिम्बाभिमुखतया तदाराधनव्यापृतस्येवावस्थानम्, सचित्तभूम्यादौ रोषाद् दर्पाद्वाऽनिश्चला स्थितिः कायोत्सर्गे तद्दोषाः कायममत्वात्यागो वेत्यादिकः। (भ. आ. मूला. टी. १६)।

१ अस्वस्थ मनसे शरीर सम्बन्धी क्रियाओंका परित्याग करना, यह कायगुप्तिका अतिचार है। अथवा जनसंचारके स्थानमें एक पाँव आदिसे स्थित होना, अशुभ ध्यानमें मग्न होकर निश्चलतापूर्वक स्थित होना, आप्ताभासों की प्रतिमाओंके सामने उनके आराधनमें तत्पर के समान अवस्थित रहना; सचित्त भूमिपर चारों ओर हरितके होने पर या प्रबल वायु के वश हरितके आनेपर क्रोधसे या अभिमानसे चुपचाप स्थित होना; निश्चल स्थिति कायोत्सर्ग-कायगुप्ति है, इस पक्षमें शरीरसे ममताका न छोडना, अथवा कायोत्सर्ग में दोष लगाना, यह कायगुप्तिके अतिचार हैं। (मूलमें पाठ कुछ अव्यवस्थितसा दिखता है)।

कायचिकित्सा—कायस्य ज्वरादिरोगग्रस्तशरीरस्य चिकित्सा–रोगप्रतिक्रिया—यत्राभिधीयते तत्कायचिकित्सैव (विपाक. अभय. वृ. ७, पृ. ४९)।

ज्वरादि रोग-ग्रस्त शरीर की चिकित्सा (उपचार) का जहां वर्णन किया जाता है उसे कायचिकित्सा कहते हैं।

कायदुःप्रणिधान—१. दुष्ठु प्रणिधानमन्यथा वा दुःप्रणिधानम्। प्रणिधानं प्रयोगः परिणाम इत्यनर्थान्तरम्। दुष्ठु पापं प्रणिधानं दुःप्रणिधानम्, अन्यथा वा प्रणिधानं दुःप्रणिधानम्। तत्र क्रोधादिपरिणामवशात् दुष्ठु प्रणिधानं शरीरावयवानाम् अनिभृतमवस्थानम्। (त. वा. ७, ३३, २)। २, अनिरिक्खियापमज्जिय थंडिल्ले ठाणमाइ सेवंतो। हिंसाभावे वि न सो कडसामाइओ पमायाओ ॥ (श्रा. प्र. ३१५)। ३. शरीरावयवानामनिभृतावस्थानं कायदुःप्रणिधानम्। (चा. सा. पृ. ११)। ४. तत्र शरीरावयवानां पाणि-पादादीनामनिभृतताऽवस्थापनं कायदुष्प्रणिधानम्। (योगशा. स्वो. विव. ३-११६)। ५. दुष्टप्रणिधानं सावद्ये प्रवर्तनम्, तत्र हस्त-पादादीनामनिश्चयभृतत्वावस्थापनं कायदुष्प्रणिधानम्। (सा. ध. स्वो. टी. ५–३३)। ६. काययोगस्ततोऽन्यत्र हस्तसंज्ञादिदर्शने। वर्तते तदतीचारः कायदुष्प्रणिधानकः ॥ (लाटीसं. ६–१९२)।

१ पापपूर्ण प्रयोग अथवा अन्यथा परिणति का नाम दुष्प्रणिधान है। क्रोधादि के वश शरीर के अवयवों को अविनीततापूर्ण रखना, इसे कायदुष्प्रणिधान कहते हैं। २ विना देखे और कोमल वस्त्रादि के द्वारा विना प्रमार्जन किये ही निर्जन्तु स्थान में भी कायोत्सर्ग या उपवेशन (पद्मासन आदि) करना, यह प्रमादयुक्त होने के कारण सामायिक का कायदुष्प्रणिधान नाम का अतिचार है।

कायपरीत—यः प्रत्येकशरीरी स कायपरीतः। (प्रज्ञाप. मलय. वृ. १८–२५३, पृ. ३९४)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जो जीव प्रत्येकशरीरवाला हो वह कायपरीत कहलाता है।

कायप्रवीचार—कायेन प्रवीचारो मैथुनव्यवहारः सुरतोपसेवनं येषां ते कायप्रवीचाराः। (त. वृत्ति श्रुत. ४–७)।

शरीर से मैथुन सेवन करने वालों को कायप्रवीचार कहते हैं।

कायबल ऋद्धि—१. उक्कस्सखओवसमे पविसेसे विरियविग्घपगडीए। मास-चउमासपमुहे काउस्सग्गे वि समहीणा॥ उच्चट्ठिय तेलोक्कं झत्ति कणिट्ठंगुलीए अण्णत्थं। थविदुं जीए समत्था सा रिद्धी कायबलणामा॥ (ति. प. ४, १०६५–६६)। २. वीर्यान्तरायक्षयोपशमाविर्भूताऽसाधारणकायबलत्वान्मासिक-चातुर्मासिक-सांवत्सरिकादिप्रतिमायोगधारणेऽपि, श्रम-क्लमविरहिताः कायबलिनः। (त. वा. ३, ३६, ३)। ३. तिहुवणं करंगुलियाए उद्धरिदूण अण्णत्थ ठवणक्खमो कायबली णाम। (धव. पु. ९, पृ. ९९)। ४. [वीर्यान्तरायक्षयोपशमाविर्भूताऽसाधारणकायबलत्वात् मासिक-चातुर्मासिक-सांवत्सरिकादिप्रतिमायोग] धारणेऽपि श्रमक्लेशविरहितास्त्रिभुवनमपि कनीस्यांगुल्योद्धृत्याऽन्यत्र स्थापयितुं समर्थाश्च कायबलिनः। (चा. सा. पृ. ९८)। ५. वीर्यान्तरायक्षयोपशमाविर्भूतासाधारणकायबलत्वात् प्रतिमयावतिष्ठमानाः श्रम-क्लमविरहिता वर्षमात्रप्रतिमाधराः बाहुबलिप्रभृतयः कायबलिनः। (योगशा. स्वो. विव. १–८, पृ. ३९)। ६. मास-चतुर्मास-षण्मास-वर्षपर्यन्तकायोत्सर्गकरणसमर्था अंगुल्यग्रेणापि त्रिभुवनमपि उद्धृत्य अन्यत्र स्थापनसमर्थाः ये ते कायबलिनः। (त. वृत्ति श्रुत. ३–३६)।

२ वीर्यान्तराय कर्म के क्षयोपशम से उत्पन्न हुए असाधारण शारीरिक बल से संयुक्त होने के कारण मासिक, चातुर्मासिक और वार्षिक प्रतिमायोग के धारण करने पर भी जो किसी प्रकार के परिश्रम व खेद का अनुभव नहीं करते हैं वे कायबली—कायबल ऋद्धि के धारक—कहे जाते हैं।

कायबली—देखो कायबल ऋद्धि।

कायबलप्राण—१. देहुदये कायाऽऽणा × × ×॥ (गो. जी. १३१)। २. देहोदये शरीरनामकर्मोदये कायचेष्टाजननशक्तिरूपः कायबलप्राणः। (गो. जी. म. प्र. व जी. प्र. टी. १३१)। ३. कायवर्गणावष्टम्भजनितात्मप्रदेशप्रचयशक्तिः कायबलप्राणः। (गो. जी. जी. प्र. टी. १२९)।

शरीरनामकर्म का उदय होने पर जो शरीरचेष्टा को उत्पन्न करने वाली शक्ति उदित होती है उसे कायबलप्राण कहते हैं।

काययोग—१. वीर्यान्तरायक्षयोपशमसद्भावे सति औदारिकादिसप्तविधकायवर्गणान्यतमालम्बनापेक्षया आत्मप्रदेशपरिस्पन्दः काययोगः। (स. सि. ६–१; त. वा. ६, १, १०)। २. कायात्मप्रदेशपरिणामो गमनादिक्रियाहेतुः काययोगः। (त. भा. ६–१)। ३. औदारिकादिशरीरयुक्तस्याऽऽत्मनो वीर्यपरिणतिविशेषः काययोगः। (आव. नि. हरि. वृ. ५८३)। ४. तत्रौदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः काययोगः। (नन्दी. हरि. वृ. पृ. ४९)। ५. तत्र कायः शरीरम् आत्मनो वा निवासः पुद्गलद्रव्यघटितः स्थविरस्य दुर्बलस्य वा ऽध्वालम्बनयष्टिकादिवद् विषमेषूपग्राहकस्तद्योगाज्जीवस्य वीर्यपरिणामः शक्तिः सामर्थ्यं काययोगः। (त. भा. सिद्ध. वृ. ६–१)। ६. कायक्रियासमुत्पत्त्यर्थः प्रयत्नः काययोगः। (धव. पु. १, पृ. २७९); सप्तानां कायानां सामान्यं कायः, तेन जनितेन वीर्येण जीवप्रदेशपरिस्पन्दलक्षणेन योगः काययोगः। (धव. पु. १, पृ. ३०८); चउव्विहसरीराणि अवलंविय जीवपदेसाणं संकोच-विकोचो सो कायजोगो णाम। (धव. पु. ७, पृ. ७६); वीरियंतराइयस्स सव्वघादिफद्दयाणं संतोवसमेण देसघादिफद्दयाणमुदयेण जणिदो खओवसमिओ कायजोगो। (धव. पु. ७, पृ. ७८); वादपित्त-सेंभादीहिं जणिदपरिस्समेण जादजीवपदेसपरिप्फदो कायजोगो णाम। (धव. पु. १०, पृ. ४३८)। ७. काययोग्यपुद्गलात्मप्रदेशपरिणामो गमनादिक्रियाहेतुः काययोगः। (योगशा. स्वो. विव. ७, ७४); तत्रौदारिक-वैक्रियाहारक-तैजस-कार्माणशरीरवतो जीवस्य वीर्यपरिणतिविशेषः काययोगः। (योगशा. स्वो. विव. ११–१०)। ८. चीयत इति कायः, शरीरम् इति भावः। (स्थानां. अभय. वृ. १–२१, पृ. १८); औदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः काययोगः। (स्थानां. अभय. वृ. १–२१, पृ. २९)। ९. वीर्यान्तरायक्षयोपशमे सति औदारिक-औदारिकमिश्र-वैक्रियिक-वैक्रियिकमिश्राहारकाहारकमिश्र-कार्मणलक्षणसप्तप्रकारशरीरवर्गणा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नां मध्ये अन्यतमवर्गणालम्बनापेक्षयात्मप्रदेशचलनं परिस्पन्दनं परिस्फुरणं काययोगः। (त. वृत्ति श्रुत. ६–१)।

१ वीर्यान्तराय के क्षयोपशम के सद्भाव में औदारिक व औदारिकमिश्र आदि सात प्रकार की वर्गणाओं में किसी एक का आलम्बन लेकर जो आत्मप्रदेशों का परिस्पन्द हुआ करता है उसे काययोग कहते हैं।

कायवध—××× कायवधे पृथिव्याद्युपमर्दे ××× । (श्रा. प्र. टी. ३४९)।

पृथिवीकायिकादि जीवों के पीड़ित करने को कायवध कहते हैं।

कायविनय—१. नीअं सिज्जं गइं ठाणं नीअं च आसणाणि अ। नीअं च पाये वंदिज्जा नीअं कुज्जा अ अंजलिं ॥ (दशवै. ९, २, १७)। २. तत्थ कायविणओ नाम तेसि चेव आयरियादीणं अद्धाणपरिस्संताण वा सीसाउ आरब्भ जाव पादतला ताव परमादरेण विस्सामणं। (दशवै. चू. पृ. २७)।

१ आचार्य आदि की अपेक्षा नीची शय्या पर सोना, उनके पीछे बहुत दूर न रहकर अनुद्धततापूर्वक गमन करना, उनके स्थान की अपेक्षा नीचे स्थान पर स्थित होना, उनकी अनुज्ञापूर्वक हीन आसन पर बैठना, सिर झुकाकर उनके चरणों की वन्दना करना तथा प्रश्न आदि के समय शरीर को नम्रीभूत रखना, इस प्रकार के नम्रतापूर्ण व्यवहार को कायविनय कहा जाता है।

कायव्युत्सर्ग—देखो कायोत्सर्ग।

कायशुद्धि—१. कायशुद्धिर्निरावरणाभरणा निरस्तसंस्कारा यथाजातमलधारिणी निराकृतांगविकारा सर्वत्र प्रयतवृत्तिः प्रशमसुखं मूर्तमिव प्रदर्शयन्तीति तस्यां सत्यां न स्वतोऽन्यस्य भयमुपजायते नाप्यन्यतस्तस्य। (त. वा. ९, ६, १६; त. श्लो. ९–६; चा. सा. पृ. ३४)। २. विश्रम्भोप[त्पा]दिका लोकस्याऽस्तसंस्कारसंहतिः। कायशुद्धिः क्षमामूर्तिभूतेवाऽऽभाति निःस्पृहा ॥ विरागता-लतोद्भूतिभूभिर्भीतिविवर्जिता। जातरूपमनोहारिण्येषां भूषा तपःश्रियः ॥ (आचा. सा. ८, १०–११)। ३. कायशुद्धिः सर्वत्र संवृताचारतया प्रवर्तनम्। (सा. ध. स्वो. टी. ५, ४५)। ४. हस्त-पाद-शिरःकम्पावष्टम्भादिर्न यत्र वै। कायदोषो भवेदेषा कायशुद्धिरिहागमे ॥ (धर्मसं. श्रा. ७–५०)।

१ वस्त्र, आभरण और शरीरसंस्कार से रहित; यथाजात मल को धारण करने वाली एवं अंगविकार से रहित जो सर्वत्र यत्नपूर्ण प्रवृत्ति होती है; उसे कायशुद्धि कहते हैं। इसके होते हुए न अपने से किसी अन्य को भय होता है और न स्वयं को किसी अन्य से भय होता है।

कायसंयम—१. कायसंयमो णाम आवस्सगाइजोगे मोत्तुं सुसमाहियपाणि-पादस्स कुम्मो इव गुत्तिंदियस्स चिट्ठमाणस्स संजमो भवई। (दशवै. चू. पृ. २१)। २. कायसंयम इति। धावन-वल्गन-प्लवनादिनिवृत्तिः, शुभक्रियासु च प्रवृत्तिः। (त. भा. सिद्ध. वृ. ९-६, पृ. १९८; योगशा. स्वो. विव. ४–९३)।

१. आवश्यक क्रियाओं को छोड़कर अन्य कार्यों के करने में कछुए के समान इन्द्रियों को संकुचित कर —स्वाधीन करके—हाथ-पांवों को शान्त रखने वाले के संयम को कायसंयम कहा जाता है।

कायस्थिति—१. कायस्थितिरेककायापरित्यागेन नानाभवग्रहणविषया। (त. वा. ३, ३९, ६)। २. तत्र कायस्थितिरिति कः शब्दार्थः? उच्यते—काय इह पर्याय गृह्यते, काय इव काय इत्युपमानात्। स च द्विधा—सामान्यरूपो विशेषरूपश्च। तत्र सामान्यरूपो निर्विशेषणो जीवत्वलक्षणो विशेषरूपो नैरयिकत्वादिलक्षणः, तस्य स्थितिरवस्थानं कायस्थितिः। विमुक्तं भवति? सामान्यरूपेण विशेषरूपेण वा पर्यायेणादिष्टस्य जीवस्य यदव्यवच्छेदेन भवनं सा कायस्थितिः। (प्रज्ञाप. मलय. वृ. १७, २२९, पृ. ३७५)।

१ एक काय को—औदारिक आदि शरीर को—न छोड़ कर उसके रहने तक नाना भवों को ग्रहण करते हुए जितना काल बीतता है, उसका नाम कायस्थिति है। २ काय शब्द से यहां पर्याय का ग्रहण किया गया है। वह दो प्रकार की है—सामान्यरूप और विशेषरूप। नारकादि विशेषण से रहित जीव की जीवत्वरूप पर्याय सामान्य और उक्त विशेषण से सहित नारक आदि रूप विशेष पर्याय है। उक्त दोनों में विवक्षित पर्याय का जब तक विच्छेद नहीं होता है उतने काल का नाम कायस्थिति है।

कायस्वभाव—१. कायस्वभावोऽनित्यता दुःखहेतु-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्वं निःसारताऽशुचित्वमिति। (त. भा. ७-७)। २. कायस्वभावोऽपि पितृमात्रोरोजःशुक्रमुभयमेकीभूतं गर्भजानां प्राणिनां शरीरतया परिणमत इत्यादिलक्षणः। सम्मूर्च्छनोपपातजन्मनां तूत्पत्तिदेशावगाढ़स्कन्धादाननिर्माणानि वपूंषि भवन्त्यशुभपरिणामभाञ्जि नानाकाराणि परिशटनोपचितिधर्मकत्वात् विनश्वराणीत्येवंलक्षणः कायस्वभावः। (त. भा. सिद्ध. वृ. ७-७)।

१ अनित्यता, दुःखहेतुता, निःसारता और अपवित्रता; यह काय (शरीर) का स्वभाव है।

कायापरीत—कायापरीतोऽनन्तकायिकः। (प्रज्ञाप. मलय. वृ. १८-२५३, पृ. ३९४)।

अनन्तकायिक (साधारणशरीरी) जीव कायापरीत कहलाता है।

कायिक अशुभ योग—तत्राशुभो हिंसा-स्तेयाब्रह्मादीनि कायिकः। (त. भा. ६-१)।

हिंसा, चोरी और कुशील सेवनादिरूप प्रवृत्ति को कायिक अशुभ योग कहते हैं।

कायिक असमीक्ष्याधिकरण—कायिकं च प्रयोजनमन्तरेण गच्छंस्तिष्ठन्नासीनो वा सचित्तेतरपत्र-पुष्प-फल-छेदन-भेदन-कुट्टन-क्षेपणादीनि कुर्यात्, अग्नि-विष-क्षारादिप्रदानं चारभेत इत्येवमादि तत्सर्वमसमीक्ष्याधिकरणम्। (त. वा. ७, ३२, ५; चा. सा. पृ. १०)।

प्रयोजन के विना चलते हुए, स्थित रहकर या बैठे-बैठे सचित्त या अचित्त पत्र, पुष्प और फल आदि का छेदना, भेदना, कूटना व फेंकना आदि कार्य करना तथा अग्नि, विष व क्षार आदि पदार्थों का देना; इत्यादि प्रकार के कार्यों के करने को कायिक असमीक्ष्याधिकरण कहते हैं।

कायिक द्रव्यक्रोधविवेक—देखो कषायविवेक। भ्रकुट्याद्यकरणं कायिको द्रव्यतः क्रोधविवेकः। (भ. आ. मूला. १६८)।

भृकुटि आदि के नहीं चढ़ाने को द्रव्यतः कायिक क्रोधविवेक कहते हैं।

कायिक द्रव्यमानविवेक—देखो कषायविवेक। गात्रस्तब्धताद्यकरणं कायिको द्रव्यतो मानविवेकः। (भ. आ. मूला. १६८)।

अहंकारयुक्त होकर शरीर की उद्धतता के न करने को द्रव्यतः कायिक मानविवेक कहते हैं।

कायिक द्रव्यमायाविवेक—देखो कषायविवेक। अन्यत्कुर्वत इवान्यस्य कायेनाकरणं कायिकः। (भ. आ. मूला. १६८)।

काय से अन्य कार्य करते हुए के समान अन्य कार्य के न करने को द्रव्यतः मायाविवेक कहते हैं।

कायिक विनय—१. अब्भुट्ठाणं किदिअम्मं णवण अंजलीय मुंडाणं। पच्चूगच्छणमेत्ते पत्थिदस्सणुसाधणं चेव॥ णीचं ठाणं णीचं गमणं णीचं च आसणं सयणं। आसणदाणं उवगरणदाण ओगासदाणं च॥ पडिरूवकायसंफासणदा य पडिरूवकालकिरिया य। पेसणकरणं संथरकरणं उवकरण पडिलिहणं॥ इच्चेवमादिओ जो उवयारो कीरदे सरीरेण। एसो काइयविणओ जहारिहं साहुवग्गस्स॥ (मूला. ५, १७६ से १७९)। २. किरियं अब्भुट्ठाणं णवणंजलि आसणुवकरणदाणं। एते पच्चुग्गमणं च गच्छमाणे अणुव्वजणं॥ कायाणुरूवमद्दणकरणं कालाणुरूवपडियरणं। संथारभणियकरणं उवयरणाणं च पडिलिहणं॥ इच्चेवमाइ काइयविणओ रिसि-सावयाण कायव्वो। जिणवयणमणुगणंतेण देसविरएण जहजोग्गं॥ (वसु. श्रा. ३२८-३०)।

१ साधुओं के आने पर उठकर खड़े हो जाना, कृतिकर्म करना—सिद्धादि भक्तिपूर्वक कायोत्सर्ग आदि करना, हाथ जोड़कर नमस्कार करना, सम्मुख जाना—अगवानी करना, जाते समय पीछे जाना, स्वयं नीचा स्थान ग्रहण करना, नीचे गमन करना—गुरु के बायें अथवा पीछे चलना, गुरु की अपेक्षा नीचे आसन पर बैठना व सोना, उन्हें आसन प्रदान करना, उपकरण (शास्त्र आदि) देना, वसतिका आदि का देना, शारीरिक शक्ति के अनुसार शरीर का मर्दन करना, प्रतिरूपकालक्रिया—उष्णकाल में शीतक्रिया व शीतकाल में उष्णक्रिया—करना, आज्ञापालन करना, चटाई आदि बिछाना तथा उपकरणों का प्रतिलेखन करना; इत्यादि जो साधुसमूह का शरीर से यथायोग्य उपकार किया जाता है उसका नाम कायिक विनय है।

कायिकी क्रिया—१. प्रदुष्टस्य सतोऽभ्युद्यमः कायिकी क्रिया। (स. सि. ६-५; त. वा. ६, ५, ८)। २. प्रदुष्टस्योद्यमो हन्तुं गदिता कायिकी क्रिया। (त. श्लो. ६, ५, ९)। ३. योऽभ्युद्यमः प्रदुष्टस्य सतः सा कायिकी क्रिया। (ह. पु. ५८,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

६६)। ४. दुष्टस्य सतः कायेन वा चलनक्रिया कायिकी। (भ. आ. विजयो. ८०७)। ५. कायेन निर्वृत्ता कायिकी—कायव्यापारः। (स्थानां. अभय. वृ. २–६०, पृ. ३८)। ६ क्रियाः व्यापारविशेषाः, तत्र कायेन निर्वृत्ता कायिकी, कायचेष्टेत्यर्थ। (समवा. अभय. वृ. ५, पृ. १०)। ७. चीयते इति कायः शरीरम्, काये भवा कायेन निर्वृत्ता वा कायिकी। (प्रज्ञाप. मलय. वृ. २२–२७९, पृ. ४३५); कायिकी नाम हस्त-पादादिव्यापारणम्। (प्रज्ञाप. मलय. वृ. २२, २८१, पृ. ४४०)। ८. प्रदुष्टस्य सतः कायाभ्युद्यमः कायिकी क्रिया। (त. वृत्ति श्रुत. ६–५)।

१. दुष्टतापूर्वक उद्यम करने को कायिकी क्रिया कहते हैं।

कायोत्सर्ग—१. कायाईपरदव्वे थिरभावं परिहरत्तु अप्पाणं। तस्स हवे तणुसग्गं जो झावइ णिव्विअप्पेण॥ (नि. सा. १२१)। २. देवस्सियणियमादिसु जहुत्तमाणेण उत्तकालम्हि। जिणगुणचिंतणजुत्तो काउस्सग्गो तणुविसग्गो॥ (मूला. १–२८); बोसरिदबाहुजुगलो चदुरंगुलअंतरेण समपादो। सव्वंगचलणरहिओ काउस्सग्गो विसुद्धो दु॥ (मूला. ७–१५३)। ३. परिमितकालविषया शरीरे ममत्वनिवृत्तिः कायोत्सर्गः। (त. वा. ६, २४, ११; चा. सा. पृ. २६)। ४. कायः शरीरम्, तस्योत्सर्गः कृताकारस्य स्थान-मौन-ध्यानक्रियाव्यतिरेकेण क्रियान्तराध्यासमधिकृत्य परित्याग इत्यर्थः। (ललितवि. पृ. ७७)। ५. एषोऽपि कायोत्सर्गः प्रायश्चित्तं भवति। क्व ? अनेषणीयादिषु त्यक्तेषु, तत्रानेषणीयं उद्गमाद्यविशुद्धमन्न-पानमुपकरणं वा प्रतिष्ठाप्य कायोत्सर्गः कार्यः, आदिग्रहणाद् गमनागमनविहार-श्रुतसावद्यस्वप्नदर्शननौसंतरणोच्चारप्रस्रवणावरणपरिग्रहः। (त. भा. हरि. व सिद्ध. वृ. ९–२२)। ६. ट्ठियस्स णिसण्णस्स णिव्वण्णस्स वा साहुस्स कसाएहि सह देहपरिच्चागो काउस्सग्गो णाम। (धव. पु. १३, पृ. ८८)। ७. कायोत्सर्गः काये मितकालं निर्ममत्वं तु। (ह. पु. ३४–१४६)। ८. दैवसिकादिषु नियमेषु यथोक्तकाले योऽयं यथोक्तमानेन जिनगुणचिन्तनयुक्तस्तनुविसर्गः स कायोत्सर्ग इति। (मूला. वृ. १–१२)। ९. प्रालम्बितभुजद्वन्द्वः मूर्ध्वस्थस्यासितस्य वा। स्थानं कायनपेक्षं यत् कायोत्सर्गः स कीर्तितः॥ (योगशा. ४–१३३); कायस्य शरीरस्य स्थानमौनध्यानक्रियाव्यतिरेकेणान्यत्रोच्छ्वसितादिभ्यः क्रियान्तराध्यासमधिकृत्य य उत्सर्गस्त्यागो 'णमो अरहंताणं' इति वचनात् प्राक् स कायोत्सर्गः। (योगशा. स्वो. विव. ३–१३०)। १०. कायं शरीरम् उत्सृजति ममत्वादिपरिणामेन त्यजतीति कायोत्सर्गः तपो भवेत्—व्युत्सर्गाभिधानम् तपोविधानं स्यात्। (कार्तिके. टी. ४६८)। ११. शरीरादिममत्वस्य त्यागो यो ज्ञानदृष्टिभिः। तपःसंज्ञः सुविख्यातो कालोत्सर्गो महर्षिभिः॥ (लाटीसं. ७–८६)। १२. एकमुहुर्तादिषु शरीरव्युत्सर्जनं कायोत्सर्गः। (भावप्रा. श्रुत. टी. ७७)।

२ दैवसिक आदि नियमों में—दिवस सम्बन्धी, रात्रि सम्बन्धी एवं पाक्षिक व चातुर्मासिक आदि नियमित अनुष्ठानों में—आगमोक्त कालप्रमाण के अनुसार अपने-अपने नियत समय में जो जिनगुणस्मरणपूर्वक शरीर से ममत्व का त्याग किया जाता है, इसका नाम कायोत्सर्ग है।

कारक—१. कुर्वत एव कारकत्वम्। यदा न करोति तदा कर्तृत्वस्यायोगात्। (लघीय. स्वो. विवृति ५-४४, पृ. ६३८)। क्रियाविशिष्टं द्रव्यं कारकम्। (लघीय. स्वो. विवृति ६-७२, पृ. ७९४)। २. कारकस्य कारकत्वमपि क्रियावेशवशादेव उपपद्यते, 'करोतीति कारकम्' इति व्युत्पत्तेः। इतरथा हि तद् वस्तुमात्रं स्यान्न कारकम्, 'क्रियाविशिष्टं द्रव्यं कारकम्' इत्यभिधानात्। (न्यायकु. १–३ पृ. ४२); कारकाणां कर्त्रादीनां × × × (न्यायकु. ५–४४, पृ. ६३९); क्रियया आविष्टं युक्तं द्रव्यं कारकम्, क्रियां कुर्वद् द्रव्यं कारकमित्यर्थः। (न्यायकु. ६-७२, पृ. ७९५)।

२ क्रिया से युक्त द्रव्य को कारक कहते हैं।

कारक सम्यक्त्व—१. जं जह भणियं तं तह करेइ सइ जंमि कारगं तं तु। (श्रा. प्र. ४९)। २. कारकं संयमं तपःप्रभृतीनां तु कारकम्। (त्रि. श. पु. च. १, ३, ६१०)।

१ जिस सम्यक्त्वके होने पर जीव आगमोक्त व्रत व तप आदि के अनुष्ठान को तदनुसार ही करता है उसे कारक—अनुष्ठान कराने वाला—सम्यक्त्व कहते हैं।

कारण—१. कारणमुपपत्तिमात्रम्। (आव. नि.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हरि. वृ. ८६, पृ. ८२)। २. यस्मिन् सति भवत्येव यस्य सद्भावस्तद्भावे च न भवत्येव यत् तत् कारणम्। (त. भा. सिद्ध. वृ. ५-२५)। ३. यस्मिन् सत्येव च यद्भावः तत्कार्यमितरत् कारणम्। (सिद्धवि. वृ. ३-१०, पृ. १९३, पं. ७); यस्मिन् सत्येव यद्भाव एव विकारे च विकार तत् कार्यमितरत् कारणम्। (सिद्धवि. वृ. ७-२०, पृ. ४८७, पं. १६)।

३ जिसके होने पर ही जो होता है वह कार्य और इतर—जिसके सद्भाव में कार्य होता है वह—कारण कहलाता है।

कारणदोष (ग्रासैषणादोष)—देखो कारणाभावदोष। वेदनादिकारणमन्तरेण भुञ्जानस्य कारणदोषः। (आचारां. शी. वृ. २, १, ९, २७३, पृ. ३२१)।

वेदनादि कारण के विना भोजन करने को कारणदोष (ग्रासैषणादोष) कहते हैं।

कारणपरमाणु—१. धाउचउक्कस्स पुणो जं हेऊ कारणं ति तं णेयो। (नि. सा. २५)। २. पृथिव्यप्तेजोवायवो धातवश्चत्वारः, तेषां यो हेतुः स कारणपरमाणुः (नि. सा. वृ. २५)।

१ पृथिवी, अप्, तेज और वायु; इन चार धातुओं के कारणभूत परमाणु द्रव्य को कारणपरमाणु कहते हैं।

कारणपरमात्मा— यस्त्रिकालनिरुपाधिस्वभावत्वात् निवारणज्ञान-दर्शनलक्षणलक्षितः कारणपरमात्मा। (नि. सा. वृ. १०२)।

जो निरावरण (स्वाभाविक) ज्ञान-दर्शन से युक्त हो उसे कारणपरमात्मा कहते हैं।

कारणवन्दनक—१. नाणाइतिगं मोत्तुं कारणमिहलोयसाहयं होइ। पूया-गारवहेउं नाणग्गहणेवि एमेव॥ (प्रव. सारो. १६३)। २. ज्ञान-दर्शन-चारित्रत्रयं मुक्त्वा यत्किमप्यन्यदिहलोकसाधकं वस्त्र-कम्बलादि वन्दनकदानात्साधुरभिलषति तत्कारणं भवतीति प्रतिपत्तव्यम्, तस्माद्वन्दनकं कारणवन्दनकमिति। यदि पूजातिशयेन गौरवातिशयेन वा ज्ञानादिग्रहणेऽपि वन्दते तदपि कारणवन्दनकं भवति। (प्रव. सारो. वृ. १६३)। ३. ज्ञान-दर्शन-चारित्रत्रयं मुक्त्वा यत्किमप्यन्यदिहलोकसाधकं वस्त्रादि वन्दनकदानात् साधुरभिलषति तत्कारणं भवतीति प्रतिपत्तव्यम्। तस्माद्वन्दनकं कारणवन्दनकमिति। (आव. हरि. वृ. मल. हेम. टि. पृ. ८८)। ४. कारणाद् ज्ञानादिव्यतिरिक्ताद् वस्त्रादिलाभहेतोर्वन्दनम्, यद्वा ज्ञानादिनिमित्तमपि लोकपूज्योऽन्येभ्यो वा ऽधिकतरो भवामीत्यभिप्रायतो वन्दनम्, यद्वा वन्दनकमूल्यवशीकृतो मम प्रार्थनाभङ्गं न करिष्यतीति बुद्ध्या वन्दनम्। (योगशा. स्वो. विव. ३-१३०)।

१ सम्यग्दर्शन, ज्ञान और चारित्र को छोड़कर अन्य लौकिक साधन-सामग्री—जैसे वस्त्र-कम्बलादि—की अभिलाषा से जो वन्दना की जाती है उसे कारणवन्दनक कहा जाता है। यदि साधु पूजा या गुरुता के अभिप्राय से ज्ञानादि को भी ग्रहण करता हुआ वन्दना करता है तो उसे भी कारणवन्दनक ही समझना चाहिए।

कारणाभावदोष—क्षुद्वेदनायाः असहनं क्षामस्य च वैयावृत्त्याकरणमीर्यासमितेरविशुद्धिः प्रेक्षोत्प्रेक्षादेः संयमस्य चापालनं क्षुधातुरस्य प्रबलाग्न्युदयात्प्राणप्रहाणशङ्का आर्त-रौद्रपरिहारेण धर्मध्यानस्थिरीकरणं चेति भोजनकारणानि। तदभावे भुञ्जानस्य कारणाभावदोषः। (योगशा. स्वो. विव. १-३८, पृ. १३८)।

भोजन करने के कारणों के अभाव में भोजन करने को कारणाभावदोष कहते हैं। क्षुधा की व्यथा को न सह सकना, कृश होने पर वैयावृत्त्य को न कर पाना, ईर्यासमिति को विशुद्ध नहीं रख सकना, प्रेक्षोत्प्रेक्षादि संयमका परिपालन न कर सकना, क्षुधा से व्याकुल होने पर प्रबल अग्नि (औदर्य) के उदय से मरने की आशंका होना और आर्त-रौद्र ध्यानों को छोड़कर धर्मध्यान को स्थिर करना; ये भोजन के कारण हैं।

कारित—१. कारिताभिधानं परप्रयोगापेक्षम्। (स. सि. ६-८)। २. कारिताभिधानं परप्रयोगापेक्षम्। परस्य प्रयोगमपेक्ष्य सिद्धिमापद्यमानं कारितमिति कथ्यते। (त. वा. ६, ८, ८)। ३. परस्य प्रयोगमपेक्ष्य सिद्धिमुपयाति यत्तत्कारितम्। (भ. आ. विजयो. टी. ८११)। ४. परस्य प्रयोगमपेक्ष्य सिद्धिमापद्यमानं कारितम्। (चा. सा. पृ. ३९)। ५. स्वप्रयुक्तान्यनिष्पन्नं हिंसनं कारितं मतम्। (आचा. सा. ५-१४)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१ जो कार्य दूसरे के प्रयोग की अपेक्षा से सिद्ध होता है उसे कारित कहते हैं।

कारितनिमित्तकरण—कारियनिमित्तकरणं नाम पसण्णा हु आयरिया सविसेसं सुत्तत्थ-तदुभयाणि दाहिंति त्ति काऊणं तारिसाणि अणुकूलाणि करेइ जेण तेसिं आयरियाण चित्तप्पसाओ जायइ। (दशवै. चू. १, पृ. २८)।

"यदि आचार्य प्रसन्न रहेंगे तो वे सूत्र, अर्थ, अथवा दोनों मुझे विशेष रूप से प्रदान करेंगे" ऐसा विचार करके आचार्य की प्रसन्नता के लिए उनके मनोऽनुकूल कार्य करने को कारितनिमित्तकरण कहते हैं। यह औपचारिक विनय के सात भेदों में तीसरा है।

कारुण्य—देखो करुणा। १. कारुण्यं क्लिश्यमानेषु। कारुण्यमनुकम्पा दीनानुग्रह इत्यनर्थान्तरम्। (त. भा. ७-६)। २. दीनानुग्रहभावः कारुण्यम्। (स. सि. ७-११; त. श्लो. ७-११)। ३. दीनानुग्रहभावः कारुण्यम्। शारीर-मानसदुःखाभ्यर्दितानां दीनानां प्राणिनाम् अनुग्रहात्मकः परिणामः करुणस्य भावः कर्म वा कारुण्यमिति कथ्यते (त. वा. ७, ११, ३)। ४. जन्माम्भोधौ कर्मणा भ्राम्यमाणे जीवग्रामे दुःखितेऽनेकभेदे। चित्तार्द्रत्वं यद्विधत्ते महात्मा तत्कारुण्यं दर्श्यते दर्शनीयैः॥ (अमित. श्रा. २-८१)। ५. दीनाभ्युद्धरणे बुद्धिः कारुण्यं करुणात्मनाम्। (उपासका. ३३७)। ६. शारीरं मानसं स्वाभाविकं च दुःखमसह्यमाप्नुवतो दृष्ट्वा हा वराका मिथ्यादर्शनेनाविरत्या कषायेणाशुभेन योगेन च समुपार्जिताशुभकर्मपर्यायपुद्गलस्कन्धतदुदयोद्भवा विपदो विवशाः प्राप्नुवन्ति इति करुणा अनुकम्पा। (भ. आ. विजयो. १६९६)। ७. दैन्य-शोकसमुत्त्रासे रोगपीडार्दितात्मसु। वध-बन्धनरुद्धेषु याचमानेषु जीवितम्॥ क्षुत्तृट्श्रमाभिभूतेषु शीताद्यैर्व्यथितेषु च। अविरुद्धेषु निस्त्रिंशैर्यात्यमानेषु निर्दयम्॥ मरणार्तेषु जीवेषु यत्प्रतीकारवाञ्छया। अनुग्रहमतिः सेयं करुणेति प्रकीर्तिता॥ (ज्ञानार्णव २७, ८-१०)। ८. दीनेष्वार्तेषु भीतेषु याचमानेषु जीवितम्। प्रतीकारपरा बुद्धिः कारुण्यमभिधीयते॥ (योगशा. ४-१२०)। ९. स्वामनपेक्ष्य परदुःखप्रहाणेच्छा कारुण्यम्। (प्रमाण. स्याद्वाद. ५-८)। १०. हीन-दीन-कानीनानयनजनानुग्राहकत्वं कारुण्यम्। (त. वृत्ति श्रुत. ७-११)। ११. रोग-शोक-दरिद्राद्यैः पीडिता येऽत्र जन्तवः। तेषां दुःखप्रहाणेच्छा कारुण्यं क्रियतामिति॥ (धर्मसं. श्रा. १०-१०४)।

२ शारीरिक और मानसिक दुःखों से पीड़ित दीन प्राणियों के प्रति जो अनुग्रहरूप परिणाम होता है, उसका नाम कारुण्य है।

कार्मण—१. सव्वकम्माणं परूहणुप्पादयं सुह-दुक्खाणं बीजमिदि कम्मइयं। (षट्खं. ५, ६, २४१, पु. १४, पृ. ३२८)। २. सर्वशरीरप्ररोहणबीजभूतं कार्मणं शरीरं कर्मेत्युच्यते। (स. सि. २-२५); कर्म्मणां कार्यं कार्मणम्। (स. सि. २-३६)। ३. कर्मणो विकारः कर्मात्मकं कर्ममयमिति कार्मणम्। (त. भा. २-४९)। ४. कर्मेति सर्वशरीरप्ररोहणसमर्थं कार्मणम्। सर्वाणि शरीराणि यतः प्ररोहन्ति तत् बीजभूतं कार्मणशरीरं कर्मेत्युच्यते। (त. वा. २, २५, ३); कर्मणामिदं कर्मणां समूह इति वा कार्मणम्। कर्मणामिदं कार्यं कर्मणां समूह इति वा, कथंचिद्भेदविवक्षोपपत्तेः, कार्मणमिति व्यपदिश्यते। (त. वा. २, ३६, ८)। ५. कर्म्मनिमित्तं कार्मणम्, अशेषकर्म्म चास्याधारभूतं कुण्डवद् बदरादीनाम्, अशेषकर्म्मप्रसवसमर्थं वा, यथा बीजमङ्कुरादीनामिति। (त. भा. हरि. वृ. २-३७); अशेषकर्माधारभूतं समस्तकर्मप्रसवनसमर्थमङ्कुरादीनां बीजमिव कार्मणं शरीरम्। (त. भा हरि. वृ. ८-१२)। ६. कर्मणा निर्वृत्तं कार्मणम्। (आव. हरि. वृ. १४३४, पृष्ठ ७६७)। ७. मिथ्यादर्शनादिभिः क्रियत इति कर्म—ज्ञानावरणीयादि, तेन निर्वृत्तं तन्मयं वा कार्मणम्; शीर्यते इति शरीरम्, कार्मणं च तच्छरीरं चेति विग्रहः। (आव. नि. हरि. वृ. ४३, पृष्ठ ३६)। ८. कर्मणो विकारः कार्मणम्, अष्टविधकर्मनिष्पन्नं सकलशरीरनिबन्धनं च, उक्तं च—× × × कम्मविवागो गारो कम्मणमट्ठविह विचित्तकम्मनिप्फण्णं। सव्वेसिं सरीराणं कारणभूतं मुणेयव्वं॥८॥ (अनुयो. हरि. वृ. ८७)। ९. कर्मणा निर्वृत्तं कार्मणम् अशेषकर्मराशेराधारभूतम् अशेषकर्मप्रसवसमर्थं वा। (त. भा. सिद्ध. वृ. २-३७)। सर्वकर्मप्ररोहबीजं सांसारिकसुख-दुखभाजनं कर्मैव कार्मणशरीरम्, × × × कर्मणि वा भवं कार्मणम्। (त. भा. सिद्ध. वृ. ६-३)। १०. कर्मैव कार्मणम् शरीरम्, अष्टकर्मस्कन्ध इति। अथवा कर्मणि भवं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कार्मणं शरीरं नामकर्मावयवस्य कर्मणो ग्रहणम्। तेन योगः कार्मणकाययोगः। केवलेन कर्मणा जनितवीर्येण सह योग इति यावत्। (धव. पु. १, पृ. २९५); कर्माणि प्ररोहन्ति अस्मिन्निति प्ररोहणं कार्मणशरीरम्। कूष्माण्डफलस्य वृन्तवत् सकलकर्माधारं सकलकर्मणामुत्पादकं कार्मणशरीरम्। × × × भविष्यत्सर्वकर्मणाम् प्ररोहकमुत्पादकं त्रिकालगोचराशेषसुख-दुःखानां बीजं चेति अष्टकर्मकलापं कार्मणशरीरम्। कर्मणि भवं वा कार्मणं कर्मैव वा कार्मणम्। (धव. पु. १४, पृ. ३२९)। ११. कर्मैव कार्मणः कायः कर्मणां वा कदम्बकम्। एक-द्वि-त्रिक्षणानेष त्रिपहर्त्तौ प्रवर्तते ॥ (पंचसं. अमित. १-१७८)। १२. कार्मणशरीरं पुनस्तदुदय (कार्मणशरीरनामोदय) निर्वर्त्यमशेषकर्मणाम् प्ररोहभूमिराधारभूतम्। तथा संसार्यात्मनां गत्यन्तरसंक्रमणे साधकतमं करणीयमित्यन्यत्। ततस्तत्कारणभूतं कार्मणशरीरनामकर्मेति स्थितम्। (कर्मस्त. गो. वृ. १०, पृ. ८५)। १३. अष्टविधकर्मसमुदायनिष्पन्नौदारिकादिशरीरनिबंधनं च भवान्तरानुयायि कर्मणो विकारः कर्मैव वा कार्मणम्। (अनुयो. मल. हेम. वृ. १४२, पृ. १९६)। १४. कर्मणो जातं कर्मजम्। किमुक्तं भवति? कर्मपरमाणव एवात्मप्रदेशैः सह ये क्षीर-नीरवत् अन्योन्यानुगताः सन्तः शरीररूपतया परिणतास्ते कर्मजं शरीरमिति। अत एवैतदन्यत्र कार्मणमित्युक्तम्, कर्मणो विकारः कार्मणमिति। तथा चोक्तम्—कम्मविगारो कम्मणमट्ठविहविचित्तकम्मनिप्पन्नं। सव्वेसिं सरीराणां कारणभूतं मुणेयव्वं ॥ (प्रज्ञाप. मलय. वृ. २०-२६७, पृ. ४०९; जीवाजी. मलय. वृ. १-१३, पृ. १४)।

२ जो सब शरीरों की उत्पत्ति का बीजभूत शरीर है—उनका कारण है—उसे कार्मण शरीर कहते हैं। ३ कर्म के विकारभूत या कर्मरूप शरीर का नाम कार्मण हैं।

कार्मणकाययोग—१. कम्मेव य कम्मइयं कम्मभवं तेण जो दु संजोगो। कम्मइयकायजोगो एय-विय-तियगेसु समएसु ॥ (प्रा. पंचसं. १-९९; धव. पु. १, पृ. २९५ उद्.; गो. जी. २४१)। २. तेन (कार्मणशरीरेण) योगः कार्मणकाययोगः। (त. भा. सिद्ध. वृ. ६-१)। ३. सर्वाणि शरीराणि यतः प्ररोहन्ति तद् बीजभूतं कार्मणशरीरं कार्मणकाय इति भण्यते, वाङ्मनःकायवर्गणानिमित्तः आत्मप्रदेशपरिस्पन्दो योगो भवति, कार्मणकायकृतो योगः कार्मणकाययोगः। (धव. पु. १, पृ. २९९)। ४. कर्मैव— अष्टविधकार्मणस्कन्धः एव— कार्मणशरीरम्, वा अथवा कर्मभवं कार्मणशरीरनामकर्मोदयप्रभवं कार्मणशरीरम्, खलु स्फुटं भवति, तेन कार्मणशरीरेण सह वर्तमानो यः संयोगः आत्मनः कर्माकर्षणशक्तिसंगतप्रदेशपरिस्पन्दरूपो योगः स कार्मणकाययोगः। (गो. जी. म. प्र. व जी. प्र. टी. २४१)। ५. विग्रहगतौ औदारिकादिनोकर्मवर्गणानां अनाहरणे सति कार्मणशरीरनामोदयेन कार्मणवर्गणायातपुद्गलस्कन्धानां ज्ञानावरणादिकर्मपर्यायेण जीवप्रदेशेषु बन्धप्रघट्टके उत्पन्नजीवप्रदेशपरिस्पन्दः कार्मणकाययोगः। (गो. जी. जी. प्र. टी. ७०३)। ६. कार्मणकाययोगः अष्टप्रकारकर्मविकाररूपशरीरचेष्टा स्वरूपोऽपान्तरालगतावुपपत्तिप्रथमसमये केवलसमुद्घातावस्थायां च। (षड्शीति मलय. वृ. ५, पृ. १२७)।

३. सब शरीरों के बीजभूत शरीर को कार्मण शरीर कहा जाता है। वचन, मन और काय वर्गणाओं के निमित्तभूत आत्मप्रदेशपरिस्पन्द का नाम योग है। कार्मण शरीर के द्वारा जो योग किया गया है वह कायर्मणकाययोग कहलाता है।

कार्मणबन्धननाम — यदुदयात्कार्मणपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं सम्बन्धस्तत्कार्मणबन्धननाम। (प्रज्ञाप. मलय. वृ. २३, २९३, पृ. ४७०)।

जिस कर्म के उदय से गृहीत एवं गृह्यमाण कर्मपरमाणु परस्पर में सम्बन्ध को प्राप्त होते हैं उसे कार्मणबन्धननामकर्म कहते हैं।

कार्मणशरीरबन्धननाम—जस्स कम्मस्स उदएण कम्मइयसरीरपरमाणू अण्णोण्णेण बंधमाच्छंति तं कम्मइयरीरबंधणणामं। (धव. पु. ६, पृ. ७०)।

जिस कर्म के उदय से कार्मण शरीरगत परमाणु परस्पर में बन्ध को प्राप्त होते हैं उसे कार्मणशरीरबन्धन नामकर्म कहते हैं।

कार्मणशरीरसंघातनाम—जस्स कम्मस्स उद-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एण कम्मइयसरीरक्खंधाणं सरीरभावमुवगयाण बंधणणामकम्मोदएण एगबंधणबद्धाणमट्ठत्तं होदि तं कम्मइयसरीरसंघादणामं। (धव. पु. ६, पृ. ७०)। बन्धन नामकर्म के उदय से एकबन्धनबद्ध होकर शरीररूपता को प्राप्त कार्मणशरीर के स्कन्ध जिस कर्म के उदय से मृष्टता—चिक्कणता या एकरूपता—को प्राप्त होते हैं उसे कार्मणशरीरसंघातनामकर्म कहते हैं।

कार्मणशरीरनामकर्म—१. जस्स कम्मस्स उदओ कुंभंडफलस्स वेंटो व्व सव्वकम्मासयभूदो तस्स कम्मइयसरीरमिदि सण्णा। (धव. पु. ६, पृ. ६९)। २. यदुदयात्कूष्माण्डफलवृन्ताकफलवृन्तवत्सर्वकर्माश्रयभूतं तत्कार्मणशरीरम्। (मूला. वृ. १२-१९३)। ३. यस्य कर्मण उदयात् कार्मणवर्गणापुद्गलान् गृहीत्वा कार्मणशरीरत्वेन परिणमयति तत्कार्मणशरीरनामकर्म, तच्च कार्मणशरीरादन्यत्। (कर्मस्तव गो. वृ. १०, पृ. १७; प्रव. सारो. वृ. १२६७)।

२ जिस कर्म का उदय कूष्माण्ड फल के समान समस्त कर्मों का आधारभूत हो वह कार्मणशरीरनामकर्म कहलाता है।

कार्य—देखो कारण।

कार्यपरमाणु—१. खंधाणं अवसाणो णादव्वो कज्जपरमाणू। (नि. सा. २५)। २. गलतां पुद्गलद्रव्याणाम् अन्तोऽवसानस्तस्मिन् स्थितो यः स कार्यपरमाणुः। (नि. सा. टी.) २५।

२ गलने वाले पुद्गलस्कन्ध के अन्त में स्थित (जिसका फिर दूसरा विभाग न हो) परमाणु को कार्यपरमाणु कहते हैं।

कार्या रुचि—तस्मात्कारणात् निसर्गाख्यादुत्पद्यते याऽसौ रुचिः सा कार्याऽऽख्या। तथा योऽसौ बाह्य उपदेशः स त[य]त्र हेतुर्भवति तत उत्पद्यते या रुचिः सा तत्कार्या भवतीत्येवं कार्या रुचिः। कारणं निसर्गोऽधिगमो वेति। (त. भा. सिद्ध. वृ. १–३)।

निसर्ग या अधिगम रूप कारण से उत्पन्न होनेवाली श्रद्धा को कार्यारुचि कहते हैं।

काल—१. वत्तणालक्खणो कालो। (उत्तरा. २८, १०)। २. कालस्स व्वट्टणा × × ×। (प्रव. सा. २-४२)। ३. ववगदपणवण्ण-रसो ववगददोगंध अट्ठफासो य। अगुरुलहुगो अमुत्तो वट्टणलक्खो य कालो त्ति॥ (पंचा. का. २४)। ४. पासरसगंधवण्णव्वदिरित्तो अगुरुलहुगसंजुत्तो। वत्तणलक्खणकलियं कालसरूवं इमं होदि॥ (ति. प. ४-२७८)। ५. कालोऽनन्तसमयो वर्तनादिलक्षणः। (त. भा. ४–१५)। ६. सव्वाणं दव्वाणं परिणामं जो करेदि सो कालो। एक्केकासपएसे सो वट्टदि एक्किको चेव॥ (कार्तिके. २१६)। ७. कल्पते क्षिप्यते प्रेर्यते येन क्रियावद्द्रव्यं स कालः। (त. वा. ४, १४, ५); तल्लक्षणः कालः। सा वर्तना लक्षणं यस्य स काल इत्यवसेयः। (त. वा. ५, २२, ६); वर्तनाद्युपकारलिंगः कालः। उक्ता वर्तनादयः उपकारा यस्यार्थस्य लिंगं स काल इत्यनुमीयते। तथा चोक्तम्—येन मूर्तानामुपचयाश्चापचयाश्च लक्ष्यन्ते स काल इति। (त. वा. ५, २२, २३)। ८. वर्तनालक्षणः कालः × × ×। (वरांग. २६, २७)। ९. सकलपदार्थानां वृत्तिहेतुत्वं वर्तना। सा लक्षणं यस्यासौ तल्लक्षणः कालः। (न्यायकु. ६, ७२, पृ. ७९५)। १०. एवं चेव (ववगदपंचवण्णं ववगदपंचरस ववगददुगंध ववगदअट्ठफासं स-परपरिणामहेऊ अपदेसियं लोगपदेसपरिणामं) कालदव्वं। (धव. पु. ३, पृ. ३); ववगददोगंध-पंचरसट्ठपास-पंचवण्णो कुंभारचक्कहेट्ठिमसिल व्व वत्तणालक्खणो लोगागासपमाणो अत्थो कालो णाम। (धव. पु. ४, ३१४); कल्यन्ते संख्यायन्ते कर्म-भवकायायुस्स्थितयोऽनेनेति कालशब्दव्युत्पत्तेः। कालः समयः अद्धा इत्येकोऽर्थः। (धव. पु. ४, पृ. ३१७, ३१८); सीदुसण वरिसणेहि उवलक्खियो कालो। (धव. पु. १४, पृ. ३६); दव्वाणं परिणमणस्स णिमित्तकारणलक्खणं कालदव्वं। (धव. १५, पृ. ३३)। ११. वर्णगन्धरसस्पर्शमुक्तोऽगौरवलाघवः। वर्तनालक्षणः कालः × × ×। (ह. पु. ७–१)। १२. अनादिनिधनः कालो वर्तनालक्षणो मतः। लोकमात्रः सुसूक्ष्माणुपरिछिन्नप्रमाणकः॥ सोऽसंख्येयोऽप्यनन्तस्य वस्तुराशेरुपग्रहः। वर्तते स्वगतानन्तसामर्थ्यपरिबृंहितः॥ (म. पु. ३, १–२); वर्तनालक्षणः कालो वर्तना स्वपराश्रया। यथास्वं गुणपर्यायैः परिणन्तृत्वयोजना॥ स कालो लोकमात्रैः स्वैरणुभिर्निचितस्थितैः। ज्ञेयोऽन्योन्यमसङ्कीर्णैः रत्नानामिव राशिभिः॥ (म. पु. २४, १३९,१४२)। १३.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वर्तनालक्षणः कालः बालयुवावृद्धत्वादिभिर्लक्षणैर्लक्ष्यते। (उत्तरा. चू. २८, पृ. २७२)। १४. सूर्यक्रियानिवृत्तः कालः। (अनुयो. हरि. वृ. पृ. ५४)। १५. जं वत्तणादिरूवो कालो दव्वस्स चेव पज्जातो। (धर्मसं. हरि. ३२)। १६. कालो परमनिरुद्धो अविभागी तं विजाण समओ त्ति। सुहमो अमुत्तिअगुरुगलहुवत्तणलक्खणो कालो॥ (जं. दी. प. १३-४)। १७. विशिष्टमर्यादावच्छिन्नोर्ध्वाधोऽर्धतृतीयद्वीपाभ्यन्तरवर्तिजीवादिद्रव्यैः परिणमद्भिः स्वत एव कल्यते गम्यते प्रथ्यतेऽपेक्ष्यते कारणतयाऽसाविव कालोऽपेक्षाकारणम्। (त. भा. सिद्ध. वृ. पृ. ५-३८)। १८. 'कल सत्त्व-संख्यानयोः' कलनं काल इति भावे प्रत्ययो घञ्, परिच्छेद इत्यर्थः, कल्यते वा परिच्छिद्यते वा यतोऽनेन वस्तु, 'अकर्तरि च कारके संज्ञायां घञ्, 'कलयन्ति वा' परिच्छेदयन्ति वा समर्यादपर्यायास्तमिति कालः, तस्मिन् वा स्थितान् कलयन्ति, समयादिकलानां वा समूहः कालः। (विशेषा. को. वृ. पृ. ६०५)। १९. वत्तणगुणजुत्ताणं दव्वाणं होइ कारणं कालो। (भावसं. दे. ३०९)। २०. स कालो यन्निमित्ताः स्युः परिणामादिवृत्तयः। वर्तनालक्षणं तस्य कथयन्ति विपश्चितः॥ (त. सा. ३-४०)। २१. वत्तणकिरियासाहणभूदो णियमेण कालो दु। (गो. जी. ६०५)। २२. वर्तनालक्षणः कालः स स्वयं परिणामिनाम्। परिणामोपकारेण पदार्थानां प्रवर्तते॥ (चन्द्र. च. १८-७४)। २३. जीवादीनां पदार्थानां परिणामोपयोगतः। वर्तनालक्षणः कालोऽनशो नित्यश्च निश्चयात्॥ (धर्मश. २१-८८)। २४. वर्तनालक्षणः कालः। (पंचा. का. ज. वृ. ४; भ. आ. मूला. ३६; आरा. सा. टी. ४)। २५. वर्तमानशुद्धपर्यायरूपपरिणतो वर्तमानसमयः कालो भण्यते। (प्रव. सा. ज. वृ. २३)। २६. यदमी परिवर्तन्ते पदार्थाः विश्ववर्तिनः। नवजीर्णादिरूपेण तत्कालस्यैव चेष्टितम्॥ (ज्ञानार्णव ६-३८)। २७. तत्र कल्यते—सङ्ख्यायतेऽसावनेन वा कलनं वा कलासमूहो वेति कालः—वर्तना-परापरत्वादिलक्षणः। (स्थाना. अभय. वृ. २–७४, पृ. ५१)। २८. कालाणवो जगन्मात्राश्चैवं तु मणिराशिवत्। ते प्रत्येकं विवर्ताप्तिहेतवः सर्ववस्तुनः॥ (आचा. सा. ३, २२-२३)। २९. पञ्चानां वर्तनाहेतुः कालः। (नि. सा. वृ. ९)। ३०. द्रव्यं कालाणुमात्रं गुणगणकलितं चाश्रितं शुद्धभावैः, तच्छुद्धं कालसंज्ञं कथयति जिनपो निश्चयाद् द्रव्यनीतेः। द्रव्याणामात्मना सत्परिणमनमिदं वर्तना तत्र हेतुः, कालस्यायं च धर्मः स्वगुणपरिणतिर्धर्मपर्याय एषः॥ (अध्या. क. मा. ३–३८)। ३१. वर्तनालक्षणः कालो वर्तना च पराश्रया। (जम्बू च. ३-३९)।

३. जो पांच वर्ण, पांच रस, दो गन्ध एवं आठ स्पर्शों से रहित और छह प्रकार की हानि-वृद्धि स्वरूप अगुरु-लघु गुण से संयुक्त होकर वर्तना—स्वयं परिणमते हुए द्रव्यों के परिणमन में सहकारिता—लक्षण वाला है उसे काल कहते हैं।

काल-अभिग्रह—काले अभिग्गहो पुण आईमज्झे तहेव अवसाणे। अप्पत्ते सइ काले आई विइओ अ चरिमम्मि। (बृहत्क. १६५०)।

कालविषयक भिक्षा के अभिग्रह (नियम) को काल-अभिग्रह कहते हैं। भिक्षाकाल के न प्राप्त होने पर आदि—प्रथम पौरुषी (प्रहर)—में भिक्षार्थ जाना, इसका नाम आद्यभिक्षाकालविषयक प्रथम अभिग्रह है। भिक्षाकाल के प्राप्त होने पर जाना, यह मध्य भिक्षाकालविषयक द्वितीय अभिग्रह है। अन्त में—भिक्षा-काल के बीत जाने पर—जाना, यह अवसानविषयक अभिग्रह कहलाता है।

कालकायोत्सर्ग — सावद्यकालाचरणद्वारागतदोषपरिहाराय कायोत्सर्गः कायोत्सर्गपरिणतसहितकालो वा कालकायोत्सर्गः। (मूला. वृ. ७-१५१)।

सावद्यकाल में किये गये आचरण के द्वारा लगे हुए दोषों के परिहार के लिए जो कायोत्सर्ग किया जाता है, उसे काल-कायोत्सर्ग कहते हैं। अथवा कायोत्सर्ग से परिणत साधु से सहित काल को कालकायोत्सर्ग कहते हैं।

कालकाल—कालस्य सत्त्वस्य श्वादेः, कालो मरणं कालकालः। (आव. नि. हरि. वृ. ७२८, पृ. २७५)।

काल अर्थात् कुत्ता आदि किसी प्राणी का जो काल है—मरण होता है, उसका नाम कालकाल है। यह स्वाध्याय में बाधक होता है।

कालकृत परत्वापरत्व—कालकृते (परत्वापरत्वे) द्विरष्टवर्षाद्वर्षशतिकः परो भवति, वर्षशतिकाद्द्विरष्टवर्षोऽपरो भवति। (त. भा. ५–२२)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सोलह वर्ष की आयु वाले से सौ वर्ष की आयु वाला 'पर' और सौ वर्ष की आयु वाले से सोलह वर्ष की आयु वाला 'अपर' कहा जाता है। इस प्रकार काल के आश्रय से जो पर-अपर का व्यवहार होता है, उसे काल-कृत परत्व-अपरत्व कहा जाता है।

कालक्रमोत्तर — कालत एकसमयस्थितेर्द्विसमयस्थितिः ततोऽपि त्रिसमयस्थितिः, एवं यावदसंख्येयसमयस्थितिः। (उत्तरा. नि. वृ. १, पृ. ६)।

काल के क्रम से एक-एक समय की अधिकता से होने वाली स्थितियों को काल-क्रमोत्तर कहते हैं। जैसे—एक समय स्थिति से दो समय स्थिति और दो समय स्थिति से तीन समय स्थिति, इस प्रकार असंख्यात समय स्थिति तक जानना चाहिए।

काल-चतुर्विंशति—कालश्च[लच]तुर्विंशतिश्चतुर्विंशतिः समयादयः, एतत्कालस्थिति वा द्रव्यं कालचतुर्विंशतिः। (आव. भा. मलय. वृ. १९२, पृ. ५९०)।

चौबीस समयों आदि (आवली व मुहूर्त आदि) को अथवा इतने समय स्थित रहने वाले द्रव्य को कालचतुर्विंशति कहते हैं।

कालचार—कालस्तु यस्मिन् काले चरति यावन्तं वा कालं स कालचारः। (आचारां. शी. वृ. १, ५, २४६; पृ. १८३)।

चार, चर्या और चरण—ये समानार्थक शब्द हैं। जिस काल में या जितने काल आचरण किया जाता है उसे कालचार कहते हैं।

काल जघन्य—कालजहण्णमेगो समओ। (धव. पु. ११, पृ. ८५)।

कालज्ञानाचार—१. साम्प्रतं ज्ञानाचारमाह—काल इति। यो यस्याङ्गप्रविष्टादेः श्रुतस्य काल उक्तः तस्य तस्मिन्नेव काले स्वाध्यायः कर्तव्यो नान्यदा। (दशवै. हरि. वृ. ३–८, पृ. १०३)। २. काले—स्वाध्यायवेलायां पठन-परिवर्तन-व्याख्यानादिक क्रियते सम्यक् शास्त्रस्य यत्स कालोऽपि ज्ञानाचार इत्युच्यते, साहचर्यात्कारणे कार्योपचाराद्वा। (मूला. वृ. ५–७२)।

१ अंगप्रविष्ट आदि जिस श्रुत के स्वाध्याय का जो काल कहा गया है उसी में उसका स्वाध्याय करना, अन्य काल में न करना; यह कालज्ञानाचार कहलाता है। २ जिस स्वाध्यायकाल में शास्त्र का पठन, परिवर्तन—विस्मृत न होने देने के लिए पुनः पुनः भावागम का परिशीलन—और व्याख्यान आदि किया जाता है उस काल को भी कारण में कार्य के उपचार से कालज्ञानाचार कहा जाता है।

कालदोष—कालदोषः अतीतकालव्यत्ययः। यथा रामो वनं प्राविशदिति वक्तव्ये विशतीत्याह। (आव. नि. हरि. व मलय. वृ. ८८३)।

अतीत काल के विपरीत प्रयोग को कालदोष कहते हैं। जैसे—'राम वन में प्रविष्ट हुए' इस विवक्षा में 'राम वन में प्रविष्ट होते हैं' ऐसा कहना। यह ३२ सूत्रदोषों में २१वाँ दोष है।

कालनिधि—१. काले कालण्णाणं भव्व-पुराणं च तिसु वि वंसेसु। सिप्पसयं कम्माणि पयाए हिअकराणि॥ (जम्बूद्वी. ६६, गा. ६, पृ. २५६; प्रव. सारो. १२२४)। २. कालनामनि निधौ कालज्ञानम्—सकलज्योतिःशास्त्रानुबन्धि ज्ञानम्—तथा जगति त्रयो वंशाः—वंशः प्रवाहः आवलिका इत्येकार्थाः, तद्यथा—तीर्थंकरवंशश्चक्रवर्तिवंशो बलदेव-वासुदेववंशश्च। तेषु त्रिष्वपि वंशेषु यद् भाव्यं यच्च पुराणमतीतमुपलक्षणमेतद् वर्तमानं शुभाशुभं तत् सर्वमत्रास्ति, इतो महानिधितो ज्ञायत इत्यर्थः। शिल्पशतं घट-लोह-चित्र-वस्त्र-नापितशिल्पानां पञ्चानामपि प्रत्येकं विंशतिभेदत्वात्, कर्माणि च कृषिवाणिज्यादीनि जघन्य-मध्यमोत्कृष्टभेदभिन्नानि त्रीण्येतानि प्रजाया हितकराणि निर्वाहाभ्युदयहेतुत्वात्। एतत्सर्वमत्राभिधीयते। (जम्बूद्वी. शा. वृ. ६६, पृ. २५८)। ३. भविष्यद्भूतयोर्ज्ञानं वत्सरांस्त्रीन् सतोऽपि च। कृष्यादीनि च कर्माणि शिल्पान्यपि च कालतः॥ (त्रि. श. पु. च. १, ४, ५७९)।

२ कालनिधि के आश्रय से समस्त ज्योतिष शास्त्र सम्बन्धी ज्ञान तथा तीर्थंकरवंश, चक्रवर्तिवंश और बलदेव-वासुदेववंश ये जो तीन वंश लोक में प्रवर्तमान हैं उनमें भविष्य में जो होने वाला है, भूत में जो हो चुका है एवं वर्तमान में जो शुभाशुभ चल रहा है उसका भी ज्ञान प्राप्त होता है। इसके अतिरिक्त कुम्हार, लुहार, चित्रकार, जुलाहा और नाई इनमेंसे प्रत्येककी २०-२० कलाओं का तथा वाणिज्य आदि कर्मों का कथन भी इसमें किया गया है।

कालपरिक्षेप—वासारत्ते अइपाणियं ति गिम्हे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपाणियं नच्चा। कालेण परिक्खित्तं तेण तमन्ने परिहरंति ॥ (बृहत्क. भा. ११२४)।

वर्षाकाल में बारिश के पानी से घिर जाने वाले तथा ग्रीष्मकाल में जल के अभाववाले ग्राम-नगरादि को कालपरिक्षिप्त कहते हैं। ऐसे कालपरिक्षिप्त नगरादि को जानकर अन्य जन—दूसरे राष्ट्र के राजा आदि—उसे छोड़ देते हैं।

कालपरिवर्तन—१. अवसप्पिणि-उस्सप्पिणि-समयावलियासु णिरवसेसासु। जादो मुदो य बहुसो परिभमदो कालसंसारे ॥ (द्वादशा. २७; स. सि. २–१० उद्.; भ. आ. विजयो. १७७७ उद्.)। २. तक्कालतदाकालसमयेसु जीवो अणंतसो चेव। जादो मदो य सव्वेसु इमो तीदम्मि कालम्मि ॥ (भ. आ. १७७७)। ३. कालपरिवर्तनमुच्यते—उत्सर्पिण्याः प्रथमसमये जातः कश्चिज्जीवः स्वायुषः परिसमाप्तौ मृतः, स एव पुनर्द्वितीयाया उत्सर्पिण्या द्वितीयसमये जातः स्वायुषः क्षयान्मृतः, स एव पुनस्तृतीयाया उत्सर्पिण्यास्तृतीयसमये जातः। एवमनेन क्रमेणोत्सर्पिणी परिसमाप्ता तथा अवसर्पिणी च। एवं जन्मनैरन्तर्यमुक्तं मरणस्यापि तथैव ग्राह्यमेतावत्कालपरिवर्तनम्। (स. सि. २–१०; भ. आ. विजयो. १७७७; मूला. वृ. ८–१४)। ४. उवसप्पिणि-अवसप्पिणिपढमसमयादिचरमसमयंतं। जीवो कमेण जम्मदि मरदि य सव्वेसु कालेसु ॥ (कार्तिके. ६९)। ५. ओसप्पिणि-उस्सप्पिणि-समयावलिया णिरंतरा सव्वा। जादो मुदो य बहुसो हिंडंतो कालसंसारे ॥ (धव. पु. ४, पृ. ३३३ उद्.)। ६. शुद्धात्मानुभूतिरूपनिर्विकल्पसमाधिकालं विहाय प्रत्येकं दशकोटाकोटिसागरेण प्रमितोत्सर्पिण्यवसर्पिण्येकैकसमये नानापरावर्तनकालेनानन्तवारानयं जीवो यत्र न जातो न मृतः स समयो नास्तीति कालसंसारः। (बृ. द्रव्यसं. ३५)। ७. ओसप्पिणीए समया जावइया ते य नियमरणेणं। पुट्ठा कमुक्कमेणं कालपरट्टो भवे थूलो ॥ सुहुमो पुण ओसप्पिणिपढमे समयंमि जइ मओ होइ। पुणरवि तस्साणंतर बोए समयंमि जइ मरइ ॥ एवं तरतमजोएण सव्वसमएसु चेव एएसुं। जइ कुणइ पाणचायं अणुक्कमेण नणु गणिज्जा ॥ (प्रव. सारो. १०४७–४९, पृ. ३०७)। ८. उत्सर्पिण्याः कस्याश्चिदवसर्पिण्याश्च प्रथम-द्वितीयादिसमयेषु पर्यायेण जन्म-मरणाभ्यां वृत्तिः कालसंसारः। (भ. आ. मूला. ४३०)। ९. कश्चिज्जीवः उत्सर्पिणीप्रथमसमये जातः स्वायुःपरिसमाप्तौ मृतः, पुनर्द्वितीयोत्सर्पिणीद्वितीयसमये जातः स्वायुःपरिसमाप्त्या मृतः, पुनः तृतीयोत्सर्पिणीतृतीयसमये जातः तथा मृतः, पुनः चतुर्थोपसर्पिणीचतुर्थसमये जातः; अनेन क्रमेण उत्सर्पिणीं समाप्नोति तथैवावसर्पिणीमपि समाप्नोति। एवं जन्मनैरन्तर्यमुक्तम् मरणस्याप्येवं नैरन्तर्यं ग्राह्यम्। तदेतत्सर्वं कालपरिवर्तनं भवति। (गो. जी. जी. प्र. टी. ५६०)। १०. कालपरिवर्तनं कथ्यते—उत्सर्पिणीकालप्रथमसमये कोऽपि जीव उत्पन्नो निजायुःसमाप्तौ मृतः, स एव जीवः द्वितीयोत्सर्पिणीकालद्वितीयसमये पुनरुत्पन्नो निजायुर्भुक्त्वा पुनर्मृतः, तृतीयोत्सर्पिणीकालतृतीयसमये पुनरुत्पन्नो निजायुर्भुक्त्वा पुनर्मृतः, चतुर्थोपसर्पिणीकालचतुर्थसमये पुनरुत्पन्नो निजायुर्भुक्त्वा पुनर्मृतः; एवं सर्वोत्सर्पिणीसमयेषु जन्म गृह्णाति तथा सर्वोत्सर्पिणीसमयेषु मरणमपि गृह्णाति। यथा सर्वेषूत्सर्पिणीसमयेषु जन्म-मरणानि गृह्णाति तथा सर्वेष्ववसर्पिणीसमयेषु जन्मानि मरणानि च गृह्णाति। एतावता कालेन एकं कालपरिवर्तनं भवति। (त. वृत्ति श्रुत. २–१०)।

३ कोई जीव उत्सर्पिणी के प्रथम समय में उत्पन्न हुआ व आयु के समाप्त होने पर मर गया, फिर वह द्वितीय उत्सर्पिणी के द्वितीय समय में उत्पन्न हुआ और आयु के समाप्त होने पर मर गया, पश्चात् वही तृतीय उत्सर्पिणी के तृतीय समय में उत्पन्न हुआ और आयु के समाप्त होने पर मर गया; इस क्रम से उसने जैसे उत्सर्पिणी को समाप्त किया वैसे ही अवसर्पिणी को भी समाप्त किया। यह जन्म की निरन्तरता हुई। इसी प्रकार मरणकी भी निरन्तरता समझना चाहिए। इतने काल को कालपरिवर्तन कहा जाता है। ७ अवसर्पिणी और उत्सर्पिणी के जितने समय हैं उन सबको जब जीव क्रम अथवा उत्क्रम से अपने मरण से व्याप्त कर लेता है तब उतने काल को एक बादर कालपुद्गलपरावर्तन कहा जाता है। कोई एक जीव अवसर्पिणी के प्रथम समय में मरा, तत्पश्चात् उक्त अवसर्पिणी के द्वितीय समय में वह मरा (यदि आगे पीछे के अन्य समयों में वह मरता है तो उनकी गणना नहीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

की जाती है)। पश्चात् अवसर्पिणी के तृतीय समय में वह मरा, इसी क्रम से उक्त अवसर्पिणी के चतुर्थ आदि अन्य सभी समयों में वह क्रम से मरण को प्राप्त होता है। तत्पश्चात् अवसर्पिणी के समान उत्सर्पिणी के भी समस्त समयों में जब वह यथाक्रम से मरण को प्राप्त होता है तब इतने काल को एक सूक्ष्म कालपुद्गलपरावर्तन कहा जाता है।

कालपुरुष—यो यावन्तं कालं पुरुषवेदवेद्यानि कर्माणि वेदयते स कालपुरुषः। (सूत्रकृ. शी. वृ. ४, १, ५७)।

जो पुरुष जितने काल तक पुरुष वेद के द्वारा वेदन किये जाने वाले कर्मों का अनुभव करता है, उतने समय तक उसे कालपुरुष कहते हैं।

कालपूजा—गर्भादिपञ्चकल्याणमर्हतां यद्दिनेऽभवत्। तथा नन्दीश्वरे रत्नत्रयपर्वणि चार्चनम्॥ स्नपनं क्रियते नानारसैरिक्षुघृतादिभिः। तत्र गीतादिमांगल्यं कालपूजा भवेदियम्॥ (धर्मसं. श्रा. ९, ९६–९७)।

तीर्थंकरों के गर्भादि कल्याणकों के दिनों में, नन्दीश्वर (अष्टाह्निक पर्व) में और रत्नत्रय पर्व के समय जो पूजा की जाती है; इक्षु और घृतादि रसों के द्वारा अभिषेक किया जाता है, तथा गीत आदि मंगलकार्य किये जाते हैं; इस सबको कालपूजा कहा जाता है।

कालप्रतिक्रमण—१. रात्रि-संध्यात्रयस्वाध्यायावश्यककालेषु गमनागमनादिव्यापाराकरणात् कालप्रतिक्रमणम्। कालस्य दुष्परिहार्यत्वात्कालाधिकरणव्यापारविशेषाः कालसाहचर्यात् कालशब्देन गृहीताः। (भ. आ. विजयो. ११६); संध्यास्वाध्यायकालादिषु गमनागमनादिपरिहारः कालप्रतिक्रमणम्। (भ. आ. विजयो. ४२१)। २. कालमाश्रितातीचारान्निवृत्तिः कालप्रतिक्रमणम्। (मूला. वृ. ७–११५)।

१ रात्रि में, तीनों संध्याओं में तथा स्वाध्याय और आवश्यकों के काल में गमनागमनादि व्यापार न करना, यह कालप्रतिक्रमण कहलाता है। काल के अपरिहार्य होने से तदाश्रित व्यापारविशेष कालशब्द से ग्रहण किये गये हैं।

कालप्रतिसेवना — १. आवश्यककालादन्यस्मिन् काले आवश्यककरणम्, वर्षाविग्रहातिक्रमः, इत्यादिका कालप्रतिसेवना। (भ. आ. विजयो. ४५०)। २. कालं आवश्यककालवर्षाविग्रहाद्यतिक्रमः सेवा। (भ. आ. मूला. ४५०)।

१ जिस आवश्यक के करने का जो काल नियत है उस काल में उसे न करके अन्य समय में करना तथा वर्षाकाल आदि का अतिक्रमण करना—उसे न करना, इत्यादि को कालप्रतिसेवना कहा जाता है।

कालप्रत्याख्यान—कालस्य दुःपरिहार्यत्वात् कालसाध्यायां क्रियायां परिहृतायां काल एव प्रत्याख्यातो भवतीति ग्राह्यम्। तेन संध्याकालादिषु अध्ययनगमनादिकं न संपादयिष्यामीति चेतः कालप्रत्याख्यानम्। (भ. आ. विजयो. ११६, पृ. २७६)।

काल चूंकि अपरित्याज्य है, अतः विवक्षित काल में सिद्ध होने वाली क्रिया का परित्याग करने पर काल का ही प्रत्याख्यान समझना चाहिए। इससे यह अभिप्राय समझना चाहिए कि संध्याकाल आदि में मैं अध्ययन व गमन आदि न करूँगा इस प्रकार के विचार का नाम ही कालप्रत्याख्यान है।

कालमंगल—१. जस्सि काले केवलणाणादिमंगलं परिणमदि॥ परिणिक्कमणं केवलणाणुब्भवणिव्वुदिपवेसादी। पावमलगालणादो पण्णत्तं कालमंगलं एदं॥ (ति. प. १, २४–२५)। २. तत्थ कालमंगलं नाम—जम्हि काले केवलणाणादिपज्जएहि परिणदो कालो पावमलगालणत्तादो मंगलं। तस्योदाहरणं परिनिष्क्रमण-केवलज्ञानोत्पत्ति-परिनिर्वाणदिवसादयः। जिनमहिमसम्बद्धकालोऽपि मंगलम्, यथा नन्दीश्वरदिवसादिः। (धव. पु. १, पृ. २९)।

१ जिस काल में तीर्थंकरादि महापुरुषों ने परिनिष्क्रमण (दीक्षा), केवलज्ञान और निर्वाण आदि प्राप्त किया है, उस काल को पापमल का विनाशक होने से कालमंगल कहते हैं।

कालमास—यत्र काले यो मासो वर्ण्यते स कालप्रधानताविवक्षणात्तत्कालमासः। ××× यदि वा स्वलक्षणनिष्पन्नो नाक्षत्रादिकः पंचविधः (नाक्षत्रः, चान्द्रः, ऋतुमासः, आदित्यः, अभिवर्धितः) पंचभेदः कालमासः। (व्यव. भा. मलय. वृ. २–१४)।

जिस काल में जिस मास का वर्णन किया जाता है उसे काल की प्रधानता की विवक्षा से कालमास कहा जाता है। अथवा अपने-अपने लक्षणों से सिद्ध वह कालमास नक्षत्रादि के योग से पांच प्रकार का है—नाक्षत्र, चान्द्र, ऋतुमास, आदित्य और अभिवर्धित।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कालयुति (कालजुडी)—तेसिं चेव जीवादीणं दव्वाणं दिवस-मास-संवच्छरादिकालेहिं सह मेलणं कालजुडी णाम। (धव. पु. १३, पृ. ३४९)।

जीवादिक द्रव्यों के दिन, मास और वर्ष आदि काल के साथ संमेलन को कालयुति कहा जाता है।

काललब्धि—१. तत्र काललब्धिस्तावत्—कर्माविष्ट आत्मा भव्यः काले ऽर्धपुद्गलपरिवर्तनाख्येऽवशिष्टे प्रथमसम्यक्त्वग्रहणयोग्यो भवति, नाधिके, इतीयमेका काललब्धिः। अपरा कर्मस्थितिकाललब्धिः—उत्कृष्टस्थितिकेषु कर्मसु जघन्यस्थितिकेषु च प्रथमसम्यक्त्वलाभो न भवति। क्व तर्हि भवति? अन्तःकोटाकोटीसागरोपमस्थितिकेषु कर्मसु बन्धमापद्यमानेषु विशुद्धपरिणामवशात् सत्कर्मसु च ततः संख्येयसागरोपमसहस्रोनायामन्तःकोटाकोटीसागरोपमस्थितौ स्थापितेषु प्रथमसम्यक्त्वयोग्यो भवति। अपरा काललब्धिर्भवापेक्षया। भव्यः पंचेन्द्रियः संज्ञी पर्याप्तकः सर्वविशुद्धः प्रथमसम्यक्त्वमुत्पादयति। (स. सि. २–३; त. वा. २, ३, २)। २. भव्यः कर्माविष्टोऽर्धपुद्गलपरिवर्तनपरिमाणकाले ऽवशिष्टे प्रथमसम्यक्त्वयोग्यो भवतीति काललब्धिः। (पंचसं. अमित. १–२८६; अन. ध. स्वो. टी. २-४६)।

१ कर्माक्रान्त भव्य जीव अर्धपुद्गलपरिवर्तन मात्र काल के शेष रह जाने पर प्रथम सम्यक्त्व के ग्रहण करने योग्य होता है, इससे अधिक काल के शेष रहने पर वह उसके योग्य नहीं होता है। यह एक काललब्धि हुई। दूसरी काललब्धि कर्मस्थिति की अपेक्षा है—कर्मों के उत्कृष्ट स्थितियुक्त और जघन्य स्थितियुक्त बन्ध को प्राप्त होने पर उस प्रथम सम्यक्त्व की प्राप्ति नहीं होती, किन्तु अन्तःकोटाकोटी मात्र स्थिति के साथ उनके बन्ध को प्राप्त होने पर तथा विशुद्ध परिणामों के वश उनके सत्त्व को उससे संख्यात हजार सागरोपम से हीन अन्तःकोटाकोटी प्रमाण स्थिति में स्थापित करने पर उक्त सम्यक्त्व की प्राप्ति होती है। तीसरी काललब्धि भव की अपेक्षा है—भव्य, पंचेन्द्रिय, संज्ञी और पर्याप्तक सर्वविशुद्ध जीव ही उस सम्यक्त्व को उत्पन्न कर सकता है।

काललोक—काललोकः समयावलिकादिः। (स्थानां. अभय. वृ. १–५, पृ. १३)।

समय-आवली आदि काल को काललोक कहते हैं।

कालवर्गणा—१. इह वर्गणाः सामान्यतश्चतुर्विधा भवन्ति। तद्यथा— ××× कालतः एकसमयस्थितीनां यावदसंख्येयसमयस्थितीनाम्। (आव. नि. हरि. वृ. ३९, पृ. ३४)। २. कम्मदव्वं पडुच्च समयाहियावलियापहुडि जाव कम्मट्ठिदि त्ति, णोकम्मदव्वं पडुच्च एगसमयादि जाव असंखेज्जा लोगा त्ति ताव एदाओ कालवग्गणाओ। (धव. पु. १४, पृ. ५२)।

२ कर्मद्रव्य की अपेक्षा एक समय अधिक आवली से लेकर कर्मस्थिति तक तथा नोकर्मद्रव्य की अपेक्षा एक समय से लेकर असंख्यात लोक प्रमाण काल तक ये सब कालवर्गणायें हैं।

कालवाद—१. कालो सव्वं जणयदि कालो सव्वं विणस्सदे भूदं। जागत्ति हि सुत्तेसु वि ण सक्कदे वंचिदुं कालो॥ (गो. क. ८७९)। २. सव्वं कालो जणयदि भूदं सव्वं विणासदे कालो। जागत्ति हि सुत्तेसु वि ण सक्कदे वंचिदु कालो॥ (अंगपण्णत्ती २–१९, पृ. २७७)।

१ काल (समय) ही सबको उत्पन्न करता है और काल ही सबका विनाश करता है, वह सोते हुए प्राणियों के भीतर भी जागता रहता है, उसे कोई धोखा नहीं दे सकता; इस प्रकार काल को महत्त्व देकर कथन करने को कालवाद कहते हैं।

कालविप्रकृष्ट—१. अन्तरिताः कालविप्रकृष्टाः। ××× कालविप्रकृष्टा लाभालाभ-सुखदुःख-ग्रहोपरागादयः। (आ. मी. वृ. ५)। २: कालविप्रकृष्टा रामादयः। (न्यायदी. पृ. ४१)।

१ जिनमें काल का व्यवधान हो ऐसे लाभ-अलाभ, सुख-दुःख और सूर्य-चन्द्रमादि के ग्रहण आदि को कालविप्रकृष्ट कहते हैं।

कालविमोक्ष—कालविमोक्षस्तु चैत्यमहिमादिकेषु कालेष्वनाघातादिघोषणापादितो यावन्तं कालं मुच्यते, यस्मिन् वा काले व्याख्यायते सोऽभिधीयते इति। (आचारां. नि. शी. वृ. १, ७, ४, २५८, पृ. २३६)।

जिन चैत्यमहिमादि पर्वों के समय अनाघात की (किसी भी जीव को नहीं मारने की) घोषणा जितने काल के लिए की जाती है, उतने काल तक जीवों को वधादि से मुक्ति मिलने के कारण उसे कालविमोक्ष कहते हैं। अथवा जिस काल में विमोक्षण का व्या-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थान किया जाता है उस काल को कालविमोक्ष कहते हैं।

कालापेक्षाव्यतिक्रम—कालापेक्षाव्यतिक्रमः कालापेक्षया कायोत्सर्गस्य विविधमंशभंजनम्। (अन. ध. स्वो. टी. ८–१२१)।

काल की अपेक्षा कायोत्सर्ग के विविध अंशों की विराधना करना, यह कालापेक्षाव्यतिक्रम नाम का ३२ दोषों में २९वां दोष है।

कालव्यतिरेक—अपि चैकस्मिन् समये यकाप्यवस्था भवेन्न साऽप्यन्या। भवति च सापि तदन्या द्वितीयसमयेऽपि कालव्यतिरेकः॥ (पंचाध्यायी १–१४९)।

एक समय में जो भी अवस्था होती है वह वही है, दूसरी नहीं हो सकती। और वही दूसरे समय में अन्य होती है—पहली नहीं हो सकती; यही कालव्यतिरेक है।

कालशुद्धदान—कालं शुद्धं तु यत्किंचित्काले पात्राय दीयते। (त्रि. श. पु. च. १, १, १८४)।

दान देने के लिए जो समय निश्चित है, ठीक आगम निरूपित उसी समय पर पात्र के लिए शुद्ध देय वस्तु का दान करने को कालशुद्धदान कहते हैं।

कालशुद्धि—१. दिसदाह उक्कपडणं विज्जुचडुक्कासणिदधणुगं च। दुग्गंध-संज्झ-दुद्दिण-चंदग्गह-सूरराहुजुज्झं च॥ कलहादिधूमकेदू धरणीकंपं च अब्भगज्जं च। इच्चेवमाइ बहुया सज्झाए वज्जिदा दोसा॥ (मूला. ५, ७७–७८)। २. विद्युदिन्द्रधनुर्ग्रहोपरागाकालवृष्ट्यभ्रगर्जन-जीमूतव्रातप्रच्छाद-दिग्दाह-धूमिकापात-संन्यास-महोपवास - नन्दीश्वरजिनमहिमाद्यभावः कालशुद्धिः। (धव. पु. ९, पृ. २५३)। ३. उदयास्तात्प्राक्-पाश्चात्य-त्रि-त्रिनाडीषु यः सुधीः। मध्याह्ने तां च यः कुर्यात् कालशुद्धिश्च तस्य सा॥ (धर्मसं. श्रा. ७–४६)।

२ स्वाध्याय के समय में बिजली, इन्द्रधनुष, सूर्य चन्द्र का ग्रहण, अकालवृष्टि, मेघगर्जन, मेघसमूह का आच्छादन (दुर्दिन), दिशादाह, धूमिकापात (कुहरा), संन्यास, महोपवास, नन्दीश्वर (अष्टाह्निकपर्व) और जिनमहिमा आदि के अभाव का नाम कालशुद्धि है।

कालसमवाय—१. उत्सर्पिण्यवसर्पिण्योस्तुल्यदशसागरोपमकोटाकोटीप्रमाणात्कालसमवायनात् कालसमवायः। (त. वा. १, २०, १२; धव. पु. ९, पृ. १९९)। २. कालदो समवाओ—समयो समएण, मुहुत्तो मुहुत्तेण समो। (धव. पु. १, पृ. १०१)। ३. समयावलिय-खण-लव-मुहुत्त-दिवस-पक्ख-मासउडु-अयण-संवच्छर-युग-पुव्व-पव्व-पल्ल-सागरोसप्पिणि-उस्सप्पिणीओ सरिसाओ, एसो कालसमवाओ। (जयध. पु. १, पृ. १२५)। ४. एकसमयः एकसमयेन सदृशः, आवलिः आवल्या सदृशी, प्रथमपृथ्वीनारक-भावन-व्यन्तराणां जघन्यायूंषि सदृशानि। सप्तमपृथ्वीनारक-सर्वार्थसिद्धिदेवानामुत्कृष्टायुषी सदृशे इत्यादिः कालसमवायः। (गो. जी. मं. प्र. व जी. प्र. टी. ३५६)।

२ काल की अपेक्षा समय समय के साथ समान है, आवली आवली के साथ समान है; इत्यादि काल की समानता को कालसमवाय कहते हैं।

कालसमाधि—कालसमाधिरपि यस्य यं कालमवाप्य समाधिरुत्पद्यते, यस्य वा यावन्तं कालं समाधिर्भवति, यस्मिन् वा काले समाधिर्व्याख्यायते स कालप्राधान्यात् कालसमाधिरिति। (सूत्रकृ. शी. वृ. १०, १, ४)।

जिसके जिस काल में समाधि उत्पन्न होती है, अथवा जितने काल तक समाधि रहती है, अथवा जिस काल में समाधि का व्याख्यान किया जाता है; उस काल को काल की प्रधानता से कालसमाधि कहते हैं।

कालसंक्रम—कालस्स अपुव्वस्स पादुब्भाओ कालसंकमो। ××× अथवा ××× एगकालम्मि ट्ठिददव्वस्स कालंतरगमणं कालसंकमो। (धव. पु. १६, पृ. ३४०)।

अपूर्व काल की उत्पत्ति को कालप्रादुर्भाव कहा जाता है। अथवा एक काल में स्थित द्रव्य का अन्य काल को प्राप्त होना, इसका नाम कालसंक्रम है।

क्षमण—१. खमणं स्वस्यान्यभूतापराधक्षमा। (भ. आ. विजयो. ७०)। २. क्षमणं स्वस्यान्यकृतापराधक्षमा। (अन. ध. स्वो. टी. ७–९८)।

दूसरों के द्वारा किये गये अपराधों के स्वयं क्षमा करने को क्षमण कहते हैं। यह अर्ह-लिंगादि (अन. ध. पृ. ५३२) में से एक है।

क्षमा—१. कोहुप्पत्तिस्स पुणो वहिरंगं जदि हवेदि सक्खादं। ण कुणदि किंचि वि कोहं तस्स खमा होदि धम्मो त्ति॥ (द्वादशानु. ७१)। २. शरीरस्थितिहेतुमार्गणार्थं परकुलान्युपगच्छतो भिक्षोर्दुष्टजनाक्रोश-प्रहसनावज्ञा-ताडन - शरीरव्यापादनादीनां सन्निधाने कालुष्यानुत्पत्तिः क्षमा। (स. सि. ९, ६)। ३. क्षमागुणांश्चानायासादीननुस्मृत्य क्षमितव्यमेवेति क्षमाधर्मः। (त. भा. ९–६, पृ. १९१)। ४. कोहेण जो ण तप्पदि सुर-णर-तिरिएहिं कीरमाणेऽवि। उवसग्गे वि रउद्दे तस्स खिमा णिम्मला होदि॥ (कार्तिके. ३९४)। ५. क्रोधोत्पत्तिनिमित्ताविषह्याक्रोशादिसंभवे कालुष्योपरमः क्षमा। शरीरस्थितिहेतुमार्गणार्थं परकुलान्युपगच्छतो भिक्षोर्दुष्टजनाक्रोशोत्प्रहसनावज्ञान-ताडन- शरीरव्यापादनादीनां क्रोधोत्पत्तिनिमित्तानां सन्निधाने कालुष्याभावः क्षमेत्युच्यते। (त. वा. ९, ६, २)। ६. क्षमा क्रोधनिग्रहः। (आव. हरि. वृ. ४, पृ. ६६०)। ७. क्षमणं सहनपरिणामः आत्मनः शक्तिमतः अशक्तस्य वा प्रतीकारानुष्ठाने। (त. भा. हरि. वृ. ९–६)। ८. क्षमा सहनम्। (त. भा. सिद्ध. वृ. ६–१३); क्षमणं सहनं आत्मनः शक्तिमतः। (त. भा. सिद्ध. वृ. ९–६)। ९. क्रोधोत्पत्तिनिमित्ताविसह्याक्रोशादिसंभवे कालुष्याभावः क्षमा। (त. श्लो. ९–६)। १०. क्रोधादिनिमित्तसान्निध्येऽपि कालुष्याभावः क्षमा स्नेहकार्याद्यनपेक्षः। (भ. आ. विजयो. ४६)। ११. तत्थ खमा आकुट्ठस्स वा तालियस्स वा अहियासेंतस्स कम्मक्खओ भवइ, अणहियासितस्स कम्मबंधो भवइ, तम्हा कोहस्स निग्गहो कायव्वो, उदयपत्तस्स व विफलीकरणं, एस खमत्ति वा तितिक्खत्ति वा कोधनिग्गहे त्ति वा एगट्ठा। (दशवै. चू. पृ. १८)। १२. क्रोधोत्पत्तिनिमित्तानामत्यन्तं सति संभवे। आक्रोश-ताडनादीनां कालुष्योपरमः क्षमा॥ (त. सा. ६–१४)। १३. तपोबृंहणकारणशरीरस्थितिनिमित्तं निरवद्याहारान्वेषणार्थं परगृहाण्युपसर्पतो भिक्षोर्दुष्टजनाक्रोशनोत्प्रहसनाऽवज्ञानुताडनशरीरव्यापादनादीनां क्रोधोत्पत्तिनिमित्तानां सन्निधाने कालुष्याभावः क्षमा। (चा. सा. पृ. २४)। १४. शरीरस्थितिहेतुमार्गणार्थं परकुलान्युपयतस्तीर्थयात्राद्यर्थं वा पर्यटतो यतेर्दुष्टजनाक्रोशोत्प्रहसनाऽवज्ञा-ताडन-भर्त्सन-शरीरव्यापादनादीनां सन्निधाने स्वान्ते कालुष्यानुत्पत्तिः क्षान्तिः। (मूला. वृ. ११–५)। १५. क्षमा-अनभिव्यक्तक्रोध-मानस्वरूपस्य द्वेषसंज्ञितस्याप्रीतिमात्रस्याभावः, अथवा क्रोध-मानयोरुदयनिरोधः। (समवा. अभय. वृ. २७, पृ. ४५)। १६. क्रोधस्यानुत्पाद उत्पन्नस्य वा विफलीकरणम्। (योगशा. स्वो. विव. ३–१६)। १७. क्रोधोत्पत्तिनिमित्तानां सन्निधानेऽपि कालुष्योपरमः क्षमा। (अन. ध. स्वो. टी. ६–२)। १८. क्षमा दुर्निवारकालुष्यकारणोत्पत्तावपि कोपाभावः। (सा. ध. स्वो. टी. ५–४७)। १९. कायस्थितिकारणविष्वाणाद्यन्वेषणाय परगृहान् पर्यटतो मुनेर्दुष्टपापिष्टपंचजनानामसह्यगालिप्रदानबर्करवचनाबलेहनपीडाजननकायकायविनाशनादीनां समुत्पत्तौ मनोऽनच्छतानुत्पादः क्षमा कथ्यते। (त. वृत्ति श्रुत. ९–६)। २०. तपोबृंहणकारणशरीरस्थितिनिमित्तं निरवद्याहारान्वेषणार्थं परगृहाणि गच्छतो भिक्षोर्भ्रमतः दुष्टमिथ्यादृग्जनाक्रोशनात् प्रहसनाऽवज्ञानुताडन-यष्टि-मुष्टिप्रहार-शरीरव्यापा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दनानीनां क्रोधोत्पत्तिनिमित्तानां सन्निधाने कालुष्याभावः क्षमा प्रोच्यते। (कार्तिके. टी. ३९३)।

१ क्रोध की उत्पत्ति के निमित्तभूत बाह्य कारण के प्रत्यक्ष में होने पर भी जरा भी क्रोध नहीं करना, इसका नाम क्षमा है।

क्षमापण— १. खामणं आचार्यादीनां क्षमाग्रहणम्। (भ. आ. विजयो. व मूला. ७०)। २. क्षमापणमाचार्यादीनां क्षमाग्राहणम्। (अन. ध. स्वो. टी. ७, ९८)।

१ आचार्य आदि गुरु जनों से क्षमा मांगने को क्षमापण कहते हैं। यह अर्हं-लिंगादि में से एक है।

क्षय—१. क्षयः आत्यन्तिकी निवृत्तिः। (स. सि. २-१)। २. क्षयो निवृत्तिरात्यन्तिकी। यथा तस्यैवाम्भसोऽधःप्रापितपङ्कस्य शुचिभाजनान्तरसंक्रान्तस्य प्रसादः आत्यन्तिकः, तथा आत्मनोऽपि कर्मणोऽत्यन्तविनिवृत्तौ विशुद्धिरात्यन्तिकी क्षय इत्युच्यते। (त. वा. २, १, २)। ३. सव्वघादणसत्तीए अभावो खओ उच्चदि। (धव. पु. ५, पृ. १९८); कम्माणं णिम्मूलक्खएणुप्पण्णपरिणामो खओ णाम। (धव. पु. ७, पृ. ६०); खओ णाम अभावो। (धव. पु. ७, पृ. ९०)। ४. तेषां (कर्मणां) आत्यन्तिकी हानिः क्षयः ××× । (त. श्लो. २, १, ३)। ५. (कर्मणाम्) अत्यन्तविश्लेषः क्षयः। (पंचा. का. अमृत. वृ. ५६)। ६. क्षय आत्यन्तिकी निवृत्तिः। (अन. ध. स्वो. टी. २-४६)।

१ कर्मों की आत्यन्तिक निवृत्ति को—सर्वथा अभाव को—क्षय कहते हैं।

क्षयोपशम—१. सव्वघादिफद्दयाणि अणंतगुणहीणाणि होदूण देसघादिफद्दयत्तणेण परिणमिय उदयमागच्छंति, तेसिमणंतगुणहीणत्तं खओ णाम, देसघादिफद्दयसरूवेणवट्ठाणमुवसमो, तेहिं खओवसमेहिं संजुत्तोदओ खओवसमो णाम। (धव. पु. ७, पृ. ९२)। २. ××× तदुभयात्मकः। क्षयोपशम उद्गीतः क्षीणाक्षीणबलत्वतः। (त. श्लो. २, १, ३)। ३. सर्वप्रकारेणात्मगुणप्रच्छादिकाः कर्मशक्तयः सर्वघातिस्पर्द्धकानि भण्यन्ते, विवक्षितैकदेशेनात्मगुणप्रच्छादिकाः शक्तयो देशघातिस्पर्द्धकानि भण्यन्ते। सर्वघातिस्पर्द्धकानामुदयाभाव एव क्षयस्तेषामेवास्तित्वमुपशम उच्यते, सर्वघात्युदयाभावलक्षणक्षयेण सहित उपशमः तेषामेकदेशघातिस्पर्द्धकानामुदयश्चेति समुदायेन क्षयोपशमो भण्यते। (बृ. द्रव्यसं. टी. ३४; अन. ध. स्वो. टी. २-४६)।

१ सर्वघाति स्पर्द्धक अनन्तगुणहीन होकर देशघाति स्पर्द्धक स्वरूप से परिणत होते हुए उदय को प्राप्त होते हैं, उनकी अनन्तगुणहीनता का नाम क्षय है; उन्हींका देशघाति रूप में अवस्थित रहना, यह उपशम है, इस प्रकार के क्षय और उपशम के साथ जो उदय हुआ करता है, इसे क्षयोपशम कहते हैं।

क्षयोपशमनिमित्त अवधि—१. अवधिज्ञानावरणस्य देशघातिस्पर्द्धकानामुदये सति सर्वघातिस्पर्द्धकानामुदयाभावः क्षयः, तेषामेवानुदयप्राप्तानां सदवस्था उपशमः, तौ निमित्तमस्येति क्षयोपशमनिमित्तः। (स. सिं. १-२२; त. वा. १-२२)। २. गुणपडिवन्न इत्यादि, उत्तरुत्तरचरणगुणविसुज्झमाणवेत्रवातो अवधिणाण-दंसणावरणाण खओवसमो भवति, तक्खयोवसमेण अवधि उप्पज्जइ। (नन्दी. चू. पृ. १३। ३. तथा गुणप्रत्ययाः क्षयोपशमनिर्वृत्ताः क्षायोपशमिकाः काश्चन (अवधिज्ञानस्य प्रकृतयः), ताश्च तिर्यङ्नराणाम्। (आव. नि. हरि. वृ. २५)। ४. क्षयनिमित्तोऽवधिः शेषाणामुपशमनिमित्तः। क्षयोपशम निमित्त इति वाक्यभेदात् क्षायिकौपशमिकक्षायोपशमिकसंयमगुणनिमित्तस्यावधिरवगम्यते। कार्ये कारणोपचारात् क्षयादीनां क्षायिकसंयमादिषूपचारः, तथाभिधानोपपत्तेः। (त. श्लो. १-२२, पृ. २४४)। ५. काश्चन पुनरन्यतमा 'गुणप्रत्ययाः' क्षयोपशमेन निर्वृत्ताः क्षायोपशमिकाः, ताश्च तिर्यङ्मनुष्याणाम्। (आव. नि. मलय. वृ. २५)। ६. संप्रति क्षायोपशमिकस्वरूपं प्रतिपादयति ××× अत्र निर्वचनमभिधातुकाम आह— क्षायोपशमिकं येन कारणेन तदावरणीयानाम्— अवधिज्ञानावरणीयानाम्— कर्मणामुदीर्णानां क्षयेण, अनुदीर्णानाम्—उदयावलिकामप्राप्तानाम् उपशमेन विपाकोदयलक्षणेनावधिज्ञानमुत्पद्यते तेन कारणेन क्षायोपशमिकमित्युच्यते। (नन्दी. सू. मलय. वृ. ८, पृ. ७७)। ७. अवधिज्ञानावरणस्य देशघातिस्पर्द्धकानामुदयाभावः क्षयः, तेषामेव सर्वघातिस्पर्द्धकानामुदयप्राप्तानां सदवस्था उपशमः, क्षयश्च उपशमश्च क्षयोपशमौ, तौ निमित्तं कारणं यस्यावधेः स क्षयोपशमनिमित्तः। (त. वृत्ति श्रुत. १-२२)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१ अवधिज्ञानावरणकर्म के सर्वघाति स्पर्द्धकों का उदयाभावीक्षय, अनुदयप्राप्त उन्हीं का सदवस्थारूप उपशम और देशघाति स्पर्द्धकों का उदय होने पर जो अवधिज्ञान उत्पन्न होता है उसे क्षयोपशमनिमित्तक अवधि कहते हैं। इसे गुणप्रत्यय अवधि भी कहा जाता है।

क्षयोपशमलब्धि—१. पुव्वसंचिदकम्ममलपडलस्स अणुभागफद्दयाणि जदा विसोहीए पडिसमयमणंतगुणहीणाणि होदूणुदीरिज्जंति तदा खओवसमलद्धी हीदि। (धव. पु. ६, पृ. २०४)। २. कम्ममलपडलसत्ती पडिसमयमणंतगुणविहीणकमा। होदूणुदीरदि जदा तदा खओवसमलद्धी दु॥ (ल. सा. ४)। ३. देशघातिस्पर्द्धकानामुत्कृष्टानुभागानन्तैकभागमात्राणामुदये सत्यपि सर्वघातिस्पर्द्धकानामुत्कृष्टानुभागानन्तबहुभागप्रमाणानामुदयाभावः क्षयः, तेषामेवानुदयप्राप्तानां कर्मस्वभावेन सदवस्था उपशमः, तयोर्लब्धिः क्षयोपशमलब्धिः। (ल. सा. टी. ४)।

१ पूर्वसंचित कर्मों के अनुभागस्पर्द्धक जब विशुद्धि के वश प्रतिसमय अनंतगुणे हीन होकर उदीरणा को प्राप्त होते हैं तब क्षयोपशमलब्धि होती है।

क्षयोपशम सम्यक्त्व— देखो क्षायोपशमिक। १. मिच्छत्तं जसुदिन्नं तं खीणं अणुइयं च उवसंतं। मीसीभावपरिणयं वेयिज्जंतं खओवसमं। (श्रा. प्र. ४४)। २. क्षयो मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च उदितानां देशतो निर्मूलनाशः, अनुदितानां चोपशमः, क्षयेण युक्त उपशमः, स प्रयोजनमस्य क्षायोपशमिकम्। तच्च सत्कर्मवेदनाद्वेदकमप्युच्यते। (योगशा. स्वो. विव. २–२)।

१ जो मिथ्यात्व उदय को प्राप्त हुआ है वह क्षीण और जो उदय को अप्राप्त है वह उपशान्त है, इस प्रकार क्षय के साथ उपशमरूप मिश्र अवस्था को प्राप्त होना, इसका नाम क्षयोपशम है। इस प्रकार के क्षयोपशम से उत्पन्न होने वाले तत्त्वार्थश्रद्धान को क्षयोपशम या क्षायोपशमिक सम्यक्त्व कहा जाता है।

क्षान्ति—देखो क्षमा। १. क्रोधादिनिवृत्तिः क्षान्तिः। (स. सि. ६–१२)। २. धर्मप्रणिधानात् क्रोधादिनिवृत्तिः क्षान्तिः। क्रोधादेः कषायस्य शुभपरिणामभावनापूर्विकानिवृत्तिः क्षान्तिरित्युच्यते। (त. वा. ६, १२, ९)। ३. क्षान्तिश्च आक्रोशादिश्रवणेऽपि क्रोधत्यागश्च। (दशवै. नि. हरि. वृ. ३४९)। ४. धर्मप्रणिधानात् क्रोधनिवृत्तिर्मनोवाक्कायैः क्षान्तिः। (त. भा. सिद्ध. वृ. ६–१३)। ५. धर्मप्रणिधानात् क्रोधादिनिवृत्तिः क्षान्तिः। (त. श्लो. ६–१२)। ६. क्षान्तिः क्रोधोदयनिग्रहः। (औपपा. अभय. वृ. १६, पृ. ३३)। ७. क्षान्तिः क्षमा शक्तस्याशक्तस्य वा सहनपरिणामः। (योगशा. स्वो. विव. ९३)। ८. क्षान्तिर्गणक्षमापणा। (अन. ध. स्वो. टी. ७–९८)।

१ क्रोध आदि के अभाव को क्षान्ति कहते हैं।

क्षायिक-अनन्त-उपभोग—१. निरवशेषस्योपभोगान्तरायस्य प्रलयात् प्रादुर्भूतोऽनन्त उपभोगः क्षायिकः, यतः सिंहासन-चामर-छत्रत्रयादयो विभूतयः। (स. सि. २–४)। २. निरवशेषोपभोगान्तरायप्रलयादनन्तोपभोगः क्षायिकः। निरवशेषस्योपभोगान्तरायकर्मणः प्रलयात् प्रादुर्भूतोऽनन्त उपभोगः क्षायिको यत्कृताः सिंहासन-बालव्यजनाशोकपादपछत्रत्रय - प्रभामण्डल-गम्भीरस्निग्धस्वरपरिणामदेवदुन्दुभिप्रभृतयो भावाः। (त. वा. २, ४, ५)। ३. उपभोगान्तरायक्षयात् क्षायिकोऽनन्त उपभोगः। कोऽसौ उपभोगः? सिंहासन-चामर-छत्रत्रयादिकः। (त. वृत्ति श्रुत. २–४)।

१ निःशेष उपभोगान्तराय कर्म के क्षय से केवली को जो सिंहासन, चामर और छत्रत्रय आदिरूप विभूतियाँ प्राप्त होती हैं उन्हें क्षायिक अनन्त उपभोग कहते हैं।

क्षायिक-अनन्तभोग—१. कृत्स्नस्य भोगान्तरायस्य तिरोभावादाविर्भूतो अतिशयवाननन्तो भोगः क्षायिकः, यतः कुसुमवृष्ट्यादयो विशेषाः प्रादुर्भवन्ति। (स. सि. २–४)। २. कृत्स्नभोगान्तरायतिरोभावात् परमप्रकृष्टो भोगः। कृत्स्नस्य भोगान्तरायस्य तिरोभावादाविर्भूतोऽतिशयवाननन्तो भोगः क्षायिकः, यत्कृताः पञ्चवर्णसुरभिकुसुमवृष्टिविविधदिव्यगन्ध- चरणनिक्षेपस्थानसप्तपद्मपंक्तिसुगन्धिधूप-सुखशीतमारुतादयो भावाः। (त. वा. २, ४, ४)।

१ सम्पूर्ण भोगान्तराय कर्म के विनाश से जो पुष्पवृष्टि आदि रूप अतिशयवान् अनन्त भोगसामग्री प्राप्त होती है उसे क्षायिक अनन्त भोग कहते हैं।

क्षायिक-अनन्तवीर्य—१. वीर्यान्तरायस्य कर्मणोऽत्यन्तक्षयादाविर्भूतमनन्तवीर्यं क्षायिकम्। (स. सि.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२–४)। २. वीर्यान्तरायस्यात्यन्तसंक्षयादनन्तवीर्यम्। आत्मनः सामर्थ्यस्य प्रतिबन्धिनो वीर्यान्तरायकर्मणोऽत्यन्तसंक्षयादुद्भूतवृत्तिः क्षायिकमनन्तवीर्यम्। (त. वा. २, ४, ६)। ३. वीर्यान्तरायक्षयात् क्षायिकमनन्तवीर्यम्। किं तत् क्षायिकं वीर्यम्? यद्बलात् केवलज्ञानेन केवलदर्शनेन च कृत्वा सर्वद्रव्याणि सर्वपर्यायांश्च ज्ञातुं दृष्टुं च केवली शक्नोति। (त. वृत्ति श्रुत. २–४)।

१ वीर्यान्तराय कर्म का सर्वथा क्षय हो जाने से केवली के जो अनन्त शक्ति प्रगट होती है उसे क्षायिक अनन्तवीर्य कहते हैं।

क्षायिक अभयदान—१. दानान्तरायस्यात्यन्तक्षयादनन्तप्राणिगणानुग्रहकरं क्षायिकमभयदानम्। (स. सि. २–४)। २. अनन्तप्राणिगणानुग्रहकरं सकलदानान्तरायक्षयादभयदानम्। दानान्तरायस्य कर्मणोऽत्यन्तसंक्षयादाविर्भूतं त्रिकालगोचरानन्तप्राणिगणानुग्रहकरं क्षायिकमभयदानम्। (त. वा. २, ४, २)। ३. दानान्तरायक्षयात् क्षायिकमनन्तप्राणिगणानुग्रहकरमभयदानम्। (त. वृत्ति श्रुत. २–४)।

१ दानान्तरायकर्म के निःशेष विनाश से त्रिकालवर्ती अनन्त प्राणियों का अनुग्रह करने वाला क्षायिक अभयदान प्रगट होता है।

क्षायिक उपभोग—१. उपभोगः क्षायिकः, सोऽप्युचितोपभोगसाधनावाप्त्यबन्धहेतुरेव। ××× पुनरुपभुज्यत इत्युपभोग। (त. भा. हरि. वृ. २–४)। २. विषयसम्पदि सत्यां तथोत्तरगुणप्रकर्षात् तदनुभव उपभोगः, पुनः पुनरुपभोगाद् वा वस्त्र-पात्रादिरुपभोगः। स च निरवशेषउपभोगान्तरायकर्मणि क्षीणे यथेष्टमुपतिष्ठते। (त. भा. सिद्ध. वृ. २–४)।

१ उपभोगान्तराय कर्म के पूर्णतया विनष्ट हो जाने पर यथेष्ट जो उपभोग के साधन उपस्थित रहते हैं, इस का नाम क्षायिक उपभोग है।

क्षायिक चारित्र—१. चारित्रमपि तथा (पञ्चविंशतिविकल्पस्य चारित्रमोहनीयस्य निरवशेषक्षयात् क्षायिकं चारित्रम्)। (स. सि. २–४)। २ पूर्वोक्तमोहप्रकृतिनिरवशेषक्षयात् सम्यक्त्व-चारित्रे। पूर्वोक्तस्य दर्शनमोहत्रिकस्य चारित्रस्य च पञ्चविंशतिविकल्पस्य निरवशेषक्षयात् क्षायिके सम्यक्त्वचारित्रे भवतः (त. वा. २, ४, ७)। ३. चारित्तमोहक्खएण समुप्पण्णं खइयं चारित्तं। (ध. पु. १४, पृ. १६)। ४. वरचरणं उवसमदो खयदो दुचरित्तमोहस्स। (ल. सा. ६०९)। ५. षोडशकषायनवनोकषायक्षयात् क्षायिकं चारित्रम्। (त. वृत्ति श्रुत. २–४)।

१ पच्चीस प्रकार के समस्त चारित्रमोहनीय के क्षय से उत्पन्न होनेवाले चारित्र (यथाख्यातचारित्र) को क्षायिक चारित्र कहते हैं।

क्षायिक ज्ञान—१. जं तक्कालियमिदरं जाणदि जुगवं समं तदो सव्वं। अत्थं विचित्तविसमं तं णाणं खाइयं भणियं॥ (प्रव. सा. १–४७)। २. ज्ञानावरणस्यात्यन्तक्षयात् केवलज्ञानं क्षायिकम्। (स. सि. २–४)। ३. ज्ञानावरणक्षयात् क्षायिकज्ञानं केवलम्। (त. श्लो. २–४)।

१ जो ज्ञान तात्कालिक (वर्तमान) और इतर—अतीत व अनागत—तीनों काल सम्बन्धी अनेक भेदरूप सभी पदार्थों को एक साथ जानता है, उसे क्षायिक ज्ञान (केवलज्ञान) कहा जाता है।

क्षायिक दान—देखो क्षायिक अभयदान। १. प्रयच्छनाविघातकारि दानं क्षायिकम्। (त. भा. हरि. वृ. २–४)। २. तच्च सकलदानान्तरायक्षयादेकस्मादपि तृणाग्रात् त्रिभुवनविस्मयकरं यथेप्सितमर्थिनो न जातुचित् प्रतिहन्यते प्रयच्छत इति। (त. भा. सिद्ध. वृ. २–४)।

१ क्षायिक दान वह कहलाता है जिसके प्रभाव से देते समय किसी प्रकार की बाधा उपस्थित नहीं हो सकती।

क्षायिक भाव—१. क्षयः कर्मणोऽत्यन्तविनाशः, स एव क्षायिकस्तत्र भवस्तेन वा निर्वृत्त इति। (अनुयो. हरि. वृ. पृ. ३७)। तथा (क्षयः) तदत्यन्तापचयः प्रयोजनमस्येति तेन वा निर्वृत्त इति। (त. भा. हरि. वृ. २–१)। २. ज्ञानादिघातिनां पुद्गलानां य आत्यन्तिकोऽत्ययः सः क्षयः, तेन निर्वृत्तोऽध्यवसायः क्षायिक उच्यते। (त. भा. सिद्ध. वृ. १–५, पृ. ४८); तथा तदत्यन्तात्ययात् स क्षयः, स प्रयोजनमस्य तेन वा निर्वृत्त इति क्षायिकः, भवनं भावः, तेन पर्यायेण आत्मलाभः, ××× तथा क्षायिकशब्देन त एव दर्शनादिपर्यायाः श्रद्धानादिलक्षणाः शीर्णाशेष-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वविघातिकर्मांशाः प्रतिपाद्यन्त आत्मनः स्वरूपतयेति। (त. भा. सिद्ध. वृ. २-१)। ३. आत्यन्तिकी निवृत्तिः क्षयः, क्षयः प्रयोजनमस्येति क्षायिकम्। (आरा. सा. टी. ४)। ४. कर्मक्षयस्वभावः पुनः शुभः सर्वः क्षायिकः। (आव. भा. मलय. वृ. १८९, पृ. ५७८)। ५. कर्मणः क्षयणं क्षयः, यथा पंकात् पृथग्भूतस्य शुचिभाजनान्तरसंक्रान्तस्य अम्बुनः अत्यन्तस्वच्छता भवति, तथा जीवस्य कर्मणः आत्यन्तिकी निवृत्तिः क्षयः, क्षयः प्रयोजनं यस्य भावस्य स क्षायिकः। (त. वृत्ति. श्रुत. २-१)। ६. यथास्वं प्रत्यनीकानां कर्मणां सर्वतः क्षयात्। जातो यः क्षायिको भावः शुद्धः स्वाभाविकोऽस्य सः॥ (पंचाध्या. २-९७३)।

२ ज्ञानादि के विघातक पुद्गलों—ज्ञानावरणादि कर्मस्कन्धों—के अत्यन्त विनाश से जो अध्यवसाय—आत्मपरिणाम—होता है, वह क्षायिक भाव कहलाता है।

क्षायिक भावलोक—कर्मणः क्षयेण निर्वृत्तः क्षायिकः। (आव. भा. मलय. वृत्ति २०२, पृ. ५९३)।

कर्म के क्षय से जो उत्पन्न होता है उसे क्षायिक भावलोक कहते हैं।

क्षायिक भावसिद्ध—जत्थेणं ति अर्थमाणेन सम्यग्दर्शनज्ञानचारित्ररूपेण सर्वथा क्षपयित्वा साधितवान् यद् यस्मात् क्षायिकं भावं ततोऽसौ क्षायिकभावसिद्धः। (सिद्धप्रा. टी. गा. ५)।

सम्यग्दर्शन, ज्ञान और चारित्ररूप सूर्य के प्रभाव से कर्म का सर्वथा क्षय करके चूंकि क्षायिक भाव को सिद्ध किया गया है, अतः ऐसे मुक्त जीव को क्षायिकभावसिद्ध कहा जाता है।

क्षायिक भोग—देखो क्षायिक अनन्तभोग। १. जा खइया भोगलद्धी सो वि खइओ अविभागपच्चइयो जीवभावबंधो, भोगंतराइयक्खएण समुप्पत्तीदो। (धव. पु. १४, पृ. १७)। २. पुरुषार्थसाधनप्राप्ताविघ्नकृद् भोगः क्षायिकः उचितभोगसाधनावाप्त्यनन्धहेतुः। (त. भा. हरि. वृ. २-४)।

२ जो पुरुषार्थ के साधनों की प्राप्ति में सम्भव विघ्नों को दूर करनेवाला है, उसे क्षायिक भोग कहा जाता है। वह उचित भोगों के साधनों की प्राप्तिका सफल हेतु है।

क्षायिक लाभ—१. लाभान्तरायस्याशेषस्य निरासात् परित्यक्तकवलाहारक्रियाणां केवलिनां यतः शरीरबलाधानहेतवोऽन्यमनुजासाधारणाः परमशुभाः सूक्ष्माः अनन्ताः प्रतिसमयं पुद्गलाः सम्बन्धमुपयन्ति स क्षायिको लाभः। (स. सि. २-४)। २. अशेषलाभान्तरायनिरासात् परमशुभपुद्गलानामादानं लाभः। लाभान्तरायस्याशेषनिरासात् परित्यक्तकवलाहारक्रियाणां केवलिनां यतः शरीरबलाधानहेतवो अन्यकनुजासाधारणाः परमशुभाः सूक्ष्माः अनन्ताः प्रतिसमयं पुद्गलाः सम्बन्धमुपयान्ति स क्षायिको लाभः। (त. वा. २, ४, ३)। ३. प्राप्त्यविघातकारी लाभः क्षायिकः पुरुषार्थसाधनप्राप्तावविघ्नकृत्। (त. भा. हरि. वृ. २-४)। ४. लाभ इति परस्माच्चतुर्वर्गस्यान्यतमसमस्तसाधनप्राप्तिः, स चाशेषलाभान्तरायकर्मक्षयादचिन्त्यमाहात्म्यविभूतिराविर्भवति, येन यत् प्रार्थयते तत् समस्तमेव लभते, न तु प्रतिषिध्यते। (त. भा. सिद्ध. व. २-४)। ५. जा खइया लाहलद्धी सो खइओ अविभागपच्चइओ जीवभावबंधो, लाहंतरायक्खएण समुप्पत्तीदो। (धव. पु. १४, पृ. १७)।

१ समस्त लाभान्तराय के क्षय से कवलाहार क्रिया से रहित केवलियों के शरीर को बल प्रदान करने वाले जो अत्यन्त शुभ व सूक्ष्म अनन्त असाधारण पुद्गल प्रतिसमय सम्बन्ध को प्राप्त होते हैं, यह क्षायिक लाभ कहलाता है। ३ प्राप्ति में सम्भव विघ्नों को जो दूर किया करता है, उसे क्षायिक लाभ कहते हैं। वह पुरुषार्थ के साधनों की प्राप्ति में निर्विघ्नता को करता है।

क्षायिक वीर्य—देखो क्षायिक अनन्तवीर्य। वीर्यं क्षायिकमशेषवीर्यान्तरायक्षयजम्, तेन यदुचितं तत्सर्वं करोति। (त. भा. हरि. वृ. २-४)।

समस्त वीर्यान्तराय के क्षय से प्रादुर्भूत होने वाले क्षायिक वीर्य से जीव उचित सब कुछ करता है।

क्षायिक सम्यक्त्व—१. पूर्वोक्तानां अनन्तानुबन्धिक्रोध-मान माया-लोभानां सम्यक्त्व-मिथ्यात्व-सम्यङ्मिथ्यात्वानां च सप्तानां प्रकृतीनामत्यन्तक्षयात् क्षायिकं सम्यक्त्वम्। (स. सि. २-४)। २. दंसणमोहे खीणे खयदिट्ठी होइ निरवसेसम्मि। केणु उ सम्मो मोहो पडुच्च पुव्वं तु पण्णवणं॥ (बृहत्क. भा. १३१)। ३. खीणे दंसणमोहे जं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सद्दहणं सुणिम्मलं होइ। तं खाइयसम्मत्तं णिच्चं कम्मक्खवणहेउं ॥ (प्रा. पंचसं. १–१६०; धव. पु. १, पृ. ३९५ उद्धृत, गो. जी. ६४५)। ४. खीणे दंसणमोहे तिविहंमिवि भवनियाणभूयं मि। निप्पच्चवायमउलं सम्मत्तं खाइयं होइ। (श्रा. प्र. ४८; धर्मसं. हरि. ८०१)। ५. सत्तपयडिक्खएणुप्पण्णसम्मत्तं खइयं। (धव. पु. १, पृ. १७२); दंसणमोहणीयस्स खयेण खइयं सम्मत्तं होदि। (धव. पु. ७, पृ. १०७); जं खइयं सम्मत्तं तं पि खइयो अविवागपच्चइयो जीवभावबंधो, दंसणमोहक्खएण समुप्पत्तीदो। (धव. पु. १४, पृ. १६)। ६. सप्तप्रकृतिनिर्मूलक्षयात् क्षायिकमागतः ॥ (म. पु. ७४–४३९)। ७. दर्शनसप्तकक्षयात् क्षायिकं केवलसम्यक्त्वम्। (त. भा. सिद्ध. वृ. १०–५)। ८. तासामेव सप्तप्रकृतीनां क्षयादुपजातवस्तुयाथात्म्यगोचरा श्रद्धा क्षायिकं दर्शनम्। (भ. आ. विजयो. टी. ३१)। ९. सत्तण्हं पयडीणं ××× । खयदो य होइ खइयं केवलिमूले मणूसस्स ॥ (कार्तिके. ३०८)। १०. कोहचउक्कं पढमं अणंतबंधीणि णामयं भणियं। सम्मत्तं मिच्छत्तं सम्मामिच्छत्तयं तिण्णि ॥ एएसिं सत्तण्हं ××× । खयओ खइयं जायं अचलत्तं णिम्मलं सुद्धं ॥ (भावसं. दे. २६६–६७)। ११. सत्तण्हं ××× । खयादु खइयो य। (गो. जी. २६)। १२. सत्तण्हं पयडीणं खयादु खइयं तु होदि सम्मत्तं। मेरुं व णिप्पकंपं सुणिम्मलं अक्खयमणंतं। (ल. सा. १६३)। १३. क्षपयित्वा परः कश्चित्कर्म प्रकृतिसप्तकम्। आदत्ते क्षायिकं पूतं सम्यक्त्वं मुक्तिकारणम् ॥ (अमित. श्रा. २–५४)। १४. व्रजन्ति सप्ताद्यकलं यदा क्षयं तदाङ्गिनां क्षायिकमक्षयं मतम् ॥ (धर्मप. २०–७०)। १५. केवलज्ञानादिगुणास्पदनिजशुद्धात्मैवोपादेय इति रुचिरूपं निश्चयसम्यक्त्वं यत्पूर्वं तपश्चरणावस्थायां भावितं तस्य फलभूतं समस्तजीवादितत्त्वविषये विपरीताभिनिवेशरहितपरिणतिरूपं परमक्षायिकसम्यक्त्वं भण्यते। (बृ. द्रव्यसं. टी. १४)। १६. शुद्धात्मादिपदार्थविषये विपरीताभिनिवेशरहितः परिणामः क्षायिकसम्यक्त्वमिति भण्यते। (परमा. वृ. ६१)। १७. क्षयो मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च निर्मूलनाशः, क्षयः प्रयोजनमस्येति क्षायिकम्। तच्च साद्यनन्तम्। (योगशा. स्वो. विव. २–२)। १८. मिथ्यात्वस्याथ मिश्रस्य सम्यग्जाते परिक्षये। क्षायिकसंमुखीनस्य सम्यक्त्वान्त्यांशभोगिनः ॥ शुभभावस्य प्रक्षीणसप्तकस्य शरीरिणः। सम्यक्त्वं क्षायिकं नाम पञ्चमं जायते पुनः ॥ (त्रि. श. पु. च. १, ३, ६०६–७)। १९. सम्मत्त-मीस-मिच्छत्तकम्मक्खयओ भणंति तं खइयं। (प्रव. सारो. ९४४)। २०. तत्कर्मसप्तके क्षिप्ते पङ्कवत् स्फटिकेऽम्बुवत्। शुद्धेऽतिशुद्धं क्षेत्रज्ञे भाति क्षायिकमक्षयम् ॥ (अन. ध. २–५५)। २१. तेषामेव क्षयात् क्षायिकम्। (भ. आ. मूला. टी. ३१)। २२. अनन्तानुबन्धिकषायचतुष्टयक्षयानन्तरं मिथ्यात्व-मिश्र-सम्यक्त्वपुञ्जलक्षणे त्रिविधेऽपि दर्शनमोहनीयकर्मणि सर्वथाक्षीणे क्षायिकं सम्यक्त्वं भवति। (प्रव. सारो. वृ. ९४४, पृ. २८१); क्षायिकसम्यक्त्वमपि दर्शनमोहसप्तकक्षये। (प्रव. सारो. वृ. १२९१, पृ. ३७१)। २३. त्रिविधस्यापि दर्शनमोहनीयस्य क्षयेणात्यन्तोच्छेदेन निर्वृत्तं क्षायिकम्। (षडशी. मलय. वृ. १७, पृ. २१)। २४. मिथ्यात्वादिक्षयेण निर्वृत्तं क्षायिकम्। (धर्मसं. मलय. वृ. ८०१, पृ. २८७)। २५. दंसणमोहं ति हवे मिच्छं मिस्सत्त सम्मपयडित्ती। अणकोहादी एदा णिद्दिट्ठा सत्तपयडीओ ॥ सत्तण्हं ××× खयादु खइओ य। (भावत्रि. ८–९)। २६. एतासामेव सप्तप्रकृतीनां क्षयात् प्रकृति-स्थित्यनुभाग-प्रदेशैः कर्मत्वपरिणतपुद्गलस्कन्धस्य कर्मरूपत्वपरित्यागात् क्षायिकं सम्यक्त्वं भवति। (गो. जी. म. प्र. टी. २६)। २७. दृग्मोहक्षयसंभूतौ यच्छ्रद्धानमनुत्तरम्। भवेत्क्षायिकं नित्यं कर्मसंघातघातकम् ॥ (भावसं. वाम. ४१९)। २८. सप्तानां प्रकृतीनां तत्क्षयात् क्षायिकमुच्यते। आद्यौ केवलिमूले स्यान्नृत्वे तदनु सर्वतः ॥ (धर्मसं. श्रा. ४–६८)। २९. अनन्तानुबन्धिक्रोध-मान-माया-लोभ-सम्यक्त्व-मिथ्यात्व-सम्यक्प्रकृतिलक्षणसप्तप्रकृतिक्षयात् क्षायिकं सम्यक्त्वम्। (त. वृत्ति श्रुत. २–४)। ३०. सप्तप्रकृतीनां क्षयात् निरवशेषनाशात् क्षायिकं सम्यक्त्वम्। (कार्तिके. टी. ३०८)।

१ अनन्तानुबन्धी क्रोध, मान, माया और लोभ तथा सम्यक्त्व, मिथ्यात्व और सम्यग्मिथ्यात्व; इन सात प्रकृतियों के अत्यन्त क्षय से जो सम्यक्त्व प्रादुर्भूत होता है उसे क्षायिक सम्यक्त्व कहते हैं।

क्षायिक सम्यग्दृष्टि—१. ततः प्रशम-संवेगादि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मूत् जिनेन्द्रभक्तिप्रवर्धितविपुलभावनाविशेषसंभारो यत्र केवलिनः सन्ति भगवन्तस्तत्र मोहं क्षपयितुमारभते, निष्ठापकः पुनश्चतसृषु गतिषु भवति, स निराकृतमिथ्यात्वः क्षायिकसम्यग्दृष्टिरित्याख्यायते। (त. वा. ९–४५)। २. दंसण-चरणगुणघाइ चत्तारि अणंताणुबंधिपयडीओ मिच्छत्त-सम्मत्त-सम्मामिच्छत्तमिदि तिण्णि दंसणमोहणीयपयडीओ च, एदासिं सत्तण्हं निरवसेसक्खएण खइयसम्माइट्ठी उच्चइ। (धव. पु. १, पृ. १७१); दंसणमोहणीयस्स णिस्सेसविणासो खओ णाम। तम्हि उप्पण्णजीवपरिणामो लद्धी णाम, तीए लद्धीए खइयसम्माइट्ठी होदि। (धव. पु. ७, पृ. १०८)।

१ वेदकसम्यग्दृष्टि होकर प्रशम-संवेगादि से सहित होते हुए जिनेन्द्रभक्ति के प्रभाव से जिसकी भावनाओं का समुदाय वृद्धिगत हुआ है, ऐसा मनुष्य जहाँ केवली भगवान् विराजमान हैं वहाँ मोह (दर्शनमोहनीय) की क्षपणा को प्रारम्भ करता है, पर निष्ठापक (समापक) वह चारों गतियों में से किसी भी गति में हो सकता है। इस प्रकार वह मिथ्यात्व का निराकरण करके क्षायिक सम्यग्दृष्टि हो जाता है।

क्षायिकी दृष्टि—देखो क्षायिक सम्यक्त्व। क्षयो मिथ्यात्व-सम्यग्मिथ्यात्व-सम्यक्त्वानां तिसृणां दर्शनमोहप्रकृतीनामनन्तानुबन्धिक्रोध-मान- माया-लोभाख्यानां चतसृणां चारित्रमोहप्रकृतीनां चात्यन्तिको विश्लेषः, क्षयः प्रयोजनमस्या इति क्षायिकी। (अन. ध. स्वो. टी. २–११४)।

मिथ्यात्व, सम्यग्मिथ्यात्व और सम्यक्त्व इन तीन दर्शनमोहनीय प्रकृतियों तथा अनन्तानुबन्धी क्रोध, मान, माया और लोभ इन चार चारित्रमोहनीय प्रकृतियों के आत्यन्तिक विनाश का नाम क्षय है, जिस दृष्टि का प्रयोजन इस क्षय को उत्पन्न करना है, वह क्षायिकी दृष्टि कही जाती है।

क्षायिकी श्रेणी—देखो क्षपकश्रेणी। १. क्षायिकी तु श्रेणिरनन्तानुबन्धिनो मिथ्यात्व मिश्र-सम्यक्त्वानि अप्रत्याख्यान-प्रत्याख्यानावरणे नपुंसक-स्त्रीवेदौ हास्यादिषट्कं पुंवेदः संज्वलनाश्च। (त. भा, हरि. व सिद्ध. वृ. ९-१८)। २. अस्याश्चारोहकः अविरत-देश-प्रमत्ताप्रमत्त [त] विरतानामन्यतमो विशुद्धमानाध्यवसायः। (त. भा. सिद्ध. वृ. १८)।

अनन्तानुबन्धी, मिथ्यात्व, मिश्र, सम्यक्त्व, अप्रत्याख्यानावरण, प्रत्याख्यानावरण, नपुंसकवेद, स्त्रीवेद, हास्यादि छह, पुंवेद और संज्वलन; ये प्रकृतियां क्षायिकी श्रेणी हैं—इनके क्षयकी गुणस्थानपंक्ति क्षायिकी श्रेणी कही जाती है। इसका आरोहक अविरत, देशविरत, प्रमत्तविरत और अप्रमत्तविरत; इनमें कोई भी एक विशुद्धयमान अध्यवसाय (परिणाम) वाला हो सकता है।

क्षायोपशमिक अवधि—१. क्षायोपशमिकं तदावरणीयानाम्—अवधिज्ञानावरणीयानां कर्मणाम् उदीर्णानाम् उदयावलिकाप्राप्तानां क्षयेण प्रलयेन, अनुदीर्णानां चात्मनि व्यवस्थितानामुपशमेन उदयनिरोधेन अवधिज्ञानमुत्पद्यते इति सम्बन्धः। यत एवमतः कर्मोदयानुदयविषयम्। अथवा येन तदावरणीयानां कर्मणां उदीर्णानां क्षयेणानुदीर्णानामुपशमेनावधिज्ञानमुत्पद्यते तेन क्षायोपशमिकमित्युच्यत इति। (नन्दी. हरि. वृ. पृ. ३०)। २. यदा अवधिज्ञान-दर्शनावरणीयकर्मणां क्षयः परिशाटः संजातो भवत्युदितानामनुदितानां चोपशमः उदयविघातलक्षणः संवृत्तो भवति स उपशमस्ताभ्यां क्षयोपशमाभ्यां कारणभूताभ्यां य उदेति स क्षयोपशमनिमित्तः। (त. भा. सिद्ध. वृ. १–२१)। ३. क्षायोपशमिकं येन कारणेन तदावरणीयाणाम् अवधिज्ञानावरणीयानां कर्मणामुदीर्णानां क्षयेण, अनुदीर्णानाम् उदयावलिकामप्राप्तानामुपशमेन विपाकोदयविष्कम्भणलक्षणेनावधिज्ञानमुत्पद्यते, तेन कारणेन क्षायोपशमिकमित्युच्यते। (नन्दी. मलय. वृ. सू. ८, पृ. ७७)। ४. तथावधिज्ञानावरणीयस्य कर्मण उदयावलिकाप्रविष्टस्यांशस्य वेदनेन योऽपगमः स क्षयोऽनुदयावस्थस्य विपाकोदयाविष्कम्भणमुपशमः, क्षयश्चोपशमश्च क्षयोपशमौ, ताभ्यां निर्वृत्तः क्षायोपशमिकः। (प्रज्ञाप. मलय. वृ. ३३–३१७, पृ. ५३९)।

१ उदीर्ण—उदयावलि को प्राप्त—अवधिज्ञानावरण प्रकृतियों के क्षय से तथा अनुदीर्ण—आत्मा में अवस्थित—उक्त प्रकृतियों के उपशम—उदयनिरोध—से जो असंख्यात भेदरूप अवधिज्ञान उत्पन्न होता है, वह क्षायोपशमिक अवधिज्ञान कहलाता है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षायोपशमिक-अवधिज्ञानावरणीय — गुणपरिणामप्रत्ययाः क्षयोपशमनिर्वृत्ताः क्षायोपशमिकाः। (आव. हरि. वृ. नि. २५, पृ. २७)।

क्षयोपशम से रचित अवधिज्ञानावरणप्रकृतियां क्षायोपशमिक या गुणपरिणामप्रत्यय कहलाती हैं और वे मनुष्य व तिर्यंचों के होती हैं।

क्षायोपशमिक गुण—कर्मणां क्षयादुपशमाच्चोत्पन्नो गुणः क्षायोपशमिकः। (धव. पु. १, पृ. १६१)।

कर्मों के क्षय और उपशम (क्षयोपशम) से जो गुण उत्पन्न होता है उसे क्षयोपशमिक गुण कहते हैं

क्षायोपशमिकगुणयोग — ओहि-मणपज्जयादीहि जीवस्स जोगो खओवसमियगुणजोगो णाम। (धव. पु. १०, पृ. ४३३)।

अवधि और मनःपर्यय आदि गुणों के साथ जो जीव का सम्बन्ध होता है उसे क्षायोपशमिक सचित्तगुणयोग कहते हैं।

क्षायोपशमिक चारित्र—अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानद्वादशकषायोदयक्षयात् सदुपसमाच्च संज्वलनकषायचतुष्टयान्यतमदेशघातिस्पर्द्धकोदये नोकषायनवकस्य यथासम्भवोदये च निर्वृत्तिपरिणामः आत्मनः क्षायोपशमिकं चारित्रम्। (स. सि. २–५; त. वा. २, ५, ८)।

अनन्तानुबन्धी आदि बारह कषायों के उदयाभावी क्षय से, उन्हीं के सदवस्थारूप उपशम से तथा संज्वलनकषायचतुष्क में से किसी एक के देशघातिस्पर्द्धकों के उदय से और नौ नोकषायों में से यथासम्भव उदय होने पर जो विषय-कषायों से आत्मा में निवृत्ति परिणाम उत्पन्न होता है, उसे क्षायोपशमिक चारित्र कहते हैं।

क्षायोपशमिक ज्ञान—१. मतिज्ञानाद्यावरण-वीर्यान्तरायकर्मद्रव्याणामनुभागस्य सर्वघातिस्पर्द्धकानामुदयाभावः क्षयः, तेषामेवानुदयप्राप्तानां सदवस्था उपशमः, क्षयश्चासौ उपशमश्च क्षयोपशमः, तत्र भवानि तत्प्रयोजनानि वा क्षायोपशमिकानि। (गो. जी. म. प्र. व जी. प्र. टी. ३००)। २. क्षायोपशमिकं ज्ञानमक्षयात्कर्मणां सताम्। आत्मजातेश्च्युतेरेतद्बद्धं चाशुद्धमक्रमात्॥ (पंचाध्या. २-१२१); तत्रालापस्य यस्योच्चैर्यावदंशस्य कर्मणः। क्षायोपशमिकं नाम स्यादवस्थान्तरं स्वतः॥ (पंचाध्या. २–२९२)।

१ मतिज्ञानावरणादि और वीर्यान्तराय कर्म के सर्वघाती स्पर्द्धकों के उदयाभावी क्षय से तथा अनुदयप्राप्त उन्हीं के सदवस्थारूप उपशम से होने वाले मति आदि ज्ञानों को क्षायोपशमिक ज्ञान कहते हैं।

क्षायोपशमिक भाव—१. उभयात्मको मिश्रः। (स. सि. २–१); सर्वघातिस्पर्द्धकानामुदयक्षयात् तेषामेव सदुपशमाद्देशघातिस्पर्द्धकानामुदये क्षायोपशमिको भावो भवति। (स. सि. २–५)। २. सर्वघातिस्पर्द्धकानामुदयक्षयात्तेषामेव सदुपशमाद्देशघातिस्पर्द्धकानामुदये क्षायोपशमिको भावः।××× तत्र यदा सर्वघातिस्पर्द्धकस्योदयो भवति तदेषदप्यात्मगुणस्याभिव्यक्तिर्नास्ति, तस्मात्तदुदयस्याभावः क्षय इत्युच्यते, तस्यैव सर्वघातिस्पर्द्धकस्यानुदयप्राप्तस्य सदवस्था उपशम इत्युच्यते, अनुद्भूतस्ववीर्यवृत्तित्वात् आत्मसाद्भावितत्सर्वघातिस्पर्द्धकस्योदयक्षये देशघातिस्पर्द्धकस्य चोदये सति सर्वघात्यभावादुपलभ्यमानो भावः क्षायोपशमिक इत्युच्यते। (त. वा. २, ५, ३)। ३. कर्मण एव कस्यचिदंशस्य क्षयः, कस्यचिदुपशमः, ततश्च क्षयश्चोपशमश्च क्षयोपशमौ, ताभ्यां निर्वृत्तः क्षायोपशमिकः। (अनुयो. हरि. वृ. पृ. ३८)। ४. क्षयोपशमाभ्यां निवृत्तः क्षायोपशमिकः। (त. भा. हरि. वृ. २-१)। ५. कम्मोदए संते वि जं जीवगुणक्खंडमुवलंभदि सो खओवसमिओ भावो णाम। (धव. पु. ५; पृ. १८५); पडिबंधिकम्मोदए संते वि जो उवलब्भइ जीवगुणो सो खओवसमिओ उच्चइ। कुदो? सव्वघादणसत्तीए अभावो खओ उच्चदि, खओ चेव उवसमो खओवसमो, तम्हि जादो भावो खओवसमिओ। (धव. पु. ५, पृ. १९८); सम्मत्तस्स देशघादिफद्दयाण उदएण सह वट्टमाणो सम्मत्तपरिणामो खओवसमिओ। (धव. पु. ५, पृ. २००)। ६. तथा ज्ञानादिघातिनां पुद्गलानां क्षयोपशमौ—केचित् क्षपिताः केचिदुपशान्ता इति क्षयोपशमावुच्येते, ताभ्यां निर्वृत्तोऽध्यवसायः क्षायोपशमिकः। (त. भा. सिद्ध. वृ. १–५, पृ. ४८); क्षयोपशमाभ्यां निर्वृत्तो मिश्रः प्रजायते। (त. भा. सिद्ध. वृ. २-१)। ७. सर्वघातिस्पर्द्धकानामुदयक्षयात् तेषामेव सदुपशमात् तद्देशघातिस्पर्द्धकानामुदयात् क्षायोपशमिको

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भावः। (त. श्लो. २–५)। ८. कर्मणां फलदानसमर्थतयोद्भूतिरुदयः, अनुद्भूतिरुपशमः, उद्भूत्यनुद्भूती क्षयोपशमः, ××× क्षयोपशमेन युक्तः क्षायोपशमिकः। (पंचा. का. अमृत. वृ. ५६)। ९. कर्मणां च क्षयश्च उपशमश्च क्षयोपशमः, तत्र भवो भावो ×××। (सिद्धिवि. वृ. ४–१२, पृ. २७१, पं. १६)। १०. उदयो जीवस्स गुणो खओवसमिओ हवे भावो। (गो. क. ८१४)। ११. सर्वप्रकारेणात्मगुणप्रच्छादिकाः कर्मशक्तयः सर्वघातिस्पर्द्धकानि भण्यन्ते, विवक्षितैकदेशेनात्मगुणप्रच्छादिकाः शक्तयो देशघातिस्पर्द्धकानि भण्यन्ते, सर्वघातिस्पर्द्धकानामुदयाभाव एव क्षयस्तेषामेवास्तित्वमुपशम उच्यते, सर्वघात्युदयाभावलक्षणक्षयेण सहित उपशमः तेषामेकदेशघातिस्पर्द्धकानामुदयश्चेति समुदायेन क्षयोपशमो भण्यते। क्षयोपशमे भवः क्षायोपशमिको भावः। अथवा देशघातिस्पर्द्धकोदये सति जीव एकदेशेन ज्ञानादिगुणं लभते यत्र स क्षायोपशमिको भावः। (बृ. द्रव्यसंग्रह टी. ३४)। १२. तथा क्षयश्च अभावः, उदयावस्थस्य उपशमश्च विष्कम्भितोदयत्वम्, तदन्यस्य क्षयोपशमो, ताभ्यां निर्वृत्तः क्षायोपशमिकः। (उत्तरा. नि. शा. वृ. ४८, पृ. ३३)। १३. कर्मक्षयोपशमनिष्पन्नः शुभाशुभः सर्वः क्षायोपशमिकः। (आव. भा. मलय. वृ. १८९, पृ. ५७८); उदितकर्मांशस्य क्षयेण अनुदितस्योपशमेन निर्वृत्तः क्षायोपशमिकः। (आव. भा. मलय. वृ. २०२, पृ. ५९३)। १४. यो भावः सर्वतो घातिस्पर्द्धकानुदयोद्भवः। क्षायोपशमिको स स्यादुदयाद्देशघातिनाम्॥ (पंचाध्या. २–९६६)।

१ सर्वघाती स्पर्द्धकों का उदयक्षय (उदयाभाव), उन्हीं का सद्वस्थारूप उपशम और देशघाती स्पर्द्धकों का उदय होने पर जो भाव होता है उसे क्षायोपशमिक भाव कहते हैं। ५ प्रतिबन्धक कर्म के उदय के होने पर भी जो जीवगुण का अंश पाया जाता है उसे क्षायोपशमिक भाव कहते हैं।

क्षायोपशमिक सम्यक्त्व—१. अनन्तानुबन्धिकषायचतुष्टयस्य मिथ्यात्व-सम्यङ्मिथ्यात्वयोश्चोदयक्षयात् सदुपसमाच्च सम्यक्त्वस्य देशघातिस्पर्द्धकस्योदये तत्त्वार्थश्रद्धानं क्षायोपशमिकं सम्यक्त्वम्। (स. सि. २–५; त. वा. २, ५, ८)। २. जो उ उदिन्ने खीणे मिच्छे अणुदिन्नगम्मि उवसंते। सम्मीभावपरिणतो वेयंतो पोग्गले मीसो॥ जो चरमपोग्गले पुण वेदेती वेयगं तयं विंति। केसिं च अणादेसो वेयगदिट्ठी खओवसमो॥ (बृहत्क. १२९–३०)। ३. मिच्छत्तं जसुदिन्नं तं खीणं अणुइयं च उवसंतं। मोसीभावपरिणयं वेयिज्जंतं खओवसमं॥ (श्रा. प्र. ४४; धर्मसं. हरि. ७९७)। ४. सम्मत्तदेसघाइवेदयसम्मत्तुदएणुप्पण्णवेदयसम्मत्तं खओवसमियं। (धव. पु. १, पृ. १७२); सम्मत्तस्स देसघादिफद्दयाणमुदएण सह वट्टमाणो सम्मत्तपरिणामो खओवसमिओ। (धव. पु. ५, पृ. २००); वेदगसम्मत्तस्स दंसणमोहणीयावयवस्स देशघादिलक्खणस्स उदयादो उप्पण्णसम्मादिट्ठिभावो खओवसमिओ। (धव. पु. ५, पृ. २११)। ५. तासामेव कासांचिदुपशमात् अन्यासां च क्षयादुपजातं श्रद्धानं क्षायोपशमिकम्। (भ. आ. विजयो. टी. ३१)। ६. उदयाभावो जत्थ य पयडीणं ताण सव्वघादीणं। छण्णाण उवसमो वि य उदयो सम्मत्तपयडीए॥ खयउवसमं पबत्तं सम्मत्तं परमवीयरायेहिं। उवसमियपंकसरिसं णिच्चं कम्मक्खवणहेउं॥ (भावसं. दे. २६८–६९)। ७. अणउदयादो छण्हं सजाइरूवेण उदयमाणाणं। सम्मत्तकम्मउदए खयउवसमियं हवे सम्मं॥ (कार्तिके. ३०९)। ८. क्षीणोदयेषु मिथ्यात्व-मिश्रानन्तानुबन्धिषु। लब्धोदये च सम्यक्त्वे क्षायोपशमिकं भवेत्॥ (पंचसं. अमित. २९२, पृ. ३९)। ९. प्रशमे कर्मणां षण्णामुदयस्य क्षये सति। आदत्ते वेदकं वन्द्यं सम्यक्त्वोदये सति॥ (अमित. श्रा. २–५५)। १०. सम्मत्तदेसघादिस्सुदयादो वेदगं हवे सम्मं। (गो. जी. २५)। ११. क्षयो मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च उदितानां देशतो निर्मूलनाशः अनुदितानां चोपशमः, क्षयेण युक्त उपशमः क्षयोपशमः, स प्रयोजनमस्य क्षायोपशमिकम्। तच्च सत्कर्मवेदनाद्वेदकमप्युच्यते। (योगशा. स्वो. विव. २–२)। १२. तेषामेव च षण्णानुदयाभावलक्षणे क्षयेऽनुदयप्राप्तानां सन्मात्रावस्थितिलक्षणे चोपशमे तथा सम्यक्त्वदेशघातिस्पर्धकोदये सत्युत्पन्नं सम्यक्त्वं क्षायोपशमिकम्। (भ. आ. मूला. टी. ३१)। १३. मिच्छत्तखओवसमा खाओवसमं ववइसंति। (प्रव. सारो. ९४४)। १४. मिथ्यात्वस्य मिथ्यात्वमोहनीयकर्मणः उदीर्णस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चोपशमात् सम्यक्त्वरूपतापत्तिलक्षणाद्विष्कम्भितोदयस्वरूपाच्च क्षायोपशमिकं सम्यक्त्वं व्यपदिशन्ति कथयन्ति। (प्रव. सारो. वृ. ९४४); सम्यक्त्वमपि क्षायोपशमिकं दर्शनसप्तकक्षयोपशमे। (प्रव. सारो. वृ. १२९२)। १५. तत्र उदीर्णस्य मिथ्यात्वस्य क्षयेणानुदीर्णस्य चोपशमेन सम्यक्त्वरूपतापत्तिलक्षणेन विष्कम्भितोदयस्वरूपेण च यन्निर्वृत्तं क्षायोपशमिकम्। (षडशी. मलय. वृ. १७, पृ. २१)। १६. दर्शनमोहनीयभेदस्य सम्यक्त्वप्रकृतेः सर्वघातिस्पर्द्धकानामुदयाभावलक्षणे क्षये तेषामेव सदवस्थालक्षणे उपशमे च उदयनिषेकदेशघातिस्पर्द्धकस्योदयात् क्षायोपशमिकं सम्यक्त्वं तत्त्वार्थश्रद्धानं भवेत्। (गो. जी. म. प्र. टी. २५)। १७. सर्वघ्नस्पर्धकानां यः पाकाभावात्मकः क्षयः। सत्तात्मोपशमो यत्र क्षायोपशमिकं हि तत्॥ उदितास्ते क्षयं याताः स्पर्धकाः सर्वघातकाः। शेषाः प्रशमिताः सन्ति क्षायोपशमिकं ततः॥ (भावसं. वाम. ३९८–९९)। १८. अनन्तानुबन्धिचतुष्क-मिथ्यात्व-सम्यङ्मिथ्यात्वानां षण्णामुदयक्षयात् सद्रूपोशमात् सम्यक्त्वनाम-मिथ्यात्वस्य देशघातिनः, न तु सर्वघातिनः, उदयात् मिश्रं सम्यक्त्वं भवति, क्षायोपशमिकं सम्यक्त्वं स्यात्, तद्वेदकमित्युच्यते। (त. वृत्ति श्रुत. २–५)। १९. षण्णामनुदयादेकसम्यक्त्वस्योदयाच्च यत्। क्षायोपशमिकं नाम सम्यक्त्वं तन्निगद्यते॥ (धर्मसं. श्रा. ४–६७)।

१ अनन्तानुबन्धी चार, मिथ्यात्व और सम्यग्मिथ्यात्व इन छह प्रकृतियों के उदयक्षय और उन्हीं के सदवस्थारूप उपशम से तथा सम्यक्त्वप्रकृति के देशघाती स्पर्धकों के उदय से उत्पन्न होने वाले तत्त्वार्थश्रद्धान को क्षायोपशमिक सम्यक्त्व कहते हैं।

क्षायोपशमिक संयम—पत्तोदयएक्कारसचारित्तमोहणीयपयडिदेसघादिफद्दयाणमुवसमसण्णा, निरवसेसेण चारित्तघायणसत्तीए तत्थुवसमुवलंभा। तेसिं चेव सव्वघादिफद्दयाणं खयसण्णा, णट्ठोदयभावत्तादो। तेहि दोहिम्हि उप्पण्णो संजमो खओवसमिओ। अथवा एक्कारसकम्माणमुदयस्सेव खओवसमसण्णा। कुदो? चारित्तघायणसत्तीए अभावस्सेव तव्ववएसादो। तेण उप्पण्ण इति खओवसमिओ पमादाणुविद्धसंजमो। (धव. पु. ५, पृ. २२०, २२१)।

उदय को प्राप्त चार संज्वलन और सात नोकषायों (हास्य, रति, अरति व शोक में से यथासम्भव दो से रहित) के देशघाती स्पर्धकों की उपशम संज्ञा है, क्योंकि उनकी चारित्र के घातने की शक्ति का उपशम पाया जाता है तथा उदय के विनष्ट हो जाने से उन्हीं के सर्वघाती स्पर्धकों की क्षय संज्ञा है। इन दोनों के आश्रय से उत्पन्न होने वाले संयम को क्षायोपशमिक संयम कहा जाता है। अथवा उक्त ग्यारह प्रकृतियों के उदय का नाम ही क्षयोशम है, कारण कि चारित्रविघातक शक्ति के अभाव की क्षयोपशम संज्ञा सम्भव है। उससे उत्पन्न प्रमादसंगत संयम को क्षायोपशमिक कहा जाता है।

क्षायोपशमिक संयमासंयम—अनन्तानुबन्ध्यप्रत्याख्यानकषायाष्टकोदयक्षयात् सदुपशमाच्च प्रत्याख्यानकषायोदये संज्वलनकषायदेशघातिस्पर्धकोदये नोकषायनवकस्य यथासम्भवोदये च विरताविरतपरिणामः क्षायोपशमिकः संयमासंयम इत्याख्यायते। (स. सि. २–५; त. वा. २, ५, ८)।

अनन्तानुबन्धी चार और अप्रत्याख्यान चार इन आठ कषायों के उदयक्षय और सदवस्थारूप उपशम के साथ प्रत्याख्यान के उदय, संज्वलन कषाय के देशघातिस्पर्धकों के उदय तथा नोकषायों का यथासम्भव उदय होने पर जो विरताविरतपरिणाम उत्पन्न होता है उसे क्षायोपशमिक संयमासंयम कहते हैं।

क्षायोपशमिकी लब्धि—प्रागुपात्तकर्मपटलानुभागस्पर्द्धकानां शुद्धियोगेन प्रतिसमयानन्तगुणहीनानामुदीरणा क्षायोपशमिकी लब्धिः। (पंचसं. अमित. पृ. ३६; अन. ध. स्वो. टी. २–४६)।

पूर्वसंचित कर्मपटल के अनुभागस्पर्द्धकों की जो शुद्धि के योग से प्रतिसमय अनन्तगुणे हीन होते हुए उदीरणा होती है उसका नाम क्षायोपशमिकी लब्धि है।

क्षारतंत्र चिकित्सादोष—क्षारतंत्रं क्षारद्रव्यं दुष्टव्रणादिशोधनकरम्। ××× एवमष्टप्रकारेण चिकित्साशास्त्रेणोपकारं कृत्वाहारादिक गृह्णाति तदानीं तस्याष्टप्रकारचिकित्सादोषो भवत्येव, सावद्यादिदोषदर्शनादिति। (मूला. वृ. ६–३३)।

क्षार द्रव्य घावों को शुद्ध करने वाला है। कौमार आदि आठ प्रकार के चिकित्साशास्त्रों में से प्रकृत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षारतंत्र से उपकार करके दातार के यहाँ आहार ग्रहण करने पर साधु क्षारतंत्र चिकित्सादोष का भागी होता है।

क्षितिशयन व्रत—१.फासुयभूमिपएसे अप्पमसंथारिदम्हि पच्छण्णे। दंडं धणुव्व सेज्जं खिदिसयणं एयपासेण ॥ (मूला. १–३२)। २. प्रासुकभूमिप्रदेशे चारित्राविरोधेनाल्पसंस्तरितेऽसंस्तरिते आत्मप्रमाणेनात्मनैव वा संस्तरिते प्रच्छन्ने दण्डेन धनुषा एकपार्श्वेन मुनेर्या शय्या शयनं तत् क्षितिशयनव्रतमित्यर्थः। (मूला वृ. १–३२)।

१ स्वल्प संस्तर से भी रहित और प्रच्छन्न—स्त्री व पशु आदि से विहीन—ऐसे प्रासुक (जीवजन्तु से शून्य) भूमिप्रदेश में दण्ड (सीधे) अथवा धनुष के समान एक पार्श्व से शयन करने को क्षितिशयन व्रत कहते हैं।

क्षिप्र प्रत्यय—१. क्षिप्रग्रहणमचिरप्रतिपत्त्यर्थम्। (स. सि. १–१६)। २. क्षिप्रग्रहणमचिरप्रतिपत्त्यर्थम्। अचिरप्रतिपत्तिः कथं स्यात् इति क्षिप्रग्रहणं क्रियते। (त. वा. १, १६, १०)। ३. क्षिप्रवृत्तिः प्रत्ययः क्षिप्रः। (धव. पु. ९, पृ. १५२); आश्वर्थग्राही क्षिप्रप्रत्ययः। (धव. पु. १३, पृ. २३७)। ४. क्षिप्रं च झटिति (ग्रहणम्)। (सिद्धिवि. वृ. १, २७, पृ. ११६)। ५. आशुग्रहणं क्षिप्रावग्रहः। (मूला. वृ. १२–१८७)। ६. आश्वर्थस्य ग्रहः क्षिप्रम् ××× । (आचा. सा. ४–१९)।

१ पदार्थ के शीघ्रता से ग्रहण करने को क्षिप्र प्रत्यय या क्षिप्रावग्रह कहते हैं।

क्षीणकषाय—१. णिस्सेसखीणमोहो फलिहामलभायणुदयसमचित्तो। खीणकसाओ भण्णदि णिग्गंथो वीयरायेहिं ॥ (प्रा. पंचसं. १–२५; धव. पु. १, पृ. १९० उद्.; गो. जी. ६२)। २. सर्वस्य मोहस्य ××× क्षपणात् ××× क्षीणकषाय इति व्यपदेशमर्हति। (त. वा. ९, १, २२)। ३. क्षीणाः कषाया येषां ते क्षीणकषायाः। द्रव्यकर्मणां कषायवेदनीयानां विनाशात्तन्मूला अपि भावकषायाः प्रलयमुपगता इति क्षीणकषाया इति भण्यन्ते। (भ. आ. विजयो. २७)। ४. णिस्सेसमोहखीणे खीणकषायं तु णाम गुणठाणं। पावइ जीवो णूणं खाइयभावेण संजुत्तो ॥ जह सुद्धफलियभायणि खित्तं णीरं खु णिम्मलं सुद्धं। तह णिम्मलपरिणामो खीणकसाओ मुणेयव्वो ॥ (प्रा. भावसं. ६६१–६२)। ५. भवेत् क्षीणकषायोऽपि मोहस्यात्यन्तसंक्षयात्। (त. सा. २–२८)। ६. उपशमश्रेणिविलक्षणेन क्षपकश्रेणिमार्गेण निष्कषायशुद्धात्मभावनाबलेन क्षीणकषायाः द्वादशगुणस्थानवर्तिनो भवन्ति। (बृ. द्रव्यसं. टी. १३)। ७. क्षीणा अभावमापन्नाः कषायाः यस्य स क्षीणकषायः। (कर्मस्त. गो. वृ. २, पृ. ५)। ८. सूक्ष्मसाम्परायक्षपकचरमसमये चारित्रमोहस्य प्रकृतिस्थित्यनुभागप्रदेशानां बन्धोदयोदीरणासत्त्वेषु व्युच्छिन्नेषु तदनन्तरोत्तरसमये निःशेषक्षीणमोहनिरवशेषविनष्टचारित्रमोहः सन् स्फटिकामलभाजनोदकसमचित्तो जीवः, अतिनिर्मलस्फटिकघटसंभृतेन निर्मलजलेन सदृशं चित्तं भावमनो विशुद्धिपरिणामो यस्यासौ स्फटिकामलभाजनोदकसमचित्तः, यथा तज्जलं संक्षोभैः प्रकारैः कलुषितं न भवति तथा यथाख्यातचारित्रपवित्रक्षीणकषायविशुद्धिपरिणामोऽपि कुतश्चिदपि कारणात् कलुषितो न भवति, स वीतरागैः क्षीणकषाय इति भणितः। (गो. जी. म. प्र. टी. ६२)। ९. निश्शेषक्षीणाः प्रकृति-स्थित्यनुभाग-प्रदेशरहिता मोहप्रकृतयो यस्यासौ निश्शेषक्षीणमोह इति निरवशेषमोहप्रकृतिसत्त्वरहितः क्षीणकषायः। (गो. जी. जी. प्र. टी. ६२)।

१ जिसका सब मोह (कषायें) क्षय को प्राप्त हो चुका है, अतएव जो स्फटिकमणिमय पात्र में स्थित जल के समान निर्मल मन की परिणति से सहित हुआ है उसे क्षीणकषाय कहते हैं।

क्षीणमोह—देखो क्षीणकषाय। १. जिदमोहस्स दु जइया खीणो मोहो हविज्ज साहुस्स। तइया हु खीणमोहो भण्णदि सो णिच्छयविदूहिं ॥ (समयप्रा. ३८)। २. तदेवाम्भो यथान्यत्र पात्रे न्यस्तं मलं विना। प्रसन्नं मोहने क्षीणे क्षीणमोहस्तथा यतिः ॥ (पंचसं. अमित. १–४८)। ३. मोहस्य तु क्षये जाते क्षीणमोहं प्रचक्षते। (योगशा. स्वो. विव. १–१६, पृ. ११२)।

१ मोह के विजेता साधु का मोह जब जब सर्वथा क्षय को प्राप्त हो जाता है, तब उसे क्षीणमोह कहा जाता है।

क्षीरधात्री उत्पादनदोष—क्षीरं धारयति दधाति या सा क्षीरधात्री स्तनपायिनी। ××× येन क्षीरं भवति येन च विधानेन बालाय क्षीरं दीयते

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदुपदिशति यस्मै दात्रे स भक्तः दाता दानाय प्रवर्तते। तद्दानं यदि गृह्णाति तदा तस्य क्षीरधात्री नामोत्पादनदोषः। (मूला. वृ. ६–२८)।

जिस विधि से उसकी मां के दूध में वृद्धि होती है तथा बालक को जिस प्रकार से दूध पिलाना चाहिए, इत्यादि प्रकार का गृहस्थ को उपदेश देकर उसके यहां आहार ग्रहण करने पर क्षीरधात्री नाम का उत्पादन दोष होता है।

क्षीरस्रवी (खीरासवी) — १. करयलणिक्खित्ताणि रुक्खाहारादियाणि तक्कालं। पावंति खीरभावं जीए खीरोसवी रिद्धी॥ अहवा दुक्खप्पहुडी जीए मुणिवयणसवणमेत्तेणं। पसमदि णर-तिरियाणं स च्चिय खीरोसवी रिद्धी॥ (ति. प. ४, १०८०–८१)। २. विरसमप्यशनं येषां पाणिपुटनिक्षिप्तं क्षीररसगुणपरिणामि जायते, येषां वा वचनानि क्षीरवत् क्षीणानां सन्तर्पकाणि भवन्ति ते क्षीरास्रविणः। (त. वा. ३, ३६, ३, पृ. २०४; चा. सा. पृ. १००)। ३. खीरं दुद्धं, सविसादो खीरस्स सवी खीरसवी, पाणि-पत्तणिवदिदासेसाहाराणं खीरसादुप्पायणसत्ती वि कारणे कज्जुवयारादो खीरसवी णाम। (धव. पु. ९, पृ. ९९)। ४. तस्य क्षीरास्रवित्वं शृण्वतस्तदीयवचनं क्षीरमिव स्वदते। (त. भा. सिद्ध. वृ. १०–७, पृ. ३१७)। ५. क्षीरवन्मधुरत्वेन श्रोतृणां कर्ण-मनःसुखकरं वचनमास्रवन्ति क्षरन्ति ये ते क्षीराश्रवाः। (औपपा. अभय. वृ. १५, पृ. २८)। ६. क्षीरं दुग्धं श्रोतृजनकर्णपूरेषु आश्रवति क्षरति भाषमाणो यस्यां लब्धौ सा क्षीराश्रवा, क्षीरमिव वचनमासमन्तात् श्रवन्तीति क्षीराश्रवाः इति व्युत्पत्तेः। (ध. वि. मु. वृ. ५-२९)। ७. येषां पात्रपतितं कदन्नमपि क्षीररसवीर्यविपाकं जायते, वचनं वा शरीर-मानसदुःखप्राप्तानां देहिनां क्षीरवत् सन्तर्पकं भवति ते क्षीरास्राविणः। (योगशा. स्वो. विव. १–८, पृ. ३९)। ८. यद्वचनमाकर्ण्यमानं मनःशरीरसुखोत्पादनाय प्रभवति ते क्षीराश्रवाः, क्षीरमिव वचनमासमन्तात् श्रवन्तीति क्षीराश्रवाः इति व्युत्पत्तेः। (आव. नि. मलय. वृ. ७५)। ९. येषां पाणिपात्रगतं भोजनं नीरसमपि क्षीरपरिणामि भवति, वचनानि वा क्षीणवत् क्षीणसन्तर्पकाणि भवन्ति, ते क्षीरस्राविण उद्यन्ते। (त. वृत्ति श्रुत. ३–३६)।

१ जिस ऋद्धि के प्रभाव से हाथों में रखे हुए रूखे आहार आदि उसी समय दूध रूप परिणत हो जाते हैं, उसका नाम क्षीरस्रवी ऋद्धि है। अथवा जिसके प्रभाव से मुनि के वचनों के सुनते ही मनुष्यों और तिर्यंचों के दुःख आदि शान्त हो जाते हैं, वह भी क्षीरस्रवी ऋद्धि कहलाती है। ४ जिनके वचन श्रोताओं को दूध के स्वाद के समान सुखोत्पादक होते हैं वे क्षीराश्रवी—क्षीराश्रव स्रव) ऋद्धि के धारक—कहे जाते हैं।

क्षीराश्रव—देखो क्षीरस्रवी।

क्षीरास्रवी—देखो क्षीरस्रवी।

क्षीरास्रावी—देखो क्षीरस्रवी।

क्षुत्, क्षुधा—१. निवृत्तसर्वसंस्कारविशेषस्य शरीरमात्रोपकरणसन्तुष्टस्य तपःसंयमविलोपं परिहरतः कृत - कारितानुमतसंकल्पितोद्दिष्टसंक्लिष्टक्रयागतप्रत्यात्तपूर्वकर्म-पश्चात्कर्मदशविधदोषविप्रमुक्तैषणस्य देश-काल-जनपदव्यवस्थापेक्षस्य अनशनाद्यवरोगतपःस्वाध्याय-श्रम - वेलातिक्रमावमौदर्यासद्वेद्योदयादिभ्यः नानाहारेन्धनोपरमे जठराग्निदाहिनी मारुतालोलिताग्निशिखेव समन्ताच्छरीरेन्द्रिय-हृदयसंक्षोभकरी क्षुदुत्पद्यते। (त. वा. ९, ९, २; चा. सा. पृ. ४८)। २. असातावेदनीयतीव्र-मन्दक्लेशकरी क्षुधा। (नि. सा. टी. ६)।

२ असातावेदनीय के तीव्र या मन्द उदय से जो तीव्र या मन्द संक्लेश को उत्पन्न करती है उसे क्षुधा (भूख की वेदना) कहा जाता है।

क्षुद्विजय—१. भिक्षोर्निरवद्याहारगवेषिणस्तदलाभे ईषल्लाभे च अनिवृत्तवेदनस्याकाले अदेशे च भिक्षां प्रति निवृत्तेच्छस्यावश्यकपरिहाणि मनागप्यसहमानस्य स्वाध्याय-ध्यानभावनापरस्य बहुकृत्वः स्वकृत-परकृतानशनावमोदर्यस्य नीरसाहारस्य तप्तभ्राष्ट्रपतितजलबिन्दुकतिपयवत्सहसा परिशुष्कपानस्योदीर्णक्षुद्वेदनस्यापि सतो भिक्षालाभादलाभमधिकगुणं मन्यमानस्य क्षुद्बाधां प्रत्यचिन्तनं क्षुद्विजयः। (स. सि. ९, ९)। २. प्रकृष्टक्षुदग्निप्रज्वलने घृतस्म्भसोपशमः क्षुज्जयः। × × × तस्याः (क्षुधः) प्रतिकारं त्रिप्रकारम् अकाले संयमविरोधिभिर्वा द्रव्यैः स्वयम-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुर्वतोऽन्येन क्रियमाणमसेवमानस्य मनसा चानभिसन्दधतः दुस्तरेयं वेदना महांश्च कालो दीर्घाह इति दीर्घाह इति (चा. सा.—दीर्घमह इति) विषादमनापद्यमानस्य त्वगस्थि-सिरावतान (चा. सा.—वितान) मात्रकलेवरस्यापि सतः आवश्यकक्रियादिषु नित्योद्यतस्य क्षुद्वशप्राप्तानर्थकाराबन्धनस्थ (चा. सा—नर्थाऽचारकबंधस्थ) मनुष्यान् पञ्जरगततिर्यक्प्राणिनः क्षुदभ्यर्दितान् परतन्त्रानपेक्षमाणस्य ज्ञानिनो धृत्यम्भसा संयमकुम्भधारितेन क्षुदग्निं शमयतः तत्कृतपीडां प्रत्ययवगणयन् (चा. सा.—प्रत्यविगणनं) क्षुज्जय इत्युच्यते। (त. वा. ९, ९, २; चा. सा. पृ. ४८, ४९)। ३. तत्र क्षुत्परीषहः क्षुद्वेदनादिनाऽऽगमावहितेन चेतसा स[श]मयतोऽनेषणीयं परिहरतः क्षुत्परीषहजयो भवति। (त. भा. हरि. वृ. ९-९)। ४. क्षुद्वेदनामुदिताशेषवेदनातिशायिनीं सम्यग्विषहमाणस्य जठरान्त्रविदाहिनीमागमविहितेनान्धसा (सिद्ध. वृ.—विधिना) शमयतो ऽनेषणीयं च परिहरतः क्षुत्परिषहजयः भवति। (आव. हरि. वृ. ४, पृ. ६५७; त. भा. सि. वृत्ति ९-९)। ५. क्षुधार्तः शक्तिमान् साधुरेषणां नातिलङ्घयेत्। यात्रामात्रोद्यतो विद्वानदीनोऽविप्लवश्चरेत्॥ (आव. नि. हरि. वृ. ९१८, पृ. ४०३ उद्.)। ६. प्रकृष्टक्षुदग्निप्रज्वलने धृत्यम्भसोपशमः क्षुज्जयः। (त. श्लो. ९–९)। ७. क्षुत्चारित्रमोहनीय-वीर्यान्तरापेक्षयाऽसातावेदनीयोदयादशनाभिलाषः। ××× एतैः परीषहैर्व्रताद्यभंगेऽपि संक्लेशकरणं भावविचिकित्सा। ××× क्षुत्परीषहक्षमणं ×××। ततः परीषहजयो भवति, ततश्च भावविचिकित्सादर्शनमलं निराकृतं भवतीति। (मूला. वृ. ५, ५७–५८)। ८. क्षुत्तीक्ष्णानशनादिजाक्षनिकरं स्वज्ञेयवीक्षाक्षमं स्वान्तं भ्रान्ततरं करोति बलवत्प्राणान् प्रयाणोन्मुखान्। या ऽन्यादीनजने ऽफलाऽतिसफला त्यागात्तपःपुष्टये तस्या धृत्यमृताशनेन शमनं कुर्वन् व्रती क्षुज्जयः॥ (आचा. सा. ७–३)। ९. यो मुनिर्निरवद्याहारं मार्गयति, तस्याहारस्याप्राप्तौ स्तोकाहारप्राप्तौ वा अप्रणष्टवेदनोऽपि सन् अकालेऽयोग्यदेशे च भुक्तिं नेच्छति, षडावश्यकपरिहाणिमीषदपि न सहते, ज्ञान-ध्यानभावनापरो भवति, बहून् वारान् स्वयमेवानशनमवमौदर्यं च कृतवान् वर्तते, रसहीनभोजनं च विधत्ते, तेन च शीघ्रमेव परिशुष्यच्छरीरो भवति। किंवत्? तप्ताम्बरीषनिपतितकतिपयाम्बुबिन्दुवत्। समुद्भूतबुभुक्षावेदनोऽपि सहनशीलः सन् पुरुषो यो भिक्षालाभादलाभं बहुगुणं मन्यते, क्षुधाबाधां प्रति चिन्तां न कुरुते, तस्य क्षुत्परीषहविजयो वेदितव्यः। (त. वृत्ति श्रुत. ९–९)।

१ निर्दोष आहार का खोजने वाला जो साधु उसके सर्वथा प्राप्त न होने पर, अथवा थोड़ा सा प्राप्त होने पर, उससे भूख की वेदना के शान्त न होने पर भी अयोग्य समय और देश में भिक्षा प्राप्त करने की कभी इच्छा नहीं करता हुआ आवश्यकों की हानि को नहीं सहता है तथा स्वाध्याय और ध्यान में उद्यत रहता हुआ भिक्षालाभ की अपेक्षा उसके अलाभ को महत्त्व देता है वह क्षुधापरीषह का विजयी होता है। ४ जो साधु उदर और आंतों को सन्तप्त करने वाली भयानक क्षुधा की वेदना को भली भांति सहता हुआ आगमोक्त विधि से प्राप्त भोजन के द्वारा उसे शान्त करता है और अनेषणीय (सदोष भोजन) का परित्याग करता है, वह क्षुधापरीषहविजयी होता है।

क्षुरप्रमुद्रा—कनिष्ठिकामङ्गुष्ठेन संपीड्य शेषाङ्गुलीः प्रसारयेदिति क्षुरप्रमुद्रा। (निर्वाणक. ५, पृ. ३१)।

कनिष्ठा अंगुली को अंगूठे से दबाकर शेष अंगुलियों के फैलाने पर क्षुरप्रमुद्रा होती है।

क्षुल्लक—देखो उत्कृष्ट श्रावक। १. आद्यो विदधते [ति] क्षौरं प्रावृणोत्येकवाससम्। पञ्चभिक्षाशनं भुंक्ते पठते गुरुसन्निधौ॥ (भावसं. वाम. ५४४)। २. क्षुल्लकः कोमलाचारः शिखा-सूत्राङ्कितो भवेत्। एकवस्त्रं सकौपीनं वस्त्र-पिच्छ-कमण्डलुम्॥ भिक्षापात्रं च गृह्णीयात् कांस्यं यद्वाप्ययोमयम्। एषणादोषनिर्मुक्तं भिक्षाभोजनमेकशः॥ क्षौरं श्मश्रुशिरोलोम्नां शेषं पूर्ववदाचरेत्। अतीचारे समुत्पन्ने प्रायश्चित्तं समाचरेत्॥ यथानिर्दिष्टकाले स भोजनार्थं च पर्यटेत्। पात्रे भिक्षां समादाय पञ्चागारादिहालिवत्॥ तत्राप्यन्यतमे गेहे दृष्ट्वा प्रासुकमम्बुकम्। क्षणं चातिथिभागाय संप्रेक्ष्याध्वं च भोजयेत्॥ दैवात् पात्रं समासाद्य दद्याद्दानं गृहस्थवत्। तच्छेषं यत्स्वयं भुङ्क्ते नो चेत् कुर्यादुपोषितम्॥ (लाटीसं. ७–६–८)।

२ जो उद्दिष्टभोजन का त्यागी चोटी और यज्ञो-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पवीत का धारी हो; एक वस्त्र, एक लंगोटी, वस्त्र की पीछी, कमण्डलु और कांसे या लोहे का भिक्षा-पात्र रखता हो; तथा एक बार भोजन करता हो शिर और दाढ़ी के बालों को कैंची या उस्तरे से बनवाता हो; ऐसे प्रथमोत्कृष्ट (ग्यारहवीं प्रतिमा-धारी) श्रावकको क्षुल्लक कहते हैं।

क्षेत्र—१. क्षेत्रं निवासो वर्तमानकालविषयः। (स. सि. १–८); क्षेत्रं सस्याधिकरणम्। (स. सि. ७–२९; त. वा. ७, २९, १)। २. विषयवाची क्षेत्रशब्दः, यथा राजा जनपदक्षेत्रेऽवतिष्ठते, न च कृत्स्नं जनपदं स्पृशति। (त. वा. १, ८, १८)। ३. यत्रावगाहस्तत् क्षेत्रम्। (आव. नि. हरि. वृ. १३, पृ. १९ व २१)। ४. क्षेत्रमवगाहमात्रम्। (अनुयो. हरि. वृ. पृ. ३५)। ५. इह दव्वं चेव णिवासमित्त-पज्जायतो मतं खेत्तं। (धर्मसं. ३१)। ६. क्षियत्य-क्षैषीत् क्षेष्यत्यस्मिन् द्रव्यागमो भावागमो वेति त्रि-विधमपि शरीरं क्षेत्रम्, आधारे आधेयोपचाराद्वा। (धव. पु. ४, पृ. ६); क्षियन्ति निवसन्ति अस्मिन् जीवा इति कर्मणां क्षेत्रत्वसिद्धेः। ××× उक्तं च—खेत्तं खलु आगासं ×××। (धव. पु. ४, पृ. ७); षड्द्रव्याणि क्षियन्ति निवसन्ति यस्मिन् तत्क्षेत्रम्, षड्द्रव्यस्वरूपमित्यर्थः। (धव. पु. ९, पृ. २२१); विसिट्ठागासदेसो खेत्तं। (धव. पु. १४, पृ. ३६)। ७. क्षेत्रम् आकाशं दृश्यमानादृश्यमान-रूप्यरूपिद्रव्याधारः। (त. भा. सिद्ध. वृ. १–२६)। ८. ×××क्षेत्रं त्रिभुवनस्थितिः। (म. पु. १, १२३); क्षेत्रं त्रैलोक्यविन्यासः××× (म. पु. २–३९)। ९. वर्तमाननिवाससामान्यं क्षेत्रम्। (न्यायकु. ७६, पृ. ८०३)। १०. तत्र क्षेत्रं सस्यो-त्पत्तिभूमिः। (ध. बि. मु. वृ. ३–२७; योगशा. स्वो. विव. ३–९५)। ११. द्रव्यमेव सत् आकाशं निवासमात्रपर्यायतः — निवासमात्रपर्यायमाश्रित्य क्षेत्रमिति मतं सम्मतम्। तदुक्तम्—खेत्तं खलु आगा समिति। (धर्मसं. मलय. वृ. ३१)। १२. क्षेत्रं लोकालोकम्। (गो. जी. जी. प्र. टी. ३६६)। १३. क्षेत्रं निवासः, स तु वर्तमानकालविषयः। (त. वृत्ति श्रुत. १–८)। १४. क्षेत्रं धान्योत्पत्तिस्थानं क्षेत्रम्। (कार्तिके. टी. ३४०)।

१ वर्तमानकालीन निवास का नाम क्षेत्र है। अन्न के आधार को—उत्पत्तिस्थान को—भी क्षेत्र (खेत) कहा जाता है। ३ द्रव्यों का जहां अवगाह होता है उसे क्षेत्र कहा जाता है। ६ द्रव्यागम और भावागम का आधारभूत शरीर क्षेत्र कहलाता है। ७ दृश्यमान-अदृश्यमान रूपी-अरूपी द्रव्यों के आधार का नाम क्षेत्र है।

क्षेत्रकायोत्सर्ग— सावद्यक्षेत्रसेवनादागतदोषध्वंस-नाय कायोत्सर्गः, कायोत्सर्गपरिणतसेवितक्षेत्रं वा क्षेत्र-कायोत्सर्गः। (मूला. वृ. ७–१५१)।

सावद्य क्षेत्र के सेवन से आये हुए दोषों को दूर करने के लिए जो कायोत्सर्ग किया जाता है उसे क्षेत्रकायोत्सर्ग कहते हैं। अथवा, कायोत्सर्ग से परिणत जीव के द्वारा सेवित क्षेत्र को क्षेत्रकायो-त्सर्ग जानना चाहिए।

क्षेत्रकारक—क्षेत्रे भरतादौ यः कारको यस्मिन् वा क्षेत्रे कारको व्याख्यायते स क्षेत्रकारकः। (सूत्रकृ. नि. शी. वृ. १–४)।

भरतादिक क्षेत्रविशेष में जो करता है उसे, अथवा जिस क्षेत्र में कारक की व्याख्या की जाती है उस क्षेत्र को क्षेत्रकारक कहते हैं।

क्षेत्रकृतपरत्वापरत्व— क्षेत्रकृते (परत्वापरत्वे) एकदिक्कालावस्थितयोर्विप्रकृष्टः परो भवति सन्नि-कृष्टोऽपरः। (त. भा. ५–२२, पृ. ३५३)।

एक दिशा और एक काल में अवस्थित दो वस्तुओं में से दूरवर्ती को क्षेत्रकृत पर और समीपवर्ती को क्षेत्रकृत अपर कहा जाता है।

क्षेत्रचतुर्विंशति — क्षेत्रचतुर्विंशतिर्विवक्षया चतु-र्विंशतिः क्षेत्राणि भरतादीनि, क्षेत्रप्रदेशा वा चतु-र्विंशतिः क्षेत्रचतुर्विंशतिः, चतुर्विंशतिप्रदेशावगाढं वा द्रव्यं क्षेत्रचतुर्विंशतिः। (आव. भा. मलय. वृ. १९२, पृ. ५९०)।

भरतादि चौबीस क्षेत्रों को, अथवा चौबीस क्षेत्र-प्रदेशों को क्षेत्रचतुर्विंशति कहते हैं। अथवा चौबीस प्रदेशों की अवगाहनायुक्त द्रव्य को भी क्षेत्रचतुर्वि-शति कहते हैं।

क्षेत्रचरण— क्षेत्रचरणं यस्मिन् क्षेत्रे गच्छति भक्षयति वा, यस्मिन् वा क्षेत्रे चरणं व्यावर्ण्यते। (उत्तरा. चू. १५, पृ. २३९)।

जिस क्षेत्र में जाता है या खाता है अथवा जिस क्षेत्र में चरण (चारित्र) का व्याख्यान किया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जाता है, उस क्षेत्र को द्रव्यनिक्षेप से क्षेत्रचरण कहते हैं।

क्षेत्रचार—क्षेत्रं पुनर्यस्मिन् क्षेत्रे चारः क्रियते यावद्वा क्षेत्रं चर्यते स क्षेत्राचारः। (आचारा. नि. शी. वृ. २४६, पृ. १८३)।

जिस क्षेत्र में चार (गमन) किया जाता है, अथवा जितना क्षेत्र गतिका विषय बनाया जाता है, वह क्षेत्रचार कहलाता है।

क्षेत्रज्ञ— क्षेत्रं स्वस्वरूपं जानातीति क्षेत्रज्ञः। (धव. पु. १, पृ. १२०); षड्द्रव्याणि क्षियन्ति निवसन्ति यस्मिन् तत्क्षेत्रम् षड्द्रव्यस्वरूपमित्यर्थः, तज्जानातीति क्षेत्रज्ञः। अथवा प्रदेशज्ञः जीव इत्ययमस्यार्थः, क्षेत्रज्ञशब्दस्य कुशलशब्दवत् जहत्स्वार्थवृत्तित्वात्। (धव. पु. ९, पृ. २२१)।

जो आत्मस्वरूप को अथवा छह द्रव्य स्वरूप लोकक्षेत्र को जानता है वह क्षेत्रज्ञ कहलाता है।

क्षेत्रज्ञान—क्षेत्रज्ञानं किमिदं मायाबहुलमन्यथा वा ? तथा साधुभिरभावितं भावितं वा नगरादीति विमर्शनम्। (उत्तरा. नि. शा. वृ. ५८, पृ. ४०)।

क्या यह क्षेत्र मायाप्रचुर है अथवा उससे विहीन है, तथा क्या वह साधु जनों से अधिष्ठित नगरादि से रहित है या सहित है; इस प्रकार के विवेक का नाम क्षेत्रज्ञान है। यह आठ प्रकार की गणिसम्पदा के अन्तर्गत सातवीं प्रयोगमति सम्पदा के चार भेदों में तीसरा है।

क्षेत्रतः क्रमोत्तर—क्षेत्रतः (क्रमोत्तरं) एकप्रदेशावगाढात् द्विप्रदेशावगाढः, ततोऽपि त्रिप्रदेशावगाढः, एवं यावदवसानवर्त्यसंख्येयप्रदेशावगाढः। (उत्तरा. नि. वृ. १, पृ. ४)।

क्षेत्र की अपेक्षा एक प्रदेश अवगाढ़ क्षेत्र से दो प्रदेश अवगाढ़ क्षेत्र, उससे भी तीन प्रदेश अवगाढ़ क्षेत्र, इस प्रकार अन्तवर्ती असंख्यात प्रदेश अवगाढ़ क्षेत्र पर्यन्त यह सब क्षेत्रतः क्रमोत्तर कहलाता है।

क्षेत्रतः जीव—क्षेत्रतोऽसंख्येयप्रदेशावगाढः। (आव. नि. मलय. वृ. १२९, पृ. १३१)।

जो असंख्यात प्रदेशों को अवगाहित किये हुए है, वह क्षेत्रतः जीव कहालाता है।

क्षेत्रतः वर्गणा — क्षेत्रतः एकप्रदेशावगाढानां यावदसंख्येयप्रदेशावगाढानाम्। (आव. हरि. वृ. ३९, पृ. ३४)।

एक प्रदेश अवगाह वाले, दो प्रदेश अवगाह वाले, तीन प्रदेश अवगाहवाले, इस प्रकार असंख्यात प्रदेश अवगाह वाले परमाणुओं के समूह तक क्षेत्रवर्गणा कही जाती है।

क्षेत्रधर्म—१. जो तस्साय-सभावोऽमुत्तादी खेत्तधम्मो सो॥ (धर्मसं. ३१, पृ. २०)। २. यस्तस्य क्षेत्रस्यात्मस्वभावोऽमूर्तत्वादिकः स क्षेत्रधर्मः, धर्मः स्वभाव इत्यनयोरनर्थान्तरत्वात्। (धर्मसं. मलय. वृ. ३१)।

१ आकाशरूप क्षेत्र का जो आत्मस्वभाव—अमूर्तत्व आदि है—वह क्षेत्रधर्म कहलाता है।

क्षेत्रपरावर्त—देखो क्षेत्रपरिवर्तन। लोगागासपएसा जया मरंतेण एत्थ जीवेणं। पुट्ठा कमुक्कमेणं खेत्तपरट्टो भवे थूलो॥ जीवो जइया एगे खेत्तपयेसंमि अहिगए मरइ। पुणरवि तस्साणंतरि बीयपएसंमि जइ मरए॥ एवंतरतमजोगेण सव्वखेत्तंमि जइ मओ होइ। सुहुमो खेत्तपरट्टो अणुक्कमेणं नणु गणेज्जा॥ (प्रव. सारो. १०४४–४६)।

बादर और सूक्ष्म के भेद से क्षेत्रपरावर्त दो प्रकार का है। जीव जब लोकाकाश के किसी एक प्रदेश पर मरकर तत्पश्चात् वह क्रम से या अक्रम से भी लोकाकाश के समस्त प्रदेशों को अपने मरण से व्याप्त कर लेता है, तब उसका एक बादर क्षेत्रपरावर्त पूरा होता है। पर जब वह किसी एक लोकाकाश के प्रदेश को प्राप्त करके मरता है और तत्पश्चात् पुनः मरण को प्राप्त होकर जब वह उसके द्वितीय प्रदेश को अपने मरण से व्याप्त करता है (बीच में यदि वह अन्यत्र मरता है, तो वह गिनती में नहीं आता), इसी क्रम से वह यथाक्रम से उस लोक के तृतीय-चतुर्थ आदि प्रदेशों को अपने मरण से व्याप्त करता हुआ जब उसके समस्त ही प्रदेशों को मरण से व्याप्त कर लेता है तब उसका सूक्ष्म क्षेत्रपरावर्त पूरा होता है।

क्षेत्रपरिवर्तन—देखो क्षेत्रपरावर्त व परक्षेत्रसंसार। १. सव्वम्हि लोयखेत्ते कमसो तण्णत्थि जण्ण उप्पण्णं। उग्गाहणेण बहुसो परिभमिदो खेत्तसंसारे॥ (द्वादशानु. २६)। २. जत्थ ण जादो ण मदो हवेज्ज जीवो अणंतसो चेव। काले तीदम्मि इमो ण सो पदेसो जए अत्थि॥ (भ. आ. १७७५)। ३. सूक्ष्मनिगोदजीवोऽपर्याप्तकः सर्वजघन्यप्रदेश-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शरीरो लोकस्याष्टमध्यप्रदेशान् स्वशरीरमध्यप्रदेशान् कृत्वोत्पन्नः, क्षुद्रभवग्रहणं जीवित्वा मृतः, स एव पुनस्तेनैवावगाहेन द्विरुत्पन्नस्तथा त्रिस्तथा चतुरित्येवं यावद् घनांगुलस्यासंख्येयभागप्रमिताकाशप्रदेशास्तावत्कृत्वस्तत्रैव जनित्वा पुनरेकैकप्रदेशाधिकभावेन सर्वो लोकः आत्मनो जन्मक्षेत्रभावमुपनीतो भवति यावत्तावत् क्षेत्रपरिवर्तनम्। (स. सि. २–१०; भ. आ. विजयो. १७७५)। ४. सो कोऽवि णत्थि देसो लोयायासस्स णिरवसेसस्स। जत्थ ण सव्वो जीवो जादो मरिदो य बहुवारं॥ (कार्तिके. ६८)। ५. सूक्ष्मनिगोदजीवः अपर्याप्तकः सर्वजघन्यप्रदेशशरीरः लोकस्याष्टमध्यप्रदेशान् स्वशरीरमध्ये कृत्वा उत्पन्नः क्षुद्रभवग्रहणं जीवित्वा मृतः, स एव जीवः पुनस्तेनाऽवगाहेन द्वौ वारानुत्पन्नः, त्रीन् वारानुत्पन्नश्चतुर्वारानुत्पन्नः इत्येवं यावत् अङ्गुलस्य असंख्येयभागप्रमिताकाशप्रदेशास्तावतो वारान् तत्रैवोत्पद्य पुनः एकैकैकप्रदेशाधिकत्वेन सर्वलोकः निजजन्मक्षेत्रत्वमुपनीतो भवति यावत्तावत्क्षेत्रपरिवर्तनं कथ्यते। (त. वृत्ति श्रुत. २–१०)।

३ सर्वजघन्य अवगाहना वाला सूक्ष्म निगोदिया लब्ध्यपर्याप्तक जीव लोक के आठ मध्यप्रदेशों को अपने शरीर के मध्य में करके उत्पन्न हुआ और क्षुद्रभवग्रहण तक जीवित रहकर मरा। फिर वही उसी अवगाहना से घनांगुल के असंख्येय भाग प्रमाण जितने आकाशप्रदेश हैं उतने बार वहीं उत्पन्न होकर तत्पश्चात् एक-एक आकाशप्रदेश की अधिकता से जब समस्त लोक को अपना जन्मक्षेत्र कर लेता है तब उसका क्षेत्रपरिवर्तन पूरा होता है।

क्षेत्रपल्योपम—१. तथा क्षेत्रमित्याकाशम्, ततश्च प्रतिसमयमुभयथापि क्षेत्रप्रदेशापहारे क्षेत्रपल्योपमम्। (अनुयो. हरि. वृ. पृ. ८४)। २. क्षेत्रमाकाशप्रदेशरूपं तत्प्रधानं क्षेत्रपल्योपमम्। (संग्रहणी. दे. वृ. ४, पृ. ५)। ३. बायरसुहुमायासे खेत्तपएसाणुसमयमवहारे। बायरसुहुमं खेत्तं उस्सप्पिणीओ असंखेज्जा॥ (प्रव. सारो. १०२६)। ४. इयमत्र भावना—स एवोत्सेधाङ्गुलप्रमितयोजनप्रमाणविष्कम्भायामावगाढः पल्यः पूर्ववदेकाहोरात्रं यावत्सप्ताहोरात्रप्ररूढैर्बालाग्रैराकर्णं निचितो भ्रियते, ततस्तैर्बालाग्रैर्ये नभःप्रदेशाः स्पृष्टास्ते समये समये एकैकनभःप्रदेशप्रतिसमयापहारेण यावता कालेन सर्वात्मना निष्ठामुपयाति, तावान् कालविशेषो बादरं क्षेत्रपल्योपमम्। एतच्चासंख्येयोत्सर्पिण्यवसर्पिणीमानम्। ××× तथा स एव पूर्वोक्तः पल्यः पूर्ववदेकैकं बालाग्रमसंख्येयखण्डं कृत्वा तैराकर्णं भृतो निचितश्च तथा क्रियते यथा मनागपि न तत्राग्न्यादिकमाक्रामति, एवंभूते तस्मिन् पल्ये ये आकाशप्रदेशास्तैर्बालाग्रैः स्पृष्टा ये च न स्पृष्टास्ते सर्वेऽप्येकैकस्मिन् समये एकैकाकाशप्रदेशापहारेण समुद्ध्रियमाणा यावता कालेन सर्वात्मना निष्ठामुपयान्ति तावान् कालविशेषः सूक्ष्मं क्षेत्रपल्योपमम्। इदमप्यसंख्येयोत्सर्पिण्यवसर्पिणीमानमेव केवलं पूर्वस्मादसंख्येयगुणम्। (प्रव. सारो. वृ. १०२६, पृ. ३०४)।

१ क्षेत्र से अभिप्राय आगमोक्त विधि के अनुसार पल्य में भरे हुए बालाग्रों से स्पृष्ट आकाश का है। उसके उन प्रदेशों में से प्रत्येक समय में दोनों ओर से एक-एक प्रदेश के अपहृत करने पर जितने काल में वे सब समाप्त हों उतने कालविशेष को क्षेत्रपल्योपम कहा जाता है।

क्षेत्रपालमुद्रा—ऊर्ध्वशाखं वामपाणिं कृत्वाऽङ्गुष्ठेन कनिष्ठिकामाक्रमयेदिति क्षेत्रपालमुद्रा। (निर्वाणक. पृ. ३१)।

बायें हाथ की अंगुलियों को ऊपर फैलाकर अंगूठे से कनिष्ठा को दबाने पर जो मुद्रा बनाती है, उसे क्षेत्रपालमुद्रा कहते हैं।

क्षेत्रपुरुष—यो यस्मिन् सुराष्ट्रादौ क्षेत्रे भवः स क्षेत्रपुरुषो यथा सौराष्ट्रिक इति, यस्य वा यत् क्षेत्रमाश्रित्य पुंस्त्वं भवतीति। (सूत्रकृ. नि. शी. वृ. ५५, पृ. १०३)।

जो जिस सौराष्ट्र आदि क्षेत्र में उत्पन्न हुआ है उसे वहां का क्षेत्रपुरुष कहते हैं। जैसे—सौराष्ट्रिक। अथवा जिस क्षेत्र का आश्रय लेकर पुरुष के पुरुषत्व होता है उसे क्षेत्रपुरुष कहते हैं।

क्षेत्रपूजा—१. जिणजम्मण-णिक्खमणे णाणुप्पत्तीए तित्थचिण्हेसु। णिसिहीसु खेत्तपूजा पुव्वविहाणेण कायव्वा॥ (वसु. श्रा. ४५२)। २. जन्म-निःक्रमण-ज्ञानोत्पत्तिक्षेत्रे जिनेशिनाम्। निषिध्यास्वपि कर्तव्या क्षेत्रे पूजा यथाविधि॥ (गुण. श्रा. २२३)। ३. गर्भ-जन्म-तपो-ज्ञानलाभ-निर्वाणसम्भवे। क्षेत्रे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निषद्यकासु प्राग्विधिना क्षेत्रपूजनम् ।। (धर्मसं. श्रा. ९–९५)।

१ तीर्थंकरों के जन्म, दीक्षा, कैवल्यप्राप्ति और तीर्थ के चिह्नस्वरूप निषीधिका स्थानों में जो विधिपूर्वक पूजा की जाती है उसे क्षेत्रपुजा कहते हैं।

क्षेत्रप्रतिक्रमण—१. उदक-कर्दम-त्रस-स्थावरनिचितेषु क्षेत्रेषु गमनादिवर्जनं क्षेत्रप्रतिक्रमणम् । (भ. आ. विजयो. टी. ११६); त्रस-स्थावरबहुलस्य स्वाध्याय-ध्यानविघ्नसंपादनपरस्य वा परिहरणं क्षेत्रप्रतिक्रमणम् ।। (भ. आ. विजयो. टी. ४२१) । २. क्षेत्राश्रितातीचारान्निवर्तनं क्षेत्रप्रतिक्रमणम् । (मूला. वृ. ७–११५) ।

१ जल, कर्दम (कीचड़) तथा त्रस-स्थावर जीवों से व्याप्त क्षेत्रों में गमनागमन के परित्याग को क्षेत्रप्रतिकमण कहते हैं। अथवा स्वाध्याय व ध्यान में विघ्न उत्पन्न करने वाले प्रचुर त्रस-स्थावर जीवयुक्त क्षेत्र के परिहार को प्रतिक्रमण कहते हैं।

क्षेत्रप्रतिसेवना–१. वर्षासु क्रोशार्धगमनम्, अर्धयोजनं वा, ततोऽधिकक्षेत्रगमनं क्षेत्रप्रतिसेवना। अथवा प्रतिषिद्धक्षेत्रगमनं विरुद्धराज्यगमनं छिन्नाध्वगमनं ततो रक्षणीयागमनम्, तस्यार्द्धो यदातिक्रान्तः, उन्मार्गेण वा गमनम्, अन्तःपुरप्रवेशः, अननुज्ञातगृहभूमिगमनम्, इत्यादिना क्षेत्रप्रतिसेवा । (भ. आ. विजयो. ४५०) । २. खेत्तं वर्षासु साधूनां क्रोशं द्विक्रोशं वा गमनमिष्टम् । ततो ऽधिकक्षेत्रगमनं क्षेत्रप्रतिसेवना । अथवा निषिद्धक्षेत्रं विरुद्धराज्य-छिद्राद्युन्मार्गान्तःपुराननुज्ञातगृहभूमि - द्रोण्यादिगमनं क्षेत्रप्रतिसेवना । (भ. आ. मूला. ४५०) ।

१ वर्षा ऋतु में साधु के लिए आधा कोश अथवा आधा योजन जाने का विधान है, उससे अधिक जाना, यह क्षेत्रप्रतिसेवना है। अथवा निषिद्ध क्षेत्र में, विरुद्ध राज्य में, और त्रुटित मार्ग में गमन इत्यादि क्षेत्रप्रतिसेवना है।

क्षेत्रप्रत्याख्यान—अयोग्यानि वानिष्टप्रयोजनानि संयमहानिं संक्लेशं वा संपादयन्ति यानि क्षेत्राणि तानि त्यक्ष्यामि इति क्षेत्रप्रत्याख्यानम् । (भ. आ. विजयो. ११६) ।

अयोग्य व अनिष्ट प्रयोजन वाले तथा जो क्षेत्र संयमविनाश और संक्लेश को उत्पन्न करते हैं उनका मैं त्याग करूंगा, इस प्रकार के नियम का नाम क्षेत्रप्रत्याख्यान है।

क्षेत्रप्रमाण—अंगुलादिओगाहणाओ खेत्तपमाणं, 'प्रमीयन्ते अवगाह्यन्ते अनेन शेषद्रव्याणि' इति अस्य प्रमाणत्वसिद्धेः । (जयध. १, पृ. ३९) ।

अंगुल आदि अवगाहनाओं को क्षेत्रप्रमाण कहा जाता है।

क्षेत्रफल—१. समवट्टवासवग्गे दहगुणिदे करणिपरिधओ होदि । वित्थारतुरिमभागे परिधिहदे तस्स खेत्तफलं ।। (ति. प. १–११७) । २. वासो तिंगुणो परिही वासचउत्थाहदो दु खेत्तफलं । (त्रि. सा. १७) ।

१ विवक्षित क्षेत्र की परिधि को उसके विस्तार के चतुर्थ भाग से गुणित करने पर जो प्रमाण आता है उसे क्षेत्रफल कहते हैं। यह गोल क्षेत्र सम्बन्धी क्षेत्रफल के लाने का विधान है।

क्षेत्रमंगल—१. गुणपरिणदासणं परिणिक्कमणं केवलस्स णाणस्स । उप्पत्ती इयपहुदी बहुभेयं खेत्तमंगलयं ।। एदस्स उदाहरणं पावाणगरुज्जयन्तचंपादी । आहुट्ठहत्थपहुदी पणवीसब्भहियपणसयधणूणि ।। देहअवट्ठिदकेवलणाणावट्ठद्धगयणदेसो वा । सेढिघणमेत्तअप्पप्पदेसगयलोयपूरणापुण्णा ।। विस्साणं लोयाणं होदि पदेसा त्रि मंगलं खेत्तं । (ति. प. १, २१–२४) । २. तत्र क्षेत्रमङ्गलं गुणपरिपरिणतासन-परिनिष्क्रमण-केवलज्ञानोत्पत्ति- परिनिर्वाणक्षेत्रादिः । तस्योदाहरणं ऊर्ज्जयन्त-चम्पा-पावानगरादिः । अर्धाष्टारत्न्यादि-पञ्चविंशत्युत्तरपंचधनुशतप्रमाणशरीरस्थित-कैवल्याद्यवष्टब्धाकाशदेशा वा, लोकमात्रात्मप्रदेशैर्लोकपूरणापूरितविश्वलोकप्रदेशा वा । (धव. पु. १, पृ. २८–२९) ।

१ जिन स्थानों पर साधु जनों ने उत्तमोत्तम गुणों की प्राप्ति के कारणभूत वीरासनादि से स्थित होकर ध्यान किया है, जहाँ पर दीक्षा ग्रहण की है, केवलज्ञान और निर्वाण प्राप्त किया है, उन स्थानों को क्षेत्रमंगल कहते हैं। जैसे—पावानगर ऊर्जयन्त व चम्पापुर आदि। साढ़े तीन हाथ से लेकर पांच सौ पच्चीस धनुष तक के शरीर में स्थित और केवलज्ञान से व्याप्त आकाशप्रदेशों को भी क्षेत्रमंगल कहते हैं। तथा लोकपूरण समुद्घात दशा में केवली भगवान् के आत्मप्रदेशों से सर्वलोक के व्याप्त होने के कारण लोक के समस्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रदेशों को भी क्षेत्रमङ्गल कहते हैं।

क्षेत्रमास—यस्मिन् क्षेत्रे मासस्य वर्णना स मासक्षेत्रप्राधान्यविवक्षायां तत्क्षेत्रमास इत्यपि द्रष्टव्यम्। (व्यव. भा. मलय. वृ. २-१४, पृ. ६)।

जिस क्षेत्र में मास का वर्णन किया जावे उसे क्षेत्र प्रधानता की विवक्षा से क्षेत्रमास कहते हैं।

क्षेत्रलोक—१. आयासं सपदेसं उड्ढमहो तिरियलोगं च। खेत्तलोगं वियाणाहि अणंतजिणदेसिदं॥ (मूला. ७-४९; धव. पु. ४, पृ. ७ उद्.)। २. आगासस्स पएसा उड्ढं च अहे य तिरियलोए य। जाणाहि खित्तलोगं अणंतजिणदेसिअं सम्मं॥ (आव. भा. १९७, पृ. ४९५)। ३. क्षेत्रलोक आकाशमात्रमनन्तप्रदेशात्मकम्। (स्थानां. अभय. वृ. १, ५, पृ. १३)।

१ प्रदेशयुक्त आकाश तथा ऊर्ध्व, अधः और तिर्यक् लोक इस सब को क्षेत्रलोक समझना चाहिए।

क्षेत्रवर्गणा—एगागा[सपदे]सोग्गाहणपहुडि पदेसुत्तरादिकमेण जाव देसूणघणलोगे त्ति ताव एदाओ खेत्तवग्गणाओ। (धव. पु. १४, पृ. ५२)।

एक आकाशप्रदेश अवगाहना से ले कर प्रदेशाधिक क्रम से कुछ कम घनलोक तक जितने विकल्प हैं, ये सब क्षेत्रवर्गणाएं कहलाती हैं।

क्षेत्रविमोक्ष — क्षेत्रविमोक्षस्तु यस्मिन् क्षेत्रे चारकादिके व्यवस्थितो विमुच्यते, क्षेत्रदानाद्वा, यस्मिन् वा क्षेत्रे व्यावर्ण्यते स क्षेत्रविमोक्षः। (आचारा. नि. शी. वृ. १, ७, १. २५८, पृ. २३६)।

प्राणी चारक (कारागार) आदि जिस क्षेत्र में अवस्थित रहकर मुक्ति पाता है वह क्षेत्रविमोक्ष कहलाता है। अथवा क्षेत्र के दान से जिस क्षेत्र से छुटकारा पाता है वह क्षेत्रविमोक्ष है। अथवा जिस क्षेत्र में विमोक्ष का वर्णन किया जाता है उसे क्षेत्रविमोक्ष जानना चाहिए।

क्षेत्रवृद्धि—१. परिगृहीताया दिशो लोभावेशादाधिक्याभिसन्धिः क्षेत्रवृद्धिः, स एषोऽतिक्रमः प्रमादान्मोहाद् व्यासङ्गाद्वा भवतीत्यवसेयः। (स. सि. ७-३०)। २. अभिगृहीताया दिशो लोभावेशादाधिक्याभिसन्धिः क्षेत्रवृद्धिः। प्राग् दिशं योजनादिभिः परिच्छिद्य पुनर्लोभवशात्ततोऽधिकाकांक्षणं क्षेत्रवृद्धिरित्यध्यवसीयते। (त. वा. ७, ३०, ५)। ३. क्षेत्रवृद्धिश्चैकतो योजनशतमभिगृहीतमन्यतो दशयोजनानि। ततस्तस्यां दिशि समुत्पन्ने कार्ये योजनशतमध्यादपनीयान्येषां दशादियोजनानां तत्रैव स्वबुद्धया प्रक्षेपो वृद्धिकरणमिति। (श्रा. प्र. टी. २८३)। ४. अभिगृहीताया दिशो लोभावेशादाधिक्याभिसम्बन्धः क्षेत्रवृद्धिः। (त. श्लो. ७-३०)। ५. प्राग् दिशो योजनादिभिः परिच्छिद्य पुनर्लोभवशात्ततोऽधिकाकांक्षणं क्षेत्रवृद्धिः। (चा. सा. पृ. २८)। ६. तथा क्षेत्रस्य पूर्वादिदेशस्य दिग्व्रतविषयस्य ह्रस्वस्य सतो वृद्धिर्वर्द्धनं पश्चिमादिक्षेत्रान्तरपरिमाणप्रक्षेपेण दीर्घीकरणं क्षेत्रवृद्धिः। (ध. बि. मु. वृ. ३-२८; योगशा. स्वो. विव. ३-९७; सा. ध. ५-५)। ७. व्यासंग-मोह-प्रमादादिवशेन लोभावेशाद् योजनादिपरिच्छिन्नदिक्संख्याया अधिकाकांक्षणं क्षेत्रवृद्धिः। यथा मन्या[मान्य] खेटावस्थितेन केनचित् श्रावकेण क्षेत्रपरिमाणं कृतं यत् 'धारापुरीलङ्घनं मया न कर्तव्यम् इति', पश्चात् उज्जयिन्याम् अन्येन भाण्डेन महान् लाभो भवतीति तत्र गमनाकाङ्क्षा गमनं वा क्षेत्रवृद्धिः। दक्षिणापथागतस्य धारायाः उज्जयिनी पञ्चविंशतिगव्यूतिभिः किंचिन्न्यूनाधिकाभिः परतो वर्तते। (त. वृ. श्रुत. ७-३०; कार्तिके. टी. ३४१-४२)। ८. यथा सत्यमितः क्रोशः शतं यावद् गतिर्मम। क्रोशा मालवदेशीया क्षेत्रवृद्धिश्च दूषणम्॥ (लाटीसं. ६-१२०)।

१ ग्रहण किये गये दिशा के प्रमाण से लोभवश उससे अधिक का अभिप्राय रखना, इसका नाम क्षेत्रवृद्धि है। यह अतिक्रमण प्रमाद, मोह अथवा कार्यव्यासंग से होता है। ३ दिग्व्रत में किसी ने एक ओर सौ योजन प्रमाण और दूसरी ओर दस योजन प्रमाण जाने का नियम किया, पश्चात् जिस ओर दस योजन का नियम किया था उस ओर कार्यविशेष के उपस्थित होने पर सौ योजन प्रमाण क्षेत्र में से कुछ योजनों को कम करके स्वबुद्धि से उधर के क्षेत्र में उतने योजन बढ़ा लेना, यह उस दिग्व्रत में क्षेत्रवृद्धि नाम का अतिचार है।

क्षेत्रव्यतिरेक—अपि यश्चैको देशो यावदभिव्याप्य वर्तते क्षेत्रम्। तत्तत्क्षेत्रं नान्यद् भवति तदन्यच्च क्षेत्रव्यतिरेकः॥ (पंचाध्या. १-१४८)।

जो एक देश—काशी कौशल आदि—जितने क्षेत्र को व्याप्त करके स्थित है, वह उसका क्षेत्र है, अन्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नहीं है। उससे अन्य क्षेत्र क्षेत्रव्यतिरेक है।

क्षेत्रशुद्धि—१. व्याख्यातृव्यवस्थितप्रदेशाच्चतसृष्वपि दिक्ष्वष्टाविंशतिसहस्रायतासु विण्मूत्रास्थि-केश-नख-त्वगाद्यभावः षष्ठातीतवाचनातः आरात् पंचेन्द्रियशरीरार्द्रास्थि- त्वग् - मांसास्रक्सम्बन्धाभावश्च क्षेत्रशुद्धिः। (धव. भाग. ९, पृ. २५३)। २. एकान्ते निर्मले स्वास्थ्यकरे शीतादिवर्जिते। वन्दनां कुर्वतो देशे क्षेत्रशुद्धिश्च सा मता॥ (धर्मसं. श्रा. ७-४५)।

१ शास्त्रव्याख्याता जिस क्षेत्र में स्थित हो उसकी चारों दिशाओं में अट्ठाईस हजार (धनुष) लम्बे क्षेत्र में मल, मूत्र, हड्डी, बाल, नाखून और चमड़े आदि के अभाव को तथा छठी अतीत वाचना से निकटवर्ती क्षेत्र में पंचेन्द्रिय प्राणी के शरीर की गीली हड्डी, चमड़ा, मांस और रक्त के अभाव को भी क्षेत्रशुद्धि कहते हैं। यह शुद्धि शिष्याध्यापनरूप वाचना से सम्बद्ध है।

क्षेत्रसमवाय—१. जम्बूद्वीप-सर्वार्थसिद्धयप्रतिष्ठाननरक-नन्दीश्वरैकवापीनां तुल्ययोजनशतसहस्रविष्कम्भप्रमाणेन क्षेत्रसमवायनात् क्षेत्रसमवायः। (त. वा. १, २०, १२; धव. पु. ९, पृ. १९९)। २. खेत्तदो सीमंतणिरय-माणुसखेत्त-उडुविमाण-सिद्धिखेत्तं च समा। (धव. पु. १, पृ. १०१); सिद्धिमनुष्यक्षेत्रर्तु विमान-सीमन्तनरकाणां तुल्ययोजनपंचचत्वारिंशच्छतसहस्रविष्कम्भप्रमाणेन क्षेत्रसमवायः। (धव. पु. ९, १९९)। ३. सीमंत-माणुसखेत्त-उडुविमाण-सिद्धिखेत्ताणि चत्तारि वि सरिसाणि एसो खेत्तसमवाओ। (जयध. पु. १, पृ. १२४)। ४. क्षेत्राश्रयेण सीमान्तनरक-मनुष्यक्षेत्र-ऋत्विन्द्रकाणि सदृशानि, अवधिस्थाननरक-जम्बूद्वीप-सर्वार्थसिद्धिविमानानि सदृशानि, इत्यादिः क्षेत्रसमवायः। (गो. जी. म. प्र. टी. ३५६)। ५. क्षेत्राश्रयेण सीमन्तनरक - मनुष्यक्षेत्र - ऋत्विन्द्रक-सिद्धक्षेत्राणि प्रदेशतः सदृशानि, अवधिस्थाननरक-जम्बूद्वीप-सर्वार्थसिद्धिविमानानि सदृशानि, इत्यादिः क्षेत्रसमवायः। (गो. जी. जी. प्र. टी. ३५६)।

१ जम्बूद्वीप, सर्वार्थसिद्धि, अप्रतिष्ठाननरक और नन्दीश्वरद्वीपस्थ प्रत्येक वापी का समानरूप से एक लाख योजन प्रमाण विस्तार होने के कारण इसे क्षेत्रसमवाय कहा जाता है।

क्षेत्रसमाधि—क्षेत्रसाधिस्तु यस्य यस्मिन् क्षेत्रे व्यवस्थितस्य समाधिरुत्पद्यते, स क्षेत्रप्राधान्यात् क्षेत्रसमाधिः, यस्मिन् वा क्षत्रे समाधिर्व्यावर्ण्यते इति। (सूत्रकृ. नि. शी. वृ. १०५, पृ. १८७)।

जिस क्षेत्र में अवस्थित जिस किसी पुरुष के चित्त की एकाग्रतारूप समाधि उत्पन्न हो, उसे क्षेत्र की प्रधानता से क्षेत्रसमाधि कहते हैं। अथवा जिस क्षेत्र में समाधि का वर्णन किया जाता है उसे क्षेत्रसमाधि जानना चाहिए।

क्षेत्रसंयोग—से किं तं खित्तसंजोगे ?, २ भारहे एरवए हेमवए हेरण्णवए हरिवासए रम्मगवासए देवकुरुए पुव्वविदेहए अवरविदेहए, अहवा मागहे मालवए सोरट्ठए मरहट्ठए कुंकणए, से तं खेत्तसंजोगे। (अनुयो. सू. १३०, पृ. १४४)।

भरत व ऐरावत आदि क्षेत्रों में उत्पन्न हुए जीवों के उन क्षेत्रों के सम्बन्ध से जो भारत व ऐरावत आदि नाम प्रसिद्ध होते हैं उन्हें क्षेत्र के संयोग से जानना चाहिए।

क्षेत्रसंसार—१. स्वशुद्धात्मद्रव्यसम्बन्धिसहजशुद्धलोकाकाशप्रमितासंख्येयप्रदेशेभ्यो भिन्ना ये लोकक्षेत्रप्रदेशास्तत्रैकैकं प्रदेशं व्याप्यानन्तवारान यत्र न जातो न मृतोऽयं जीवः स कोऽपि प्रदेशो नास्तीति क्षेत्रसंसारः।(बृ. द्रव्यसं. टी. ३५, पृ.८९-९०)। २. तेषामेव (जीव-पुद्गलानामेव) क्षेत्रे चतुर्दशरज्वात्मके यत्संसरणं स क्षेत्रसंसारः। यत्र वा क्षेत्रे संसारो व्याख्यायते तदेव क्षेत्रमभेदोपचारात् संसारो यथा रसवती गुणनिकेत्यादि। (स्थाना. अभय. वृ. ४, १, २६१)। ३. चतुरशीतिलक्षसीमन्तकादिनरकादिष्वतीते कालेऽनन्ता जन्म-मरणयोर्वृत्तिर्भविष्यति सान्ता भव्यानामनन्ता चाभव्यानां क्षेत्रसंसारः। (भ. आ. मूला. ४३०)।

१ सहज शुद्ध लोकाकाश के प्रदेश प्रमाण जो शुद्ध आत्मा के प्रदेश हैं उनसे भिन्न लोकक्षेत्र के प्रदेशों में ऐसा कोई प्रदेश नहीं हैं, जिसे व्याप्त करके यह जीव अनन्त बार जन्म-मरण को न प्राप्त हुआ हो, यही क्षेत्रसंसार है। २ चौदह राजुस्वरूप क्षेत्र में जो जीव और पुद्गलों का परिभ्रमण होता है, इसका नाम क्षेत्रसंसार है। अथवा जिस क्षेत्र में संसार का व्याख्यान किया जाता है, उसे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भी अभेद के उपचार से क्षेत्रसंसार कहा जाता है, जैसे रसोई व गुणनिका आदि।

क्षेत्रसामायिक—१. णयर-खेट-कव्वड-मडंव-पट्टण-दोणमुह-जणवदादिसु राग-दोसणिरोहो सगावास-त्रिसयसंपरायणिरोहो वा खेत्तसामाइयं णाम। (जयध. १, पृ. ९८)। २. कानिचित् क्षेत्राणि रम्याणि आराम-नगर-नदी-कूप-वापी-तडाग जनपदोपचितानि, कानिचिच्च क्षेत्राणि रूक्ष-कण्टक-विषम-विरसास्थि-पाषाणसहितानि जीर्णाटवी-शुष्क-नदी मरुसिकतागुंजादिबाहुल्यानि, तेषूपरि राग-द्वेषयोरभावः क्षेत्रसामायिकं नाम। (मूला. वृ. ७, १७)। ३. ग्राम-नगर-वनादिक्षेत्रेषु इष्टानिष्टेषु राग-द्वेषनिवृत्तिः क्षेत्रसामायिकम्। (गो. जी. म. प्र. टी. ३६७)। ४. क्षेत्रसामायिकमाराम-कण्टक-वनादिषु शुभाशुभक्षेत्रेषु समभावः। ××× क्षेत्र-सामायिकं सामायिकपरिणतजीवाधिष्ठितं स्थान-मूर्जयन्त-चम्पापुरादि। (अन. ध. स्वो. टी. ८-१९)। ५. णाम-गाम-णयर-वणादिखेत्तेसु इट्ठाणिट्ठेसु राय-दोसणियट्टी खेत्तसामाइयं। (अंगप. पृ. ३०६)।

१ नगर, खेट, कर्वट, मटंब, पट्टन, द्रोणमुख और जनपद आदि के विषय में राग-द्वेष न करना, अथवा अपने निवासस्थानविषयक कषाय को दूर करना, इसका नाम क्षेत्रसामायिक है।

क्षेत्रस्तव—१. कैलाश-सम्मेदोर्जयन्त-पावा-चम्पा-नगरादिनिर्वाणक्षेत्राणां समवसृतिक्षेत्राणां च स्तवनं क्षेत्रस्तवः। ××× चतुर्विंशतिस्तवसहितं क्षेत्रं ××× क्षेत्रस्तवः। (मूला. वृ. ७-४१)। २. क्षेत्रस्तवोऽर्हतां स स्यात्तत्स्वर्गावतरादिभिः। पूतस्य पूर्वनाद्र्यादेर्यत्प्रदेशस्य वर्णनम्। (अन. ध. ८, ४२)।

१ कैलाश पर्वत, सम्मेदाचल, ऊर्जयन्तगिरि, पावापुर और चम्पापुर आदि निर्वाणभूमियों एवं समवसरणस्थानों के गुणकीर्तन को क्षेत्रस्तव कहते हैं। अथवा चौबीस तीर्थंकरों के स्तवन सहित क्षेत्र को क्षेत्रस्तव जानना चाहिए।

क्षेत्राख्या प्रतिष्ठा—ऋषभाद्यानां तु तथा सर्वेषामेव मध्यमा ज्ञेया। (षोडश. ८-३)।

व्यक्त्याख्या, क्षेत्राख्या और महाख्या के भेद से प्रतिष्ठा तीन प्रकार की है। उनमें ऋषभादि सभी (२४) तीर्थंकरों की मध्यमा क्षेत्राख्या प्रतिष्ठा जाननी चाहिए।

क्षेत्रातिक्रम—क्षेत्रं स्याद्वसतिस्थानं धान्याधिष्ठानमेव वा। गवाद्यागारमात्रं वा स्वीकृतं यावदात्मना॥ ततोऽतिरिक्ते लोभान्मूर्च्छावृत्तिरतिक्रमः। न कर्तव्यो व्रतस्येन कुर्वतोपधितुच्छताम्॥ (लाटीसं. ६, ९८-९९)।

क्षेत्रका अर्थ रहने का स्थान, धान्य का अधिष्ठान (खेत) अथवा गायों आदि का बाड़ा होता है। परिग्रहपरिमाण में जितने क्षेत्र को स्वीकार किया गया है उससे अधिक में लोभ के वश आसक्ति रखना, यह उस व्रत का क्षेत्रातिक्रम नाम का अतिचार होता है। व्रती को उसका अतिक्रमण नहीं करना चाहिए।

क्षेत्राननुगामी—यत्क्षेत्रान्तरं न गच्छति स्वोत्पन्न-क्षेत्रे एव विनश्यति, भवान्तरं गच्छतु मा वा, तत्क्षेत्राननुगामि। (गो. जी. मं. प्र. व जी. प्र. टी. ३७२)।

जो अवधिज्ञान अपने उत्पत्तिक्षेत्र से अन्य क्षेत्र में स्वामी के साथ नहीं जाता है, किन्तु वहीं पर नष्ट हो जाता है; वह क्षेत्राननुगामी अवधिज्ञान कहलाता है। वह अपने उत्पन्न होने के भव से अन्य भव में जा भी सकता है और कदाचित् न भी जाय।

क्षेत्रानुगामी—स्वोत्पन्नक्षेत्रादन्यस्मिन् क्षेत्रे विहरन्तं जीवमनुगच्छति, भवान्तरं नानुगच्छति, तत्क्षेत्रानुगामि। (गो. जी. मं. प्र. व जी. प्र. टी. ३७२)।

जो अवधिज्ञान अपनी उत्पत्ति के क्षेत्र से अन्य क्षेत्र में स्वामी के जाने पर उसके साथ रहता है—नष्ट नहीं होता, उसे क्षेत्रानुगामी अवधि कहते हैं। यह अवधिज्ञान भवान्तर में साथ नहीं जाता है।

क्षेत्रानुपूर्वी—द्रव्यावगाहोपलक्षितं क्षेत्रमेव क्षेत्रानुपूर्वी। (अनुयो. हरि. वृत्ति पृ. ४४)।

द्रव्य (तीन आदि परमाणुओं के स्कन्ध) की अवगाहना (तीन-चार आदि प्रदेशों) से उपलक्षित—परिचय में आया हुआ—क्षेत्र ही क्षेत्रानुपूर्वी कहलाता है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षेत्रानुयोग—तथा क्षेत्रस्यैकस्य जम्बूद्वीपादेरनुयोगो यथा जम्बूद्वीपप्रज्ञप्तिः, तस्या जम्बूद्वीपलक्षणैक-क्षेत्रव्याख्यानरूपत्वात् । बहूनां क्षेत्राणामनुयोगो यथा द्वीप-सागरप्रज्ञप्तिः, बहूनां द्वीप-समुद्राणां तया व्याख्यानात् । क्षेत्रेणानुयोगो यथा पृथिवीकायिका-दिसङ्ख्याव्याख्यानं जम्बूद्वीपं प्रस्थकं कृत्वा। उक्तं च—जम्बुद्दीवपमाणा पुढविजियाणं तु पत्थयं काउं। एवं मविज्जमाणा हवंति लोगा असंखेज्जा ।। क्षेत्रै-रनुयोगो यथा बहु-द्वीपसमुद्रप्रमाणं प्रस्थकं कृत्वा पथिवीकायादिसङ्ख्याभणनम् । उक्तं च—खेत्तेहिं बहुदीवेहिं पुढविजियाणं तु पत्थयं काउं । एवं मविज्जमाणा हवंति लोगा असंखेज्जा ।। क्षेत्रेऽनु-योगस्तिर्यग्लोके भरतादौ वा, क्षेत्रेष्वनुयोगोऽर्द्धतृती-येषु द्वीप-समुद्रेषु । (आव. नि. मलय. वृ. १२९, पृ. १३१) ।

अनुयोग नाम विशेष विवरण या व्याख्यान का है। प्रकृत में यह क्षेत्रानुयोग कई प्रकार का है। जैसे—१ जम्बूद्वीप आदि किसी एक ही क्षेत्र का अनु-योग। यथा—जम्बूद्वीपप्रज्ञप्ति। २ बहुत क्षेत्रों का अनुयोग। जैसे—द्वीप-सागरप्रज्ञप्ति। ३ एक क्षेत्र के द्वारा अनुयोग। जैसे—जम्बूद्वीप को प्रस्थक (माप का एक उपकरण) करके पृथिवीकायिक आदि जीवों की संख्या का व्याख्यान। ४ बहुत से क्षेत्रों के द्वारा अनुयोग। जैसे—बहुत द्वीप-समुद्रों के प्रमाण को प्रस्थक करके पृथिवीकायिकादि जीवों की संख्या का विवरण। ५ एक क्षेत्र या बहुत से क्षेत्रों में अनुयोग। जैसे—तिर्यग्लोक में या भरतादि क्षेत्रों अथवा अढाई द्वीप-समुद्रों में।

क्षेत्राभिग्रह—अट्ठ उ गोयरभूमी एलुगविक्खंभ-मित्तगहणं च। सग्गाम परग्गामे एवइय घरा य खित्तम्मि ।। (बृहत्क. भा. १६४९) ।

ऋज्वी, गत्वाप्रत्यागतिका, गोमूत्रिका, पतगवीथिका, पेडा, अर्धपेडा, अभ्यन्तरशम्बूका और बहिःशम्बू-का; इन आठ गोचरभूमियों का भिक्षार्थ नियम करना, ऊमर के प्रमाण भोजन लेने का नियम करना तथा अपने गांव में या अन्य के गांव में इतने घर तक जाऊंगा इत्यादि प्रकार का नियम करना; इसका नाम क्षेत्राभिग्रह है।

क्षेत्रार्य—१. क्षेत्रार्याः पञ्चदशसु कर्मभूमिषु जाताः तथा भरतेषु अर्धषड्विंशतिषु जनपदेषु जाता शेषेषु च चक्रवर्तिविजयेषु। (त. भा. ३–१५)। २. क्षेत्रार्याः काशी-कोशलादिषु जाताः। (त. वा. ३, ३६, २)। ३. क्षेत्रार्याः पञ्चदशसु जायन्ते कर्म-भूमिषु। तत्रेह भारते सार्धपञ्चविंशतिदेशजाः ।। (त्रि. श. पु. च. २, ३, ६६५)। ४. कौशल-काश्यवन्ति-अंग-वंग-तिलंग-कलिंग-लाट-कर्णाट-भोट-गौड-गुर्जर-सौराष्ट्र-मरु-वाग्जड-मलय-मालव - कुंक-णाभीर - सौरभस - काश्मीर-जालंधरादिदेशोद्भवाः क्षेत्रार्याः। (त. वृत्ति श्रुत. ३–३६)।

१ जो पन्द्रह कर्मभूमियों में, तथा भरतक्षेत्रों में वर्तमान साढ़े पच्चीस देशों में तथा शेष क्षेत्रगत चक्रवर्तिविजयों में उत्पन्न हुए हैं वे क्षेत्रार्य कहे जाते हैं। २ काशी और कौशल आदि देशों में उत्पन्न हुए मनुष्य क्षेत्रार्य कहलाते हैं।

क्षेत्रावग्रह—१. पुव्वावरायया खलु सेढी लोगस्स मज्झयारम्मि। जा कुणइ दुहा लोगं दाहिण तह उत्तरद्धं च ।। साधारण आवलिया मज्झम्मि अवद्ध-चंदकप्पाणं। अद्धं च परक्खित्ते तेसिं अद्धं च सक्खि-त्ते ।। सेढीइ दाहिणेणं जा लोगो उड्ढ मो सकवि-माणा। हेट्ठा वि य लोगंतो खित्तं सोहम्मरायस्स ।। (बृहत्क. ६७२–७४)। २. यो यत्क्षेत्रमवगृह्णाति स क्षेत्रावग्रहः। स च समन्ततः सक्रोशं योजनमेक-स्मिन् क्षेत्रेऽवगृहीते सतीति। (प्रव. सारो. १२६)।

१ लोक के मध्य में पूर्व-पश्चिम लंबी एक प्रदेशरूप श्रेणि है जो लोक को दो भागों में विभक्त करती है—दक्षिणार्ध और उत्तरार्ध। इनमें दक्षिण अर्ध-लोक का अधिपति सौधर्म और उत्तर अर्धलोक का अधिपति ईशान इन्द्र है। अर्धचन्द्राकार सौधर्म व ईशान कल्पों में जो विमानपंक्ति है वह साधारण है—पूर्व-पश्चिम दिशागत तेरह प्रस्तरों में कुछ सौधर्म इन्द्र के और कुछ ईशान इन्द्र के हैं। इत्यादि प्रकार का जो क्षेत्रविभाग है, यह देवेन्द्र का क्षेत्रा-वग्रह है। अभिप्राय यह कि इन्द्र व चक्रवर्ती आदि जितने क्षेत्र में अपना आधिपत्य रखते हैं, उसे क्षेत्रावग्रह कहा जाता है।

क्षेत्राहार—क्षेत्राहारस्तु यस्मिन् क्षेत्रे आहारः क्रियते उत्पद्यते व्याख्यायते वा। यदि वा नगरस्य यो देशो धान्येन्धनादिनोपभोग्यः स क्षेत्राहारः। तद्यथा—मथुरायाः समासन्नो देशः परिभोग्यो मथुराहारो मोढेरकाहाराः खेडाहार इत्यादि।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(सूत्रकृ. नि. शी. वृ. २, ३, १६९, पृ. ८७)।

जिस क्षेत्र में आहार किया जाता है, उत्पन्न होता है, अथवा व्याख्यान किया जाता है उसे क्षेत्राहार कहते हैं। अथवा नगर का जो देश (भाग) धान्य व इन्धन आदि के द्वारा उपभोग के योग्य होता है वह भी क्षेत्राहार कहलाता है।

क्षेत्रोज्झित—अमुगिच्चगं ण भुंजे उवणीयं तं च केणई तस्स। जं वुज्झे कप्पडिया स देश बहुवत्थदेसे वा॥ (बृहत्क. ६१२)।

मैं अमुक देश के वस्त्र का उपभोग न करूंगा, ऐसी प्रतिज्ञा करने के पश्चात् यदि कोई उसे वही वस्त्र भेंट करे तो उसके नहीं ग्रहण करने को क्षेत्रोज्झित कहते हैं। अथवा कार्पटिक—अपने देश की ओर लौटकर आने वाले या अपने देश से अन्य देश की ओर जाने वाले—बीच में चोरों के भय आदि से जो वस्त्रों का परित्याग कर देते हैं, अथवा वस्त्र-प्रचुर देश में अन्य सुन्दर वस्त्र को लेकर पुराने को छोड़ देना, इत्यादि सब क्षेत्रोज्झित कहलाता है।

क्षेत्रोत्तर—क्षेत्रोत्तरं मेर्वाद्यपेक्षया यदुत्तरम्। (उत्तरा. शा. १, पृ. ३)।

मेरु आदि की अपेक्षा जो उत्तरदिशागत क्षेत्र है वह क्षेत्रोत्तर कहलाता है।

क्षेत्रोत्सर्ग—यत्क्षेत्रं दक्षिणदेशाद्युत्सृजति, यत्र वाऽपि क्षेत्रे उत्सर्गो व्यावर्ण्यते, एष क्षेत्रोत्सर्गः। (आव. हरि. वृ. १४५२, पृ. ७७१)।

दक्षिण आदि जिस क्षेत्र का त्याग किया जाता है, अथवा जिस क्षेत्र में उत्सर्ग का वर्णन किया जाता है, उसे क्षेत्रोत्सर्ग कहते हैं।

क्षेत्रोपक्रम—१. से किं तं खेत्तोवक्कमे ?, २ जण्णं हल-कुलिआईहिं खेत्ताइं उवक्कमिज्जंति से तं खेत्तोवक्कमे। (अनुयो. सू. ६७)। २. क्षेत्रस्योपक्रमः परिकर्म-विनाशकरणं क्षेत्रोपक्रमः। ××× यदत्र हल-कुलिकादिभिः क्षेत्राण्युपक्रम्यन्ते—बीजवपनादियोग्यतामानीयन्ते स कर्मणि क्षेत्रोपक्रमः, आदिशब्दाद् गजेन्द्रबन्धनादिभिः क्षेत्राण्युपक्रम्यन्ते विनाश्यन्ते स वस्तुनाशे क्षेत्रोपक्रमः, गजेन्द्रमूत्रपुरीषादिदग्धेषु हि क्षेत्रेषु बीजानामप्ररोहणात् विनष्टानि क्षेत्राणि इति व्यपदिश्यन्ते। (अनुयो. मल. हेम. वृ. ६७, पृ. ४८)।

२ खेत का जो परिकर्म (संस्कार) और विनाश किया जाता है उसे क्षेत्रोपक्रम कहते हैं। यथा—हल और कुलिक (जिस काष्ठविशेष से घास आदि को निकाला जाता है वह मारवाड़-प्रसिद्ध एक खेती का उपकरण) आदि के द्वारा खेतों का जो उपक्रम किया जाता है—उन्हें बीज बोने आदि के योग्य बनाया जाता है, यह परिकर्म रूप में क्षेत्रोपक्रम है। तथा हाथी के बन्धन आदि से—उनके मल-मूत्र आदि के द्वारा—जो खेतों का उपक्रम किया जाता है—उन्हें विनष्ट किया जाता है, यह वस्तु-नाशरूप में क्षेत्रोपक्रम है।

क्षेत्रोपसम्पत्—१. संजम-तव-गुण-सीला जम-णियमादी य जम्हि खेत्तम्हि। वड्ढंति तम्हि वासो खेत्ते उवसंपया णेया॥ (मूला. ४–१४१)। २. यस्मिन् क्षेत्रे संयम-तपोगुण-शीलानि यम-नियमादयश्च वर्द्धन्ते तस्मिन् वासो यः सा क्षेत्रोपसम्पत्। (मूला. वृ. ४–१४१)।

१ जिस क्षेत्र में रहने पर संयम, तप, गुण, शील, यम और नियमादिक वृद्धि को प्राप्त होते हैं उस क्षेत्र में निवास करने को क्षेत्र-उपसम्पत् कहा जाता है।

क्षेम—क्षेमं च लब्धपालनलक्षणम्। (ललितवि. मु. पं. पृ. ३०)।

प्राप्त हुए राज्यादि के विधिपूर्वक रक्षण करने को क्षेम कहते हैं।

क्षेमंकर—'क्षेमं' शान्तिः रक्षा, तत्करणशीलः क्षेमंकरः। (सूत्रकृ. सू. शी. वृ. २. ६, ४, पृ. १४१)।

क्षेम नाम शान्ति या रक्षा का है। जिसका स्वभाव शान्ति या रक्षा करने का है उसे क्षेमंकर कहा जाता है।

क्षेम-अक्षेमरूप—तथा क्षेमोऽक्षेमरूपस्तु सः (ज्ञानादिसमन्वितः) एव भावसाधुः कारणिकद्रव्यलिङ्गरहितः। (सूत्रकृ. नि. शी. वृ. १, ११, १११, पृ. १९९)।

अन्तरंग में ज्ञान-संयमादि के धारक, किन्तु बाह्य में साधुपदोचित प्रयोजनीभूत द्रव्यलिंग से रहित साधु को क्षेम-अक्षेमरूप भावमार्ग कहते हैं।

क्षेम-क्षेमरूप—ज्ञानादिसमन्वितो द्रव्यलिङ्गोपेतश्च साधुः क्षेमः क्षेमरूपश्च। (सूत्रकृ. नि. शी. वृ. १, ११, १११, पृ. १९९)।

अन्तरङ्ग में ज्ञानादि से युक्त तथा बाह्य में द्रव्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लिंग से भी युक्त साधु को क्षेम-क्षेमरूप भावमार्ग कहते हैं।

क्षोभ—निर्विकारनिश्चलचित्तवृत्तिरूपचारित्रस्य विनाशकश्चारित्रमोहाभिधानः क्षोभ इत्युच्यते। (प्रव. सा. जय. वृ. ८)।

निर्विकार और निश्चल चित्तवृत्तिरूप चारित्र के विनाशक चारित्रमोह को क्षोभ कहते हैं।

क्ष्मालीक—क्ष्मालीकं परस्वकामपि भूमिमात्मस्वकां विपर्ययं वा वदतो भवेत्। (सा. ध. स्वो. टी. ३–३९)।

दूसरे की भी भूमि को अपनी बतलाने तथा अपनी को दूसरे की भूमि बतलाने को क्ष्मालीक कहते हैं। अभिप्राय यह कि भूमि-सम्बन्धी असत्य वचन को क्ष्मालीक कहते हैं।

क्ष्वेलौषधि—१. जीए लाला सेंभच्छीमल-सिंहाण-आदिआ सिग्घं। जीवाण रोगहरणा स च्चिय खेलोसही रिद्धी॥ (ति. प. ४–१०६९)। २. क्ष्वेलो निष्ठीवनमौषधिर्येषां ते क्ष्वेलौषधिप्राप्ताः। (त. वा. ३, ३६, ३)। ३. सेंभ-लाला-सिंघाण-विप्पुसादीण खेलो त्ति सण्णा। एसो खेलो ओसहित्त पत्तो जेसिं ते खेलोसहिपत्ता। (धव. पु. ९, पृ. ९६)।

१ जिस ऋद्धि के प्रभाव से कफ, आंख का मल और नासिका का मल आदि जीवों के रोग को शीघ्र दूर करने वाले होते हैं वह क्ष्वेलौषधि ऋद्धि कहलाती है।

खगचर—विज्जाए विणा सहावदो चेव गगणगमणसमत्थेसु खगयरत्तप्पसिद्धीदो। (धव. पु. ११, पृ. ११५)।

विद्या के बिना स्वभाव से ही जो आकाश में गमन करने में समर्थ हो वह खगचर कहलाता है।

खड्गमुद्रा—दक्षिणकरेण मुष्टिं बद्ध्वा तर्जनीं मध्ये प्रसारयेदिति खड्गमुद्रा। (निर्वाणक. पृ. ३१)।

दाहिने हाथ की मुट्ठी बांध कर तर्जनी अंगुली के फैलाने को खड्गमुद्रा कहते हैं।

खण्ड—१. खण्डो घटादीनां कपाल-शर्करादिः। (स. सि. ५–२४; त. वा. ५, २४, १४; कार्तिके. टी. २०६)। २. घट-करकादीनां भित्त-शर्करादिकरणं खण्डः प्रतिपाद्यते। (त. वृत्ति श्रुत. ५–२४)।

१ घड़े के कपाल-शर्करा आदि टुकड़ों को खण्ड कहते हैं।

खण्डकुट—यस्य पुनरेकपार्श्वे खण्डेन हीनता स खण्डकुटः। (आव. नि. मलय. वृ. १३६, पृ. १४३)।

एक बाजू से फूटे हुए घड़े को खण्डकुट कहते हैं।

खण्डकुट-समान शिष्य—यस्तु व्याख्यानमण्डल्यामुपविष्टोऽर्द्धमात्रं त्रिभागं चतुष्कं वा हीनं वा सूत्रार्थमवधारयति तथाऽवधारितं च स्मरति स खण्डकुटसमानः। (आव. नि. मलय. वृ. १३६, पृ. १४३)।

जैसे खण्डित हुए घड़े में धारण किया गया जल अल्प मात्रा में ठहरता है, इसी प्रकार जो शिष्य व्याख्यानमण्डली में बैठकर गुरु के द्वारा उपदिष्ट सूत्रार्थ को आधा, तृतीयांश, चतुर्थांश अथवा और भी हीन अवधारण करता है व अवधारित का स्मरण करता है उसे खण्डकुट समान शिष्य कहते हैं।

खण्डाभेद—से किं तं खंडाभेदे? जण्णं अयखंडाण वा तउखंडाण वा तंबखंडाण वा सीसखंडाण वा रययखंडाण वा जातरूवखंडाण वा खंडएण भेदे भवति से तं खंडाभेदे। (प्रज्ञाप. ११–१७१)।

लोहा, त्रपु (रांगा), तांबा, शीशा, चांदी और सोना; इनके खण्डों का जो खण्डरूप से भेद होता है उसे खण्डाभेद कहते हैं।

खलता — ××× अपगुणकथाभ्यासखलता। (युक्त्यनु. ६४)।

अवगुणों की कथा के अभ्यास का नाम खलता है।

खलीन दोष— १. यः खलीनपीडितोऽश्व इव दन्तकटकटं मस्तकं कृत्वा कायोत्सर्गं करोति तस्य खलीनदोषः। (मूला. वृ. ७–१७१)। २. खलीनमिव रजोहरणं पुरस्कृत्य स्थानं खलीलनदोषः। अन्ये खलीनार्तहयवदूर्ध्वाधःशिरःकम्पनं खलीनदोषमाहुः। (योगशा. स्वो. विव. ३–१३०)। ३. ××× खलीनितम्। खलीनार्ताश्ववद्दन्तघृष्टयोर्ध्वाधश्च लच्छिरः। (अन. ध. ८–११६)।

१ खलीन नाम घोड़े की लगाम का है। खलीन से पीड़ित घोड़े के समान दांतों की कटकटाहट युक्त मस्तकको करके जो कायोत्सर्ग करता है उसके खलीन दोष होता है। २ खलीन के समान रजोहरण को आगे करके स्थित होना, यह खलीनदोष कहलाता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

है। दूसरे आचार्यों का कहना है कि लगाम से पीड़ित घोड़े के समान ऊपर-नीचे शिर के कंपाने का नाम खलीनदोष है।

खात—१. खातं भूमिगृहादि। (योगशा. स्वो. विव. १–९५)। २. खातं तूभयत्रापि सममिति। (जम्बूद्वी. शा. वृ. १२, पृ. ७६; जीवाजी. मलय. वृ. ३, १, ११७, पृ. १५९)।

१ भूमिगृह (तलघर) का नाम खात है।

खातोच्छ्रित—खातोच्छ्रितं भूमिगृहस्योपरि गृहादिसन्निवेशः। (योगशा. स्वो. विव. ३–९५)।

भूमिगृह के ऊपर बनाये गये गृहादि को खातोच्छ्रित कहते हैं।

खाद्य—शर्करादि वा। खाद्यं ×××॥ (लाटीसं. २–१६)

शक्कर आदि खाद्य कहलाते हैं।

खारी—षोडशद्रोणा खारी। (त. वा. ३, ३८,३)।

सोलह द्रोण प्रमाण मापविशेष को खारी कहते हैं।

खेट—१. गिरि-सरिकदपरिवेढं खेडं ××× ॥ (ति. प. ४–१३९८)। २. सरित्पर्वतावरुद्धं खेडं णाम। (धव. पु. १३, पृ. ३३५)। ३. खेटं नद्याद्रिवेष्टिम्। (मूला. वृ. ९–८९)। ४. खेटं धूलीप्राकारम्। (प्रश्नव्या. अभय. वृ. पृ. १७५; औपपा. अभय. वृ. ३२, पृ. ७४)। ५. पांसु-प्राकारनिबद्धं खेटम्। (जीवाजी. मलय. वृ. १–३६); पांशुप्राकारनिबद्धानि खेटानि। (जीवाजी. मलय. वृ. ३, २, १४७, पृ. २७९)।

१ पर्वत और नदी से वेष्टित क्षेत्र को खेट कहा जाता है। ४ जिस नगर के चारों ओर धूलि—मिट्टी से बना हुआ—कोट हो, उसे खेट कहते हैं।

खेटादिकथा—खेटं नद्याद्रिवेष्टितं नदी-पर्वतैरवरुद्धः प्रदेशः। कर्वटं सर्वत्र पर्वतेन वेष्टितो देशः। कथात्र सम्बध्यते—कर्वटकथाः खेटकथास्तथा संवाहन-द्रोणमुखादिकथाश्च, तानि शोभनानि निविष्टानि सुदुर्गाणि वीरपुरुषाधिष्ठितानि सुयंत्रितानि परचक्राभेद्यानि बहुधन-धान्यार्थनिचितानि, सर्वथायोधानि, न तत्र प्रवेष्टुं शक्नोतीत्येवमादिवाक्प्रलापाः खेटादिकथाः। (मूला. वृ. ९–८९)।

नदी और पर्वत से अवरुद्ध प्रदेश को खेट कहते हैं। ये खेट, संवाहन व द्रोणमुख आदि सुन्दर, उत्तम दुर्ग से सहित, शूर-वीर पुरुषों से अधिष्ठित, भली भांति नियंत्रित, शत्रु से अभेद्य, बहुत धन-धान्यादि से परिपूर्ण और अयोध्य होते हैं; इत्यादि प्रकार से खेट आदि के सम्बन्ध में कथा-वार्ता करना, इसे खेटादिकथा कहते हैं।

खेद—अनिष्टलाभः खेदः। (नि. सा. टी. ६)।

अनिष्ट के संयोग से चित्त में होने वाली खिन्नता को खेद (अठारह दोषगत एक दोष) कहते हैं।

खेलौषधि ऋद्धि—देखो क्ष्वेलौषधि।

गगन—आगासं गगणं देवपथं गोज्झगाचरिदं अवगाहणलक्खणं आधेयं वियापगमाधारो भूमि त्ति एयट्ठो। (धव. पु. ४, पृ. ८)।

जो अन्य द्रव्यों को स्थान देने वाला है उसे गगन कहते हैं। आकाश, देवपथ, गुह्यकाचरित, अवगाहनलक्षण, आधेय, व्यापक, आधार और भूमि; ये उसके समानार्थक नाम हैं।

गगनगामिनी—देखो आकाशगामिनी। गच्छेदि जीए ऐसा रिद्धी गयणगामिणी णाम। (ति. प. ४–१०३४)।

जिसके प्रभाव से आकाश में गमन किया जा सकता है उसे गगनगामिनी ऋद्धि कहते हैं। आकाशगामिनी भी इसी का दूसरा नाम है।

गच्छ—१. तिपुरिसओ गणो, तदुवरि गच्छो। (धव. पु. १३, पृ. ६३)। २. एकाचार्यप्रणेयसाधुसमूहो गच्छः। (त. भा. सिद्ध. वृ. ९–२४; योगशा. स्वो. विव. ४–९०)। ३. साप्तपुरुषिको गच्छः। (मूला. वृ. ४–१५३)।

१ तीन पुरुषों का गण और उसके आगे गच्छ होता है। २ एक आचार्य के नेतृत्व में रहने वाले साधुओं के समूह को गच्छ कहते हैं।

गड्डी—दहरदोचक्काओ धण्णादिहलुअदव्वभरुव्वहणक्खमाओ गड्डीओ णाम। (धव. पु. १४, पृ. ३८)।

धान्य आदि हलके द्रव्य के भार के ढोने में समर्थ दो चाकों वाली गाड़ी को गड्डी कहा जाता है।

गण—१. गणः स्थविरसन्ततिः। (स. सि. ९, २४; त. श्लो. ९–२४; भावप्रा. टी. ७८)। २. गणः स्थविरसन्ततिसंस्थितिः। (त. भा. ९, २४)। ३. गणः स्थविरसन्ततिः। स्थविराणां सन्ततिर्गण इत्युच्यते। (त. वा. ९, २४, ८)। ४. गण इति एकवाचनाचार-क्रियास्थानां समुदायः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(आव. नि. हरि. व मलय. वृ. २११)। ५. तिपुरिसओ गणो। (धव. पु. १३, पृ. ६३)। ६. स्थविराणां सन्ततिर्गणः। (चा. सा. पृ. ६६)। ७. त्रैपुरुषिको गणः (मूला. ४–१५३)। ८. कुलसमुदायो गणः। (योगशा. स्वो. विव. ४–९०)। ९. गणः कुलानां समुदायः। (औपपा. अभय. वृ. २०, पृ. ३२)। १०. गणो मल्लगणादिः। (व्यव. मलय. वृ. पृ. ११७)। ११. वृद्धमुनिसमूहो गणः। (त. वृत्ति श्रुत. ९–२४; कार्तिके. टी. ४५७)।

१ जो साधु स्थविर—मर्यादा के उपदेशक या श्रुत में वृद्ध होते हैं उनके समूह को गण कहा जाता है।

गणक—गणकः संख्याविद् दैवज्ञो वा। (नीतिवा. १४–२७)।

संख्या के जानकार गणितज्ञ को अथवा दैवज्ञ (ज्योतिषी) को गणक कहते हैं।

गणधर—१. ××× गणपरिरक्खो मुणेयव्वो॥ (मूला. ४–३५, पृ. १३५); पियधम्मो दढधम्मो संविग्गोऽवज्जभीरु परिसुद्धो। संगह-णिग्गहकुसलो सददं सारक्खणाजुत्तो॥ गंभीरो दुद्धरिसो मिदवादी अप्पकोदुहल्लो य। चिरपव्वइदो गिहिदत्थो अज्जाणं गणधरो होदि॥ (मूला. ४, ६२–६३, पृ. १५७–५८)। २. अनुत्तरज्ञान-दर्शनादिधर्मगणं धारयतीति गणधरः। (दशवै. नि. हरि. वृ. १४, पृ. १०)। ३. गणा द्वादश यत्यादयो जिनेन्द्रसम्याः। गणान् धारयन्ति दुर्गतिमार्गान्मिथ्याश्रद्धानादेर्विनिवृत्य शिवमार्गे सम्यग्दर्शनादौ स्थापयन्तीति गणधराः सप्तविधर्द्धिप्राप्ताः धर्माचार्याः। (भ. आ. मूला. ३४)। ४. यस्त्वाचार्यदेशीयो गुर्वादेशात् साधुगणं गृहीत्वा पृथग् विहरति स गणधरः। (आचा. शी. वृ. २, १, १०, २७९, पृ. ३२२)। ५. प्रभावनाधिकोऽबाधमन्नाद्यैः संघवर्तकः। जगदादेयवाग्मूर्तिर्वर्तकः कालदेशवित्॥ समर्थस्थितिसद्गीतिः स्थविरः स्याद् गुणस्थिरः। रणरक्षाक्षमः सूरिर्गुणी गणधरः स्मृतः॥ (आचा. सा. २–३५, ३६)।

१ जो गण का रक्षण करता है वह गणधर कहलाता है। २ जो अनुपम ज्ञान-दर्शनादिरूप धर्मगण को धारण करता है उसे गणधर कहते हैं। ४ आचार्यसदृश जो गुरु की आज्ञा से साधुगण को लेकर पृथक् विहार करता है वह गणधर कहलाता है।

गणधरत्व—गणधरत्वं श्रुतज्ञानावरणक्षयोपशमप्रकर्षनिमित्तम्। (त. वा. ८, १२, ४१)।

श्रुतज्ञानावरण के प्रकृष्ट क्षयोपशम के निमित्त से गण के धारण में समर्थ होना, इसका नाम गणधरत्व है।

गणना—गणनं परिसंख्यानमेकं द्वे त्रीणि इत्यादि। (व्यव. भा. मलय. वृ. १, २, पृ. २)।

एक, दो व तीन इत्यादि संख्या करने का नाम गणना है।

गणनाकृति (गणणकदी)—जा सा गणणकदी णाम सा अणेयविहा। तं जहा—एओ णोकदी, दुवे अवत्तव्वा कदि त्ति वा णोकदि त्ति वा, तिप्पहुडि जाव संखेज्जा वा असंखेज्जा वा अणंता वा कदी, सा सव्वा गणणकदी णाम। (षट्खं. ४, १, ६६—पु. ९, पृ. २७४)।

नोकृति, अवक्तव्यकृति और कृति आदि के भेद से गणनाकृति अनेक प्रकार की है। इनमें एक (१) का चूंकि वर्ग सम्भव नहीं है, अतः वह नोकृति है। दो (२) का वर्ग करने पर वर्ग तो होता है पर उसके वर्ग में से वर्गमूल को कम करके वर्ग करने पर वृद्धि नहीं होती ($२^२=४$; $४-२=२$), अतः न उसे कृति कहा जा सकता है और न नोकृति ही; इसीलिए वह अवक्तव्य कृति है। आगे की तीन (३) आदि किसी भी संख्या के वर्ग में से वर्गमूल को कम करके वर्ग करने पर वृद्धि होती है, अतः ये सब संख्याएं कृति कहलाती हैं। जैसे—$३^२=९$; $९-३=६$; $६^२=३६$ इत्यादि।

गणनानन्त—जं तं गणणाणंतं तं तिविहं—परित्ताणंतं, जुत्ताणंतं, अणंताणंतमिदि। (धव. पु. ३, पृ. १८)।

परीतानन्त, युक्तानन्त और अनन्तानन्त को गणनानन्त कहा जाता है। इनके लक्षण उन उन शब्दों में द्रष्टव्य हैं।

गणनाम—से किं तं गणनामे १, २ मल्ले मल्लदिन्ने मल्लधम्मे मल्लसम्मे मल्लदेवे मल्लदासे मल्लसेणे मल्लरक्खिए, से तं गणनामे। (अनुयो. १३०, पृ. १४६)।

जो नाम (शब्द) मल्ल, मल्लदत्त, मल्लधर्म, मल्लसाम्य (या मल्लश्रम), मल्लदेव, मल्लदास, मल्लसेण और मल्लरक्षित; इन गणविशेषों में वर्तमान

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हो वह गणनाम कहलाता है।

गणनामान—एक-द्वि-त्रि-चतुरादिगणितमानं गणनामानम्। (त. वा. ३, ३८, ३, पृ. २०५)।

एक, दो, तीन और चार आदि संख्यारूप मान को गणनामान कहते हैं।

गणनासंख्येय—देखो असंख्येय। ज तं गणणासंखेज्जयं तं तिविहं—परित्तासंखेज्जयं, जुत्तासंखेज्जयं असंखेज्जासंखेज्जयं चेदि। (धव. पु. ३, पृ. १२६)।

गणनासंख्यात परीतासंख्यात, युक्तासंख्यात और असंख्यातासंख्यात के भेद से तीन प्रकार का है। (इनके पृथक्-पृथक् लक्षण उन्हीं शब्दों में देखना चाहिए।)

गणाधिप—गणाधिपः धर्माचार्यस्तादृग्गृहस्थाचार्यो वा। (सा. ध. स्वो. टी. २-५१)।

धर्माचार्य, अथवा उसके समान गृहस्थाचार्य को गणाधिप कहा जाता है।

गणावच्छेदक—गणावच्छेदकस्तु गच्छकार्यचिन्तकः। (आचारा. शी. वृ. २, १, १०, २७९, पृ. ३२२)।

गच्छ के—एक आचार्य के नेतृत्व में वर्तमान साधु-समूह के—कार्यों की जो चिन्ता करता है, वह गणावच्छेदक कहलाता है।

गणितपद—विक्खंभपायगुणिउ परिरउ तस्स गणियपयं। (लघुसंग्रहणी ७)।

वृत्त क्षेत्र की परिधि को विष्कम्भ के चतुर्थ भाग से गुणित करने पर उसका गणितपद (क्षेत्रफल) होता है।

गणिम—से किं तं गणिमे ?, २ जण्णं गणिज्जइ। तं जहा—एगो दस सयं सहस्सं दससहस्साइं सयसहस्सं दससयसहस्साइं कोडी। एएणं गणिमप्पमाणेणं किं पओअणं ? एएणं गणिमपमाणेणं भितग-भिति-भत्त-वेअण-आयव्वयसंसिआणं दव्वाणं गणियप्पमाणनिव्वित्तिलक्खणं भवइ, से तं गणिमे। (अनुयो. सू. १३२, पृ. १५४)।

एक, दश, शत, सहस्र, दशसहस्र, शतसहस्र (लक्ष), दशशतसहस्र और कोटि आदि संख्याओं को गणिम कहते हैं। भृतक (सेवक), भृति (पदाति आदिकों की वृत्ति), भोजन एवं जुलाहे आदि का वेतन; इन सबके आय-व्यय से सम्बद्ध रुपया आदि द्रव्यों के लेखा-जोखा की सिद्धि यह उक्त गणिम का प्रयोजन है।

गणी—१. एकादशाङ्गविद् गणी। (धव. पु. १४, पृ. २२)। २. गच्छाधिपो गणी। (आचारा. शी. वृ. २, १, १०, पृ. ३२२)।

१ ग्यारह अंगों के ज्ञाता को गणी कहते हैं। २ गच्छ के स्वामी को गणी कहते हैं।

गण्डि—गच्छति प्रेरितः प्रतिपथादिना डीयते च कूर्दमानो विहायोगमनेनेति गण्डिः। (उत्तरा. नि. शा. वृ. १-६४, पृ. ४९)।

प्रेरित किये जाने पर जो कुमार्ग से जाता है तथा उछलते-कूदते हुए जो आकाशगमन से भी छलांग मारता है उसे गण्डि कहते हैं।

गण्डिका—इहैकवक्तव्यतार्थाधिकारानुगता वाक्यपद्धतयो गण्डिका उच्यन्ते। (नन्दी. हरि. वृ. पृ. १०९; समवा. अभय. वृ. १४७)।

एक वक्तव्यतारूप अर्थाधिकार से अनुगत वाक्यपद्धतियों को गण्डिका कहते हैं।

गण्डिकानुयोग — तासां (गण्डिकानां) अनुयोगः अर्थकथनविधिः गण्डिकानुयोगः। (नन्दी. हरि. वृ. पृ. १०९; समवा. अभय. वृ. १४७, पृ. १२२)।

गण्डिकाओं के अर्थ की कथनविधि को गण्डिकानुयोग कहते हैं।

गतप्रत्यागततप—यया वीथ्या गतः पूर्वं तयैव प्रत्यागमनं कुर्वन् यदि लभते भिक्षां गृह्णाति, नान्यथा। (भ. आ. विजयो. २१८)।

पहले जिस वीथी (गली) से गया था, उसी वीथी से लौटते हुए यदि भिक्षा मिले तो ग्रहण करे, अन्यथा ग्रहण न करे; इस प्रकार के नियम लेने को गत-प्रत्यागतवृत्तिपरिसंख्यानतप कहते हैं।

गतरूपध्यान—ण य चिंतइ देहत्थं देहबहित्थं ण चिंतए किं पि। ण सगय-परगयरूवं तं गयरूवं णिरालंबं॥ जत्थ ण करणं चिंता अक्खररूवं ण धारणा धेयं। ण य वावारो कोई चित्तस्स य तं णिरालंबं॥ इंदियविसयवियारा जत्थ खयं जंति राय-दोसं च। मणवावारा सव्वे तं गयरूवं मुणेयव्वं॥ (भावसं. दे. ६२८-३०)।

जिस ध्यान में न देहस्थ किसी वस्तु का चिन्तन किया जाता है, न देह के बाहिर स्थित किसी वस्तु का चिन्तन किया जाता है, न स्वगत रूप का

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चिन्तन किया जाता है, न परगत रूप का चिन्तन किया जाता है; जहां करण, चिन्ता व अक्षर-रूप नहीं है; धारणा व ध्येय नहीं है; चित्त का कोई व्यापार नहीं है तथा जहां इन्द्रियविषयों सम्बन्धी व्यापार, राग-द्वेष और सब मन के व्यापार नहीं हैं; उसे निरालम्ब गतरूप (रूपातीत) ध्यान कहा जाता है।

गति—१. देखो गतिपरिणाम। गइकम्मविणिव्वत्ता जा चेट्ठा सा गई मुणेयव्वा। जीवा हु चाउरंगं गच्छंति त्ति य गई होई॥ (प्रा. पंचसं. १–५९; धव. पु. १, पृ. १३५ उद्.)। २. गम्यतेऽसाविति गतिर्नारकाद्युत्पत्तिस्थानम्। (त. भा. हरि. व सिद्ध. वृ. ८, १२)। ३. गतिकर्मणा समुत्पन्न आत्मपर्यायः गतिः। (धव. पु. १, पृ. १३५); गतिर्भवः संसार इत्यर्थः। ××× जम्हि जीवभावे आउकम्मादो लद्धावट्ठाणे संते सरीरादियाइं कम्मादिमुदयं गच्छंति सो भावो जस्स पोग्गलक्खंधस्स मिच्छत्तादिकारणेहि पत्तकम्मभावस्स उदयादो होदि तस्स कम्मक्खंधस्स गदि त्ति सण्णा। (धव. पु. ६, पृ. ५०); भवाद् भवसंक्रान्तिर्गतिः। (धव. पु. ७, पृ. ६); इच्छिदगदीदो अण्णगदिगमणं गदी णाम। (धव. पु. १३, पृ. ३४६)। ४. देशान्तरप्राप्तिहेतुः परिणामो गतिः। (त. भा. सिद्ध. वृ. ५–१७)। ५. गइउदयजपज्जाया चउगइगमणस्स हेउ वा हु गई। णारय-तिरिक्ख-माणुस-देवगइ त्ति य हवे चदुधा॥ (गो. जी. १४६)। ६. गतिः देशान्तरसंचाररूपा। (ध. बि. मु. वृ. ७–१९)। ७. मरणानन्तरं मनुजत्वादेः सकाशान्नारकत्वादौ जीवस्य गमनं गतिः। (स्थाना. अभय. वृ. १–२५, पृ. २०); चलनं मृत्वा वा गत्यन्तरगमनलक्षणः। (स्थाना. अभय. वृ. २, ३, ८५, पृ. ६२)। ८. तत्र गम्यते नैरयिकादिगतिकर्मोदयवशादवाप्यते इति गतिः नैरयिकत्वादिपर्यायपरिणतिः। (प्रज्ञाप. मलय. वृ. १३–१८०); गम्यते तथाविधकर्मसचिवैः प्राप्यते इति गतिर्नारकत्वादिपर्यायपरिणतिः। (प्रज्ञाप. मलय. वृ. २३, २९३, पृ. ४६९)।

१ गतिनामकर्म के उदय से जो चेष्टा निर्मित होती है उसे गति जानना चाहिए। २ 'गम्यते ऽसाविति गतिः' इस निरुक्ति के अनुसार नारक आदि के गति कहा जाता है। ३ गति नामकर्म के उदय से जो आत्मा की पर्याय उत्पन्न होती है उसे गति कहते हैं।

गतिनाम—१. यदुदयादात्मा भवान्तरं गच्छति सा गतिः। (स. सि. ८–११; त. श्लो. ८–११; भ. आ. मूला. २०९५)। २. गतिनामकर्मोदयादात्मनस्तद्भावपरिणामाद् गतिरौदयिकी। येन कर्मणा आत्मनो नारकादिभावावाप्तिर्भवति तद्गतिनाम। (त. वा. २, ६, १); यदुदयादात्मा भवान्तरं गच्छति सा गतिः। यस्य कर्मण उदयवशात् आत्मा भवान्तरं प्रत्यभिमुखो व्रज्यामास्कन्दति सा गतिः। (त. वा. ८, ११, १)। ३. गतिनाम यदुदयान्नरकादिगतिगमनम्। (श्रा. प्र. टी. २०)। ४. गतिनाम प्रति स्वं(?)गत्याभिधानकारणम्। (अनुयो. हरि. वृ. पृ ६३)। ५. जं णिरय-तिरिक्ख-मणुस्स-देवाणं णिव्वत्तयं कम्मं तं गदिणामं। (धव. पु. १३, पृ. ३६३)। ६. गतिनामोदयादेव गतिः ×××। (तत्त्वा. श्लो. २, ६, २)। ७. गतिर्भवति जीवानां गतिकर्मविपाकजा। (त. सा. २–३८)। ८. यया गच्छन्ति संसारं या कृता गतिकर्मणा। शुभ्रगत्यादिभेदेन गतिः सास्ति चतुर्विधा॥ (पंचसं. अमित. १–१३६, पृ. २७)। ९. गच्छन्ति प्राप्नुवन्ति तथाविधकर्मोदयसचिवा जीवास्तामिति गतिः नारकादिपर्यायपरिणतिस्तद्विपाकवेद्या कर्मप्रकृतिरपि गतिः, सैव नाम गतिनाम। (कर्मस्त. गो. वृ. १०, पृ. १६)। १०. गतिनाम यदुदयान्नारकादित्वेन जीवो व्यपदिश्यते। (समवा. अभय. वृ. ४२, पृ. ६३)। ११. गतिनामकर्मोदयाज्जातो नारकत्वादिपर्यायो गतिः, कार्ये कारणोपचारात्। अत्र कर्मोदयवशवर्तिना जीवेन गम्यते प्राप्यते इति गतिः इति निरुक्तिः। अथवा संसारिणां चतुर्गतिगमनस्य हेतुर्गतिनामकर्म। विवक्षितनारकादिपर्यायं गच्छन्ति संसारिणो जीवा यया सा गतिरिति निरुक्त्या गतिनामकर्मण एव चतुर्गतिगमनहेतुत्वसिद्धेः। (गो. जी. म. प्र. १४६)।

१ जिस कर्म के उदय से जीव अन्य भव को जाता है उसे गतिनामकर्म कहते हैं। ३ जिसके उदय से नरकादिगति के लिए गमन होता है वह नरकगति नामकर्म कहलाता है।

गतिपरिणाम— १. देशाद्देशान्तरप्राप्तिहेतुर्गतिः। (स. सि. ४–२१ व ५–१७; गो. जी. जी. प्र. १०५; त. वृत्ति श्रुत. ४–२१)। २. देशान्तर-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्राप्तिहेतुर्गतिः । उभयनिमित्तवशात् उत्पद्यमानः कायपरिस्पन्दो गतिरित्युच्यते । (त. वा. ४, २१, १); द्रव्यस्य देशान्तरप्राप्तिहेतुः परिणामो गतिः । द्रव्यस्य बाह्याभ्यन्तरहेतुसन्निधाने सति परिणममानस्य देशान्तरप्राप्तिहेतुः परिणामो गतिरित्युच्यते । (त. वा. ५, १७, १) । ३. उभयनिमित्तवशाद्देशान्तरप्राप्तिनिमित्तः कायपरिस्पन्दो गतिः । (त. श्लो. ४–२१) ।

१ जो अवस्था किसी एक देश से दूसरे देश की प्रति में कारण होती है उसे गति परिणाम कहा जाता है ।

गत्याख्यान—नरकादिप्रभेदेन चतस्रो गतयो मताः । तासां संकीर्तनं यद्धि गत्याख्यानं तदिष्यते ।। (म. पु. ४–१०) ।

नरकादि चारों गतियों का व्याख्यान करने को गत्याख्यान कहते हैं ।

गदामुद्रा— वामहस्तमुष्टेरुपरि दक्षिणमुष्टिं कृत्वा गात्रेण सह किञ्चिदुन्नामयेदिति गदामुद्रा । (निर्वाणक. १६–७, पृ. ३२) ।

बायें हाथ की मुट्ठी के ऊपर दाहिने हाथ की मुट्ठी को रखकर शरीर के कुछ ऊंचा करने को गदामुद्रा कहते हैं ।

गन्धनाम—१. यदुदयप्रभवो गन्धस्तद्गन्धनाम । (स. सि. ८–११; त. वा. ८, ११, १०) २. शरीरविषयं सौरभं दुर्गन्धित्वं च यस्य कर्मणो विपाकान्निवर्तते तद्गन्धनास । (त. भा. हरि. व सिद्ध. वृ. ८–१२) । ३. जस्स कम्मक्खंधस्स उदएण जीवसरीरे जादिपडिणियदो गंधो उप्पज्जदि तस्स कम्मक्खंधस्स गंधसण्णा । (धव. पु. ६, पृ. ५५); जस्स कम्मस्सुदएण सरीरे दुविहगंधणिप्फत्ती होदि तं गंधणामं । (धव. पु. १३, पृ. ३६४) । ४. गन्धनाम सुरभि-गन्धदुरभिगन्धनिबन्धनम् । (धर्मसं. मलय. वृ. ६१८) । ५. तथा गन्ध अर्दने, गन्ध्यते आघ्रायते इति गन्धः × × × तन्निबन्धनं गन्धनाम । (प्रज्ञाप. मलय. वृ. २३–२९३, पृ. ४७३) । ६. यदुदयाद् गन्धस्तद् गन्धनाम । (भ. आ. मूला. २१२४)। ७. यदुदयेन गन्धो भवति स गन्धः। (त. वृत्ति श्रुत. ८–११) ।

१, २ जिस नामकर्म के उदय से शरीर में सुगन्ध या दुर्गन्ध उत्पन्न हो उसे गन्धनाम कहते हैं ।

गन्धर्व— देखो गान्धर्व । १. इन्द्रादीनां गायकाः गन्धर्वाः । (धव. पु. १३, पृ. ३९१) । २. गन्धर्वाः प्रियदर्शनाः सुरूपाः सुमुखाकाराः सुस्वराः मौलिमुकुटधरा हारविभूषणाः । (बृहत्संग्रहणी मलय. वृ. ५८) ।

१ इन्द्र आदि के जो गान करने वाले देव होते हैं वे गन्धर्व कहलाते हैं । २ जो व्यन्तदेव देखने में सुन्दर, उत्तम स्वर से संयुक्त तथा मुकुट व हार से विभूषित होते हैं वे गन्धर्व कहलाते हैं ।

गमनक्रिया सूर्याभिमुखगमनादिका गमनक्रिया । (भ. आ. विजयो. व मूला. ८६) ।

सूर्य के अभिमुख जाने को गमनक्रिया कहते हैं । स्थानक्रिया, आसनक्रिया, शयनक्रिया और गमनक्रिया; ये नग्नता के माहात्म्य को सूचित करने वाली क्रियायें हैं ।

गमिकश्रुत—भिन्ने यदर्थजाते सदृशाक्षरालापकं तद् गमिकम् । (कर्मस्त. गो. वृ. १०, पृ. १३) ।

अर्थ की भिन्नता के होते हुए भी अक्षरों की समानता रखने वाले पाठों से युक्त शास्त्र को गमिक श्रुत कहते हैं ।

गरिमा—१. वज्जाहिंतो गुरुवत्तणं च गरिम त्ति भण्णंति ।। (ति. प. ४, १०२७) । २. वज्रादपि गुरुतरशरीरता गरिमा । (त. वा. ३, ३६, ३) । ३. वज्रादपि गुरुतरदेहता गरिमा । (चा. सा. पृ. ९७) । ४. गुरुशरीरविधानं गरिमा । (त. वृत्ति श्रुत. ३–३६) ।

१ जिस ऋद्धि के प्रभाव से वज्र से भी गुरुतर शरीर बनाया जा सके उसे गरिमा ऋद्धि कहते हैं ।

गरुडा—गरुडाकारविकरणप्रियाः गरुडा । (धव. पु. १३, पृ. ३९१) ।

जो देव गरुड के आकाररूप विक्रिया के करने में अनुराग रखते हैं वे गरुड कहे जाते हैं ।

गरुडमुद्रा—आत्मनोऽभिमुखदक्षिणहस्तकनिष्ठिकया वामकनिष्ठिकां संगृह्याधःपरावर्तितहस्ताभ्यां गरुडमुद्रा । (निर्वाणक. १६, ९, ६, पृ. ३३) ।

अपने अभिमुख दाहिने हाथ की कनिष्ठिका अंगुली से बायें हाथ की कनिष्ठिका को ग्रहण करके हाथों के नीचे परावर्तित करने से गरुडमुद्रा होती है ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गर्दतोय—गर्द्दाः शब्दाः तोयवत् प्रवहन्ति, लहरीतरङ्गवत् प्रवर्तन्ते येषु ते गर्द्दतोयाः। (त. वृत्ति श्रुत. ४–२५)।

शब्दों को गर्द और जल को तोय कहते हैं। जिनके मुख से शब्द जल की तरंग के समान प्रवाहित हों उन लौकान्तिक देवों को गर्दतोय कहते हैं।

गर्भ—१. स्त्रिया उदरे शुक्र-शोणितयोर्गरणं मिश्रणं गर्भः, मात्रोपभुक्ताहारगरणाद्वा गर्भः। (स. सि. २–३१)। २. शुक्र-शोणितयोर्गरणाद् गर्भः। यत्र शुक्र-शोणितयोर्गरणं मिश्रणं भवति स गर्भः। मात्रोपभुक्ताहारात्मसात्करणाद्वा। अथवा मात्रोपभुक्तस्याहारस्यात्मसात्करणाद् गरणाद् गर्भः। (त. वा. २, ३१, २–३)। ३. गर्भ इति स्त्रीयोनौ शुक्र-शोणितपुद्गलादानं गर्भणं गर्भः। (त. भा. हरि. वृ. २–३२)। ४. शुक्र-शोणितगरणाद् गर्भः, मातृप्रयुक्ताहारात्मसात्करणाद्वा। (त. श्लो. २–३१)। ५. तथा योषिद्योनावैकध्यमागत्य ग्रहणं शुक्र-शोणितयोर्यत् क्रियते जीवेन जनन्यभ्यवहृताहाररसपरिपोषापेक्षं तद् गर्भजन्मोच्यते। (त. भा. सिद्ध वृ. २–३२)। ६. गर्भः शुक्र-शोणितसंपातः। (सिद्धिवि. वृ. ९–२५, पृ. ६३८)। ७. शरीरपरिणतिकारण-शुक्र-शोणितस्य गरणं स्वीकारो गर्भः। (गो. जी. म. प्र. टी. ८३)। ८. जायमानजीवेन शुक्र-शोणितरूपपिण्डस्य गरणं-शरीरतया उपादानं गर्भः। (गो. जी. जी. प्र. टी. ८३; कार्तिके. टी. १३०)। ९. मातुरुदरे रेतःशोणितयोः गरणं मिश्रणं जीवसंक्रमणं गर्भः। (त. वृत्ति श्रुत. २–३१)।

१ स्त्री की योनि में जो वीर्य और रज का मिश्रण होता है उसे गर्भ कहते हैं, अथवा माता के द्वारा उपभुक्त आहार के आत्मसात् करने का नाम गर्भ है।

गर्भजन्मा—जायमानजीवेन शुक्र-शोणितरूपपिंडस्य गरणं शरीरतयोपादानं गर्भः, ततो जाता ये गर्भजाः तेषां गर्भजानां जन्म उत्पत्तिर्येषां ते गर्भजन्मानः। (कार्तिके. टी. १३०)।

गर्भ से उत्पन्न होने वाले जीवों को गर्भजन्मा कहते हैं।

गर्हा—१. गर्हेति हिंसा-पारुष्य-पैशून्यादियुक्तं वचः सत्यमपि गर्हितमेव भवतीति। (त. भा. ७–९)। २. गरहा वि तहा जाईअमेव नवरं परप्पगासणया। (आव. नि. १०५०)। ३. परसाक्षिकी गर्हा। (दशवै. हरि. वृ. ४–२, पृ. १४४)। ४. गर्हणं गर्हा कुत्सा, शास्त्रप्रतिसिद्धवागनुष्ठानं गर्हितम्, कुत्सितमिति यावत्। (त. भा. सिद्ध. वृ. ७–९)। ५. गर्हा परेषां [illegible]वं (सकलपरिग्रहत्यागो मुक्तेर्मार्गो मया तु पातकेन वस्त्र-पात्रादिकः परिग्रहः परीषहभीरुणा गृहीतः इत्येवं) कथनम्। (भ. आ. विजयो. ८७)। ६. जाते दोषे द्वेष-रागादिदोषैरग्रे भक्त्याऽऽलोचना या गुरूणाम्। पञ्चाचाराचारकाणामदोषा सोक्ता गर्हा गर्हणीयस्य हन्त्री॥ (अमित. श्रा. २–७७)। ७. गुरुसाक्षिकी गर्हा। (स्थानां. अभय. वृ. ३, ३, १६८; योगशा. स्वो. विव. ३–८२; कार्तिके. टी. ३२६)। ८. गरहणं—निर्दैव, गुर्वादिसाक्षिकेत्यर्थः। (भ. आ. मूला. ८७)। ९. गर्हणं तत्परित्यागः पञ्चगुर्वात्मसाक्षिकः। निष्प्रमादतया नूनं शक्तितः कर्महानये। (लाटीसं. ३–११७; पंचाध्या. २–४७४)।

१ हिंसा, कठोरता और पिशुनता आदि से युक्त वचन सत्य होने पर भी गर्हा युक्त होने से गर्हित कहे जाते हैं। २ दूसरे के समक्ष जो आत्मनिन्दा की जाती है उसका नाम गर्हा है। ५. समस्त परिग्रह का छोड़ना, यह मुक्ति का मार्ग है। पर मुझ पापी ने परीषह से डरकर वस्त्र व पात्र आदि परिग्रह को ग्रहण किया है, इस प्रकार दूसरों से कहना; इसका नाम गर्हा है।

गर्हित वचन—देखो गर्हा। १. कक्कसवयणं णिट्ठुरवयणं पेसुण्ण-हासवयणं च। जं किं चि विप्पलावं गरहिदवयणं समासेण॥ (भ. आ. विजयो. ८३०)। २. पैशून्य-हासगर्भं कर्कशमसमञ्जसं प्रलपितं च। अन्यदपि यदुत्सूत्रं सत्सर्वं गर्हितं गदितम्॥ (पु. सि. ९६)। ३. हिंसन-ताडन-भीषण-सर्वस्वहरण-पुरःसरविशेषम्। गर्ह्यवचो भाषन्ते गर्होज्झितवचनमर्मज्ञाः॥ (अमित. श्रा. ६–५५)।

१ कर्कश, निष्ठुर, पैशून्य (परदोषसूचक) और हास्यगर्भित वचनों को गर्हित वचन कहते हैं। इनके अतिरिक्त जो कुछ भी बकवाद किया जाता है, यह सब गर्हित वचन कहलाता है।

गल—गलो नाम प्रान्तन्यस्तामिषो लोहमयः कण्टको मत्स्यग्रहणार्थं जलमध्ये सचारितः। (उपदे. प. मु. वृ. १८८, पृ. १५१)।

२४. दृश्यते सामान्यरूपतया ऽवगम्यतेऽर्थोऽनेनेति दर्शनम्। (धर्मसं. मलय. वृ. ६०७); यत् यस्मादत्र विशेषाणां घटादीनाम्, निर्विशेषं विशेषरूपतापरिहारेण, सामान्याकारेणेति यावत्, ग्रहो दर्शनं भवति। (धर्मसं. मलय. वृ. १३६४)। २५. दर्शनं नाम सामान्य-विशेषात्मके वस्तुनि सामान्यावबोधः। (जीवाजी. मलय. वृ. १–१३, पृ. १८)। २६. सत्तालोचनमात्रमित्यपि निराकारं मतं दर्शनम् ××× । (प्रतिष्ठासा. २–९०)। २७. दृश्यतेऽनेनेति दर्शनं सामान्य-विशेषात्मके वस्तुनि सामान्यग्रहणात्मको बोधः। (प्रव. सारो. वृ. १२४९)। २८. दर्शनंवस्तुसामान्यांशग्राहि। (संग्रहणी दे. वृ. २७३)। २९. भावानां सामान्य-विशेषात्मकबाह्यपदार्थानाम्, आकारं भेदग्रहणम्, अकृत्वा यत्सामान्यग्रहणं स्वरूपमात्रावभासनं तत् दर्शनम्। (गो. जी. जी. प्र. टी. ४८२)। ३०. विशेषमकृत्वा सत्तावलोकनमात्रं दर्शनम्। (त. वृत्ति श्रुत. २–९)।

१ जो सामान्य को—द्रव्यार्थिक नय की विषयभूत सामान्य वस्तु को—ग्रहण करता है उसे दर्शन कहा जाता है। २ दर्शनावरण के क्षय या क्षयोपशम से जो निराकार आलोचन मात्र आविर्भूत होता है उसका नाम दर्शन है। ३. सामान्य को प्रधान और विशेष को गौण कर जो पदार्थ का ग्रहण होता है उसे दर्शन कहते हैं। ७ आत्मविषयक उपयोग दर्शन कहलाता है। सामान्य-विशेषात्मक आत्मस्वरूप के ग्रहण का नाम दर्शन है।

दर्शनकुशील—१. दंसण दंसणयारं (जो उ विराहेइ) ×××॥ (प्रव. सारो. ११०)। २. निस्संकिअ-निक्कंखिअ-निव्वितिगिच्छा अमूढदिट्ठी अ। उववूह-थिरीकरणे वच्छल्ल-पभावणे अट्ठ॥ अमुं पुनरष्टप्रकारं दर्शनाचारं विराधयति स दर्शने दर्शनविषये कुशीलः। (आव. ह. वृ. मल. हे. टि. पृ. ८२)। ३. दर्शनाचारं (निःशंकितादिकं) यो विराधयति, दर्शने दर्शनविषये कुशीलः। (प्रव. सारो. वृ. ११०)। ४. यस्तु दर्शनाचारं निःशंकितत्वादिकं विराधयति स दर्शने दर्शनकुशीलः। (व्यव. सू. भा. मलय. वृ., पृ. ११७)।

१ निःशंकित और निःकांक्षित आदि रूप आठ प्रकार के दर्शनाचार की विराधना करने वाले साधु को दर्शनकुशील कहते हैं।

दर्शनक्रिया—१. रागार्द्रीकृतत्वात् प्रमादिनो रमणीयरूपावलोकनाभिप्रायो दर्शनक्रिया। (स. सि. ६–५; त. वा. ६, ५, ९)। २. रागार्द्रीकृतचित्तत्वात् प्रशस्तस्य [प्रसक्तस्य] प्रमादिनः। रम्यरूपावलोकान्याभिप्रायो दर्शनक्रिया॥ (ह. पु. ५८-६९)। ३. रागार्द्रस्य प्रमत्तस्य सुरूपालोकनाशयः। स्याद्दर्शनक्रिया ××× ॥ (त. श्लो. ६, ५, १२)। ४. रागार्द्रीकृतस्य प्रमादवतः हृद्यरूपविलोकनाभिनिवेशो दर्शनक्रिया। (त. वृत्ति श्रुत. ६–५)।

१ राग के वशीभूत होकर प्रमादी हुए जीव के जो रमणीय रूप के देखने की अभिलाषा होती है उसे दर्शनक्रिया कहते हैं।

दर्शनपण्डित—१. क्षायिकेण क्षायोपशमिकेनोपशमिकेन वा सम्यग्दर्शनेन परिणतः दर्शनपण्डितः। (भ. आ. विजयो. टी. २५)। २. त्रिविधान्यतमसम्यक्त्वः दर्शनपण्डितः। (भा. प्रा. टी. ३२)।

१ क्षायिक, क्षायोपशमिक अथवा औपशमिक सम्यक्त्व से परिणत हुए जीव को दर्शनपण्डित कहते हैं।

दर्शनपण्डितमरण—व्यवहारपण्डितस्य मिथ्यादृष्टेः बालमरणं यथा भवति सम्यग्दृष्टेस्तदेव दर्शनपण्डितमरणम्। (भ. आ. विजयो. टी. २५)।

सम्यग्दर्शन से युक्त जीव के मरण को दर्शनपण्डितमरण कहते हैं।

दर्शनपुलाक—कुदृष्टिसंस्तवादिभिर्दर्शनपुलाकः। (त. भा. सिद्ध. वृ. ९–४९; प्रव. सारो. वृ. ७२३)। मिथ्यादृष्टियों की प्रशंसा—स्तुति आदि करने वाले साधु को दर्शनपुलाक कहते हैं।

दर्शनप्रतिमा—१. श्रावको यस्यां निःशंकितादिसम्यग्दर्शनो मासं स्यात् सा प्रथमा। ××× प्रथमं दर्शनप्रतिमा, तस्यां नन्दिचैत्यवन्दनकक्षमाश्रमणवासक्षेपविधिः दर्शनप्रतिमाभिलापेन। (आ. दि. पृ. ५१)। २. पसमाइगुणविसिट्ठं कुग्गहसंकाइसल्लपरिहीणं। सम्मद्दंसणमणहं दंसणपडिमा हवइ पढमा॥ (प्रव. सारो. ९८२)। ३. अयमत्र भावार्थः—सम्यग्दर्शनस्य कुग्रहशंकादिशल्यरहितस्याणुव्रतादिगुणविकलस्य योऽभ्युपगमः सा दर्शनप्रतिमा। (प्रव. सारो. वृ. ९८२)।

२ प्रशम, संवेग, निर्वेद, अनुकम्पा व आस्तिक्य इन पांच गुणों से युक्त और दुराग्रह व शंकादि शल्यों से

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विहीन जो निर्मल सम्यग्दर्शन है उसे दर्शनप्रतिमा कहते हैं। वह ग्यारह प्रतिमाओं में प्रथम है।

दर्शनबाल—मिथ्यादृष्टयः सर्वथा तत्त्वश्रद्धानरहिताः दर्शनबालाः। (भ. आ. विजयो. टी. २५)। तत्त्वार्थश्रद्धान से सर्वथा रहित मिथ्यादृष्टि जीवों को दर्शनबाल कहते हैं।

दर्शनबालमरण—देखो इच्छाप्रवृत्त व अनिच्छाप्रवृत्त दर्शनबालमरण।

दर्शनबाल-इच्छामरण—तयोराद्यमग्निना धूमेन शस्त्रेण विषेण उदकेन मरुत्प्रपातेन उच्छ्वासनिरोधेन अतिशीतोष्णपातेन रज्ज्वा क्षुधा तृषा जिह्वोत्पाटनेन विरुद्धाहारसेवनया वाला मृतिं ढौकन्ते कुतश्चिन्निमित्ताज्जीवितपरित्यागैषिणः। (भ. आ. विजयो. टी. २५)।

अग्नि, धूम, शस्त्र, विष, जल, वायुप्रपात, उच्छ्वासनिरोध, अति शीतपात, अति उष्णपात, रस्सी, भुख, प्यास, जीभ का उत्पाटन और विरुद्ध आहार के सेवन से जो दर्शनबाल मरण को प्राप्त होते हैं उनके इस प्रकार के मरण को दर्शनबाल-इच्छामरण कहते हैं।

दर्शनबोधि— दर्शनबोधिः दर्शनमोहनीयक्षयोपशमादिसम्पन्नः श्रद्धानलाभः। (स्थाना. अभय. वृ. २, ४, १०३, पृ. ९१)।

दर्शनमोहनीयकर्म के क्षयोपशमादि से सम्पन्न जो सम्यक्त्वकी प्राप्ति होती है उसे दर्शनबोधि कहते हैं।

दर्शनमोह—१. दर्शनं मोहयति मोहनं व दर्शनमोहः। (त. वा. ६, १३, १३); दर्शनमोहस्य प्रकृतिः तत्त्वार्थाश्रद्धानम्। (त. वा. ८, ३, ४; अन. ध. स्वो. टी. २-३९)। २. दर्शनं मोहयति मोहनमात्रं वा दर्शनमोहः। (त. श्लो. ६-१३)। ३. तत्त्वार्थश्रद्धानं दर्शनम्, तन्मोहनाद् दर्शनमोहनीयम्। (त. भा. सिद्ध. वृ. ८-१०)। ४. दंसणं अत्तागम-पदत्थेसु रुई पच्चओ सद्धा फोसणमिदि एयट्ठो, तं मोहेदि विवरीयं कुणदि त्ति दंसणमोहणीयं। जस्स कम्मस्स उदएण अणत्ते अत्तबुद्धी अणागमे आगमबुद्धी अपयत्थे पयत्थबुद्धी अत्तागमपयत्थेसु सद्धाए अत्थिरत्तं दोसु वि सद्धा वा होदि तं दंसणमोहणीयमिदि उत्तं होदि। (धव. पु. ६, पृ. ३८); दंसणस्स मोहयं विवरीयभावजणणं दंसणमोहणीयं णाम। (धव. पु. १३, पृ. ३५८)। ५. दर्शनमोहोदये सति निश्चयशुद्धात्मरुचिरहितस्य व्यवहाररत्नत्रय-तत्त्वार्थरुचिरहितस्य वा योऽसौ विपरीताभिनिवेशपरिणामः स दर्शनमोहः। (पंचा. का. जय. वृ. १३१)। ६. शुद्धात्मादितत्त्वेषु विपरीताभिनिवेशजनको मोहो दर्शनमोहो मिथ्यात्वम्। (बृ. द्रव्यसं. टी. ४८)। ७. तत्र दर्शनं सम्यग्दर्शनम्, तन्मोहयतीति दर्शनमोहनीयम्। (श्रा. प्र. टी. १५)। ८. तत्त्वार्थश्रद्धानं दर्शनम्, तन्मोहयति विपर्यासं गमयतीति दर्शनमोहनीयम्। (कर्मस्त. गो. वृ. १०, पृ. १५)। ९. दर्शनं सम्यग्दर्शनं तत्त्वार्थश्रद्धानलक्षणम्, तन्मोहयतीति दर्शनमोहनीयम्। (धर्मसं. मलय. वृ. ६१२)। १०. तत्रापि दृष्टिमोहाख्यं मिथ्यादृष्टिविपाककृत्। (त्रि. श. पु. च. २, ३, ४७०)। ११. एवं च सति सम्यक्त्वे गुणे जीवस्य सर्वतः। तं मोहयति यत्कर्म दृङ्मोहाख्यं तदुच्यते॥ (पंचाध्या. २-१००२)।

१ जो तत्त्वार्थश्रद्धानरूप दर्शन को मोहित करता है उसे दर्शनमोह कहते हैं।

दर्शनविनय—१. जे अत्थपज्जया खलु उवदिट्ठा जिणवरेहिं सुदणाणे। ते तह रोचेदि णरो दंसणविणयो हवदि एसो॥ (मूला. ५-१६९; ७-८८)। २. भत्ती पूया वण्णजणणं च णासणमवण्णवादस्स। आसादणपरिहारो दंसणविणओ समासेण॥ (भ. आ. ४७)। ३. शंकादिदोषविरहितं तत्त्वार्थश्रद्धानं दर्शनविनयः। (स. सि. ९-२३)। ४. पदार्थश्रद्धाने निःशंकितत्वादिलक्षणोपेतता दर्शनविनयः। सामायिकादौ लोकबिन्दुसारपर्यन्ते श्रुतसमुद्रे ये यथा भगवद्भिरुपदिष्टाः पदार्थाः तेषां तथा श्रद्धाने निःशंकितत्वादिलक्षणोपेतता दर्शनविनयो वेदितव्यः। (त. वा. ९, २३, ३; चा. सा. पृ. ६५)। ५. शंकाकांक्षादिनिरासो दर्शनविनयः। (भ. आ. विजयो. ३००)। ६. तत्त्वार्थश्रद्धाने निःशंकितत्वादिलक्षणोपेतता दर्शनविनयः। (त. श्लो. ९-२३)। ७. दंसणविणओ णाम पवयणेसुवइट्ठसव्वभावसद्दहणं तिमूढादो ओसरणमट्ठमलच्छद्दणमरहंत-सिद्धभत्ती खणलवपडिबुज्झणदा लद्धिसंवेगसपण्णदा च। (धव. पु. ८, पृ. ८०)। ८. दर्शनविनयो निःशंक-निःकांक्षादिभेदः। (त. भा. सिद्ध. वृ. ६-२३)। ९. यत्र निःशंकितत्वादिलक्षणोपेतता भवेत्। श्रद्धाने सप्ततत्त्वानां सम्यक्त्वविनयः स हि॥ (त. सा. ७-३१)। १०. जिनेशानां विमुक्तानामाचार्याणां विपश्चिताम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साधूनां जिनचैत्यानां जिनराद्धान्तवेदिनाम् ।। कर्त्तव्या महती भक्तिः सपर्या गुणकीर्तनम् । अपवादतिरस्कारः सम्भ्रमः शुभदृष्टिभिः ।। (अमित. श्रा. १३, ८–९) । ११. येऽर्थपर्याया जीवाजीवादयः सूक्ष्म-स्थूलभेदेनोपदिष्टाः स्फुटं जिनवरैः श्रुतज्ञाने द्वादशांगेषु चतुर्दशपूर्वेषु तान् पदार्थांस्तथैव तेन प्रकारेण याथात्म्येन रोचयति नरो भव्यजीवो येन परिणामेन स एष दर्शनविनयः । (मूला. वृ. ५, ६९); शंकादिपरिणामपरिहारे यत्नः उपगूहनादिपरिणामानुष्ठाने च यत्नो दर्शनविनयः । (मूला वृ. ५–१७१) । १२. णिस्संकियसंवेगाइ जे गुणा वण्णिया मए पुव्वं । तेसिमणुपालणं जं स वियाणीहि दंसणे विणओ । (वसु. श्रा. ३२१) । १३. सामायिकादौ लोकविन्दुसारपर्यन्ते श्रुते भगवत्प्रकाशितपदार्थान्यथात्वासम्भवात् तत्त्वार्थश्रद्धा निःशंकितत्वादिना दर्शनविनयः । (योगशा. स्वो. विव. ४, ९०) । १४. दर्शनं प्रति विनीतत्वाद्दर्शनप्राधान्यविवक्षया दर्शनविनय उच्यते । (व्यव. भा. मलय. वृ. १–६४, पृ. २७) । १५. तत्त्वार्थश्रद्धाने शंकादिदोषरहितत्वं दर्शनविनयः । (त. वृत्ति श्रुत. ९–२३) । १६. तत्त्वश्रद्धाने निःशंकितत्वादिदर्शनविनयः । (भा. प्रा. टी. ७८) । १७. दर्शने तत्त्वार्थश्रद्धानलक्षणे निश्चय-व्यवहारसम्यक्त्वे निःशंकितत्वादिदोषरहितं स्वस्वरूपशुद्धबुद्धैकात्मनि श्रद्धानरुचिलक्षणं वा दर्शनविनयः । (कार्तिके. टी. ४५५) ।

४ चूंकि आगम में जिनप्ररूपित पदार्थों का स्वरूप अन्यथा हो नहीं सकता, अतएव निःशंकित आदि आठ अंगों के साथ तत्त्वार्थ का श्रद्धान करना, इसका नाम दर्शनविनय है ।

दर्शनविशुद्धि—१. जिनेन भगवताऽर्हत्परमेष्ठिनोपदिष्टे निर्ग्रन्थलक्षणे मोक्षवर्त्मनि रुचिर्दर्शनविशुद्धिः । (स. सि. ६–२४) । २. जिनोपदिष्टे निर्ग्रन्थे मोक्षवर्त्मनि रुचिः निःशंकितत्वाद्यष्टांगा दर्शनविशुद्धिः । जिनेन भगवताऽर्हता परनेष्ठिनोपदिष्टे निर्ग्रन्थलक्षणे मोक्षवर्त्मनि रुचिर्दर्शनविशुद्धिः । (त. वा. ६, २४, १) । ३. दंसणं सम्मद्दंसणं, तस्स विसुज्झदा । ××× तिमूढावोढ-अट्ठमलवदिरित्तसम्मद्दंसणभावो दंसणविसुज्झदा णाम । (धव. पु. ८, पृ. ७९–८०) । ४. निःशंकाद्यष्टगुणा जिनकथिते मोक्षसत्पथे श्रद्धा । दर्शनविशुद्धिराद्यस्तीर्थकरप्रकृतिकृद्धेतुः । (ह. पु. ३४–१३२) । ५. जिनोद्दिष्टेति नैर्ग्रन्थ्यमोक्षवर्त्मन्यशंकनम् । अनाकांक्षणमप्यत्रामुत्र चैतत्फलाप्तये ।। विचिकित्सान्यदृष्टीनां प्रशंसा-संस्तवच्युतिः । मौढ्यादिरहितत्वं च विशुद्धिः सा दृशो मता ।। (त. श्लो. ६, २४, १–२) । ६. निःशंकितत्वादिगुणपरिणतिर्दर्शनविशुद्धिः । (भ. आ. विजयो. १६७) । ७. दृष्टिः दर्शनं तत्त्वविषया रुचिः प्रीतिः जीवादिषु प्रत्ययावधारणम्, तस्य दर्शनस्य नाना(वि)शुद्धिः निर्मलता ××× क्षायोपशमिकौपशमिक-क्षायिकाणां सम्यग्दर्शनानां यथास्वं नाना शुद्धिर्विशुद्धिः ××× । (त. भा. सिद्ध. वृ. ६–२३) । ८. उपलब्धनिजस्वरूपस्य सम्यग्दर्शनस्य प्रथम-द्वितीयोपशमक-वेदक-क्षायिकान्यतमविशिष्टस्य ज्ञान-दर्शन-तपश्चारित्रेषु तद्वत्सु च विनये, अभीक्ष्णज्ञानोपयोगसंवेगयुक्तत्वे, साधुभ्यः प्रासुकप्रदाने, द्वादशविधतपसि, साधूनां समाधिवैयावृत्यकरणे अर्हत्सु व्रतशीलावश्यकसम्पन्नाचार्येषु च बहुश्रुतेषु प्रवचने च भक्तौ प्रवचनप्रभावने, प्रवचनवत्सलत्वे प्रवर्तनं विशुद्धता । (चा. सा. पृ. २५)। ९. दृशः सम्यक्त्वस्य विशुद्धिः शंकादिमलनिरासेन सम्पादितप्रसादो नैर्मल्यमिति यावत् । (अन. ध. स्वो. टी. २–११०) । १०. दर्शनस्य सम्यक्त्वस्य विशुद्धिर्निर्मलता दर्शनविशुद्धिः । (त. वृत्ति श्रुत. ६–२४) । ११. एतैरष्टभिः (निःशंकितत्वादिभिः) गुणैर्युक्तत्वं चर्म-जल-तैल-घृत-भूतनाशनाऽप्रयोगत्वं-मूलक-गर्जर-सूरण-कन्द-गृंजन-पलाण्डु-विश-दौग्धिक-कालिंगपंच-पुष्पसंधानक - कौसुंभपत्र-पत्रशाक-मांसादिभक्षकभाजन-भोजनादिपरिहरणं च दर्शनविशुद्धिः । (भा. प्रा. टी. ७७) ।

१ जिन देव के द्वारा प्ररूपित निर्ग्रन्थतारूप मोक्षमार्ग के विषय में जो रुचि होती है उसे दर्शनविशुद्धि कहते हैं ।

दर्शनशुद्ध—भय-वसण-मलविवज्जिय संसार-सरीर-भोगणिव्विण्णो । अट्ठगुणंगसमग्गो दंसणसुद्धो हु पंचगुरुभत्तो ।। (रयणसार ५) ।

सात भय, सात व्यसन और पच्चीस दोषों से रहित; संसार, शरीर और भोगों से विरक्त तथा निः-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शंकितादि आठ अंगों से युक्त होकर जो पांच परमेष्ठियों का भक्त होता है उसे दर्शनशुद्ध कहा जाता है।

दर्शनसमाधि—(सम्यगाधियते व्यवस्थाप्यते मोक्षं तन्मार्गं वा प्रति येनात्मा धर्मध्यानादिना स समाधिः धर्मध्यानादिकः) दर्शनसमाधौ व्यवस्थितो जिनवचनभावितान्तःकरणो निवातशरणप्रदीपवन्न कुमतिवायुभिर्भ्राम्यते। (सूत्रकृ. नि. शी. वृ. १०६, पृ. १८७)।

जिसके द्वारा जीव धर्मध्यान आदि के आश्रय से मोक्ष या उसके मार्ग में स्थापित किया जाता है उसका नाम समाधि है जो धर्मध्यानादिस्वरूप है। जिसका अन्तःकरण जिनागम के संस्कार से निर्मल हो चुका है वह दर्शनसमाधि में स्थित होता हुआ वायुविहीन दीपक के समान कुबुद्धिरूप वायु के वशीभूत होकर इधर-उधर चतुर्गतिरूप संसार में परिभ्रमण नहीं करता है।

दर्शनाचार—१. णिस्संकिय णिक्कंखिय णिव्वितिगिच्छा अमूढदिट्ठी य। उववूह-थिरीकरणे वच्छल्ल-पभावणे अट्ठ॥ अतिसेस इड्ढि आयरिय वादि धम्मकधि खमग णेमित्ती। विज्जा राया गणसम्मया य तित्थं पभावेंति॥ (दशवै. नि. १८२-८३ पृ. १०१)। २. तत्त्वश्रद्धानपरिणामो दर्शनाचारः। (भ. आ. विजयो. ४६); जीवादितत्त्वश्रद्धानपरिणतिः दर्शनाचारः। (भ. आ. विजयो. ४१९)। ३. चल-मलिनावगाढरहितत्वेन निश्चयश्रद्धानबुद्धिः सम्यक्त्वम्, तत्राचरणं परिणमनं दर्शनाचारः। (परमा. टी. ७)। ४. दर्शनाचारः सम्यक्त्ववतां व्यवहारो निःशंकितादिरूपोऽष्टधा। (समवा. अभय. वृ. १३६, पृ. १००)। ५. तत्त्वार्थविषयपरमार्थश्रद्धानुष्ठानं दर्शनाचारः। (मूला. वृ. ५-२); दर्शनाचारः शंकाद्यभावेन तत्त्वश्रद्धानविषयो यत्नः। (मूला. वृ. ५-१७१)। ६. दर्शने निर्मला वृत्तिर्ज्ञान-चारित्रसम्पदः। पदे मुक्तिरमादर्शे दर्शनाचार ईरितः॥ (आचा. सा. ३-७२)। ७. जीवादितत्त्वश्रद्धानपरिणतिदर्शनाचारः। (भ. आ. मूला. टी. ४१९)।

१ निःशंकितादि आठ अंगयुक्त सम्यक्त्व का परिपालन करना, इसका नाम दर्शनाचार है। अतिशययुक्त, ऋद्धि धारक, आचार्य, वादी, धर्मकथक, क्षमक या क्षपक (तपस्वी), ज्योतिषी, वैद्य, राजा और गणसाम्यक; ये तीर्थ को प्रभावित करते हैं।

दर्शनघाती—णव य पदत्था एदे जिणदिट्ठा वण्णिदा मए तच्चा। एत्थ भवे जा संका दंसणघादी हवदि एसो॥ बलदेव-चक्कवट्टी-सेट्ठी-रायत्तणादिअहिलासो। इह परलोगे देवत्तपत्थणा दंसणाभिघादी सो॥ (मूला. ५, ५१ व ५३)।

जिन भगवान् के द्वारा तत्त्वस्वरूप जिन नौ पदार्थों का वर्णन किया गया है उनके विषय में जो शंका रखते हैं वे दर्शनघाती हैं। इसी प्रकार इस लोक में जो बलदेव, चक्रवर्ती, श्रेष्ठी (सेठ) और राजा आदि के पद की अभिलाषा करते हैं एवं परलोक में देवत्व की प्रार्थना करते हैं वे भी दर्शनघाती हैं।

दर्शनावरण—१. दर्शनावरणस्य अर्थानालोचनम्। (त. वा. ८, ३, ४)। २. दंसणमावारेदि त्ति दंसणावरणीयं। जो पोग्गलक्खंधो मिच्छत्तासंजमकसाय-जोगेहि कम्मसरूवेण परिणदो जीवसमवेदो दंसणगुणपडिवंधओ सो दंसणावरणीयं। (धव. पु. ६, पृ. १०); दंसणस्स आवारयं कम्मं दंसणावरणीयं। (धव. पु. १३, पृ. २०८)। ३. दंसणसीले जीवे दंसणघायं करेइ जं कम्मं। तं पडिहारसमाणं दंसणवरणं भवे वीयं॥ जह रण्णो पडिहारो अणभिप्पेयस्स सो उ लोयस्स। रण्णो तहि दरिसावं न देइ दट्ठुंपि कामस्स॥ जह राया तह जीवो पडिहारसमं तु दंसणावरणं। तेणिह विवंधएणं न पिच्छए सो घडाईयं॥ (कर्मवि. ग. १९-२१)। ४. त एव दृश्यन्तेऽवलोक्यन्ते येन तद्दर्शनम्, तस्यावरणं दर्शनावरणम्। (पंचसं. स्वो. वृ. ३-११९, पृ. ३३)। ५. एवमिह दंसणावरणमेयमावरइ दरिसणं जीवे। (प्रव. सारो. १२५५)। ६. दृश्यतेऽनेनेति दर्शनम्—सामान्य-विशेषात्मके वस्तुनि सामान्यग्रहणात्मको बोधो दर्शनम्, तस्यावरणस्वभावं कर्म दर्शनावरणम्। (प्रज्ञाप. मलय. वृ. २२-२८, पृ. ४५३; कर्मस्त. गो. वृ. १०, पृ. १४; प्रव. सारो. वृ. १२४९)। ७. पंचनिद्रादर्शनानां चतुष्कस्यावृतिश्च या। दर्शनावरणीयस्य विपाकः कर्मणः स तु॥ यथा दिदृक्षुः स्वमीशं प्रतिहारनिरोधतः। न पश्यति तथाऽत्मापि येन दृष्ट्यावृतिस्तु तत्॥ (त्रि. श. पु. च. २, ३, ४६७-८)।

१ दर्शनावरण की प्रकृति पदार्थ का अवलोकन न

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

होने देना है, अर्थात् जो पदार्थ के दर्शन में बाधक हो उसे दर्शनावरण कहते हैं। ३ दर्शन गुण के आवारक कर्म को दर्शनावरण कहा जाता है। जैसे—प्रतीहार (द्वारपाल) राजा के दर्शन की इच्छा रखने वाले व्यक्ति को उसके दर्शन में बाधा पहुंचाता है वैसे ही दर्शनावरण कर्म पदार्थों के दर्शन में बाधा पहुंचाता है।

दर्शनावरणीय—देखो दर्शनावरण।

दर्शनार्य—दर्शनार्या दशधा आज्ञा-मार्गोपदेश-सूत्र-बीज-संक्षेप-विस्तारार्थावगाढ-परमावगाढरुचिभेदात्। (त. वा. ३, ३६, २)।

गुणी जन जिनकी सेवा किया करते हैं उन्हें आर्य कहा जाता है। सम्यग्दर्शन से सम्पन्न आर्य दर्शन-आर्य कहलाते हैं। वे आज्ञारुचि, मार्गरुचि और उपदेशरुचि आदि के भेद से दस प्रकार के हैं। (इन सबके लक्षण पृथक् उन-उन शब्दों में देखिए)।

दर्शनिक—१. सम्यग्दर्शनशुद्धः संसार-शरीर-भोग-निर्विण्णः। पंचगुरुचरणशरणो दर्शनिकस्तत्त्वपथ-गृह्यः॥ (रत्नक. १३७)। २. बहु-तससमण्णिदं जं मज्जं मंसादि णिंदिदं दव्वं। जो ण य सेवदि णियदं सो दंसणसावओ होदि॥ (कार्तिके. ३२८)। ३. तत्र दार्शनिकः संसार-शरीर-भोगनिर्विण्णः पंच-गुरुचरणभक्तः सम्यग्दर्शनविशुद्धश्च भवति। (चा. सा. पृ. २)। ४. यो निर्मलां दृष्टिमनन्यचित्तः पवित्रवृत्तामिव हारयष्टिम्। गुणावनद्धां हृदये निधत्ते स दर्शनी धन्यतमोऽभ्यधायि॥ (अमित. श्रा. ७-६७)। ५. शङ्कादिदोषनिर्मुक्तं संवेगादिगुणा-न्वितम्। यो धत्ते दर्शनं सोऽत्र दर्शनी कथितो जिनैः॥ (सुभा. सं. ८३३)। ६. हारयष्टिरिव तापहारिणी यस्य दृष्टिरवतिष्ठते हृदि। यामिनी-पतिमरीचिनिर्मला दर्शनी भवति सोऽनघद्युतिः॥ (धर्मप. २०-५३)। ७. सम्यक्त्वपूर्वकत्वेन मद्य-मांस- मधुत्यागोदुम्बरपंचकपरिहाररूपाष्टमूलगुणस-हितः सन् संग्रामादिप्रवृत्तोऽपि पापद्धर्यादिभिर्निष्प्र-योजनजीवघातादौ निवृत्तः प्रथमो दर्शनिकश्रावको भण्यते। (बृ. द्रव्यसं. टी. ४५)। ८. पंचुंवरसहि-याई सत्तवि विसणाइ जो विवज्जेई। सम्मत्तविशु-द्धमई सो दंसणसावओ भणिओ॥ (वसु. श्रा. ५७)। ९. पाक्षिकाचारसंस्कारदृढीकृतविशुद्धदृक्। भवांग-भोगनिर्विण्णः परमेष्ठिपदैकधीः॥ निर्मूलयन् मलान् मूलगुणेष्वग्रगुणोत्सुकः। न्याय्यां वृत्तिं तनुस्थित्यै तन्वन् दर्शनिको मतः॥ (सा. ध. ३, ७-८)। १०. गृही दर्शनिकस्तत्र सम्यक्त्वगुणभूषितः। संसार-भोगनिर्विण्णो ज्ञानी जीवदयापरः॥ (भावसं. वाम. ४४८)। ११. पाक्षिकाचारसम्पत्त्या निर्मलीकृत-दर्शनः। विरक्तो भव-भोगाभ्यामर्हदादिपदार्चकः॥ मलान् मूलगुणानां निर्मूलयन्नग्रिमोत्सुकः। न्याय्यां वार्त्तां वपुःस्थित्यै दधद्दर्शनिको मतः॥ (धर्मसं. श्रा. ५, १४-१५)। १२. अष्टमूलगुणोपेतो द्यूतादिव्य-सनोज्झितः। नरो दर्शनिकः प्रोक्तः स्याच्चेत् सद्-र्शनान्वितः॥ (लाटीसं. २-६)।

१ जो सम्यग्दर्शन से शुद्ध होकर संसार, शरीर और भोगों से विरक्त है तथा पांच परमेष्ठियों के चरणों को शरण मानता है वह दर्शनिक श्रावक कह-लाता है।

दर्शनी—देखो दर्शनिक।

दर्शनीय—दर्शनीयो यं पश्यच्चक्षुर्न श्राम्यति। (विपाक. अभय. वृ. २., पृ. २२)।

जिसे देखते हुए नेत्र थकते नहीं उसे दर्शनीय कहते हैं।

दर्शनोपयोग—१. को दंसणोवजोगो णाम ? अंत-रंगउवजोगो। (धव. पु. ११, पृ. ३३३)। २. अंत-रंगविसयस्स उवजोगस्स दंसणत्तब्भुवगमादो। ××× तम्हा विसय-विसयिसंपायादो पुव्वं चेव विसयीकयंतरंगो दंसणुवजोगो उप्पज्जदि त्ति घेत्तव्वो। (जयध. १, पृ. ३३७-३३८)।

१ अन्तरंग—आत्मविषयक—उपयोग का नाम दर्शनोपयोग है।

दवदान—१. व्यसनात् पुण्यबुद्धया वा दवदानम् भवेद् द्विधा। (योगशा. ३-११४); दवस्य दावा-ग्नेः तृणादिदहननिमित्तं दानं वितरणं दवदानम्। (योगशा. स्वो. विव. ३-११४)। २. दवदानं दा-वाग्नेस्तृणादिदहनार्थं वितरणम्। (सा. ध. स्वो. टी. ५-२२)।

१ व्यसन से—फलनिरपेक्ष अभिप्राय से—घास आदि के जलाने के लिए अग्नि को प्रज्वलित करना, जैसे भील जंगल में आग लगाया करते हैं। अथवा पुराने घास आदि जला देने पर नवीन तृणांकुर उत्पन्न होंगे और उन्हें गायें चरेंगी, इस प्रकार की पुण्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बुद्धि से अग्नि को प्रज्वलित करना, इसका नाम दवदान है।

दशपूर्वी—१. रोहिणिपहुदीण महाविज्जाणं देवदाओ पंच सया। अंगुट्ठपसेणाइं खुल्लयविज्जाण सत्त सया ॥ एत्तूण पेसणाइं मग्गंते दसमपुव्वपढणम्मि। णेच्छंति संजमत्ता ताओ जे ते अभिण्णदसपुव्वी ॥ भुवणेसु सुप्पसिद्धा विज्जाहरसमणणामपज्जाया। ताणं मुणीण बुद्धी दसपुव्वी णाम बोद्धव्वा ॥ (ति. प. ४, ९९८–१०००)। २. महारोहिण्यादिभिस्त्रिभिरागताभिः प्रत्येकमात्मीयरूपसामर्थ्याविष्करणकथनकुशलाभिरविचलितचारित्रस्य दशपूर्वदुस्तरसमुद्रोत्तरणं दशपूर्वित्वम्। (त. वा. ३, ३६, ३)।

१ दशवें विद्यानुवाद पूर्व के पढ़ते हुए रोहिणी आदि पांच सौ महाविद्याओं के तथा अंगुष्ठप्रसेनादि सात सौ छोटी विद्याओं के द्वारा सिद्ध होकर अभीष्ट कार्यसिद्धि के लिए प्रार्थना करने पर भी जो उनकी इच्छा न करते हुए चारित्र से विचलित नहीं होते हैं उन विद्याधर श्रमणों को दशपूर्वी कहते हैं।

दशमी प्रतिमा— दशमासानात्मार्थनिष्पन्नमाहारं न भुङ्क्त इति दशमी। (योगशा. स्वो. विव. ३–१४८)।

अपने निमित्त बने हुए आहार के खाने का दस मास तक त्याग करने को दशमी प्रतिमा कहते हैं।

दशवैकालिक— १. दश विकाले पुत्रहिताय स्थापितान्यध्ययनानि दशवैकालिकम्। (त. भा. हरि. वृ. १–२०)। २. दशवेयालियं आयार-गोयरविहिं वण्णेइ। (धव. पु. १, पृ. ९७); दसवेयालियं दव्व-खेत्त-काल-भावे अस्सिदूण आयारगोयरविहिं वण्णेदि। (धव. पु. ९, पृ. १९०)। ३. साहूणमायार-गोयरविहिं दसवेयालियं वण्णेदि। (जयध. पु. १, पृ. १२०)। ४. दुम-पुष्पितादिदशाधिकारैर्मुनिजनाचरणसूचकं दशवैकालिकम्। (श्रुतभ. टी. २४, पृ. १७९)। ५. विशिष्टाः काला विकालास्तेषु भवानि वैकालिकानि वर्ण्यन्तेऽस्मिन्निति दशवैकालिकम्, तत्साधूनामाचार-गोचरविधिं पिण्डशुद्धिलक्षणं च वर्णयति। (गो. जी. म. प्र. व जी. प्र. टी. ३६७–६८)। ६. वृक्षकुसुमादीनां दशानां भेदकथकं यतीनामाचारकथकं च दशवैकालिकम्। (त. वृत्ति. श्रुत. १–२०)। ७. जदिगोचरस्स विहिं पिंडविशुद्धिं च जं परूवेदि। दसवेयालियसुत्तं दह काला जत्थ संवुत्ता ॥ (अंगप. ३–२४, पृ. ३०८)।

१ मनक नामक पुत्र के हित के लिए शय्यमभव सूरि के द्वारा अकाल में रचे गये दश अध्ययन स्वरूप श्रुत को दशवैकालिक कहा जाता है। २ द्रव्य, क्षेत्र, काल और भाव का आश्रय लेकर मुनियों के आचार और गोचर (भिक्षाटन) की विधि अथवा आचारविषयक विधि के वर्णन करने वाले श्रुत को दशवैकालिक कहते हैं।

दहन—१. दहनं प्रतीतमूल्मुकादिभिः। (ध्यानश. हरि. वृ. १९)। २. बालादित्यसमज्योतीरत्युष्णश्चतुरंगुलः। आवर्तवान् वहन्नूर्ध्वं पवनो दहनः स्मृतः ॥ (योगशा. ५–५१)।

१ उल्मुक (अलात) आदि के द्वारा दहन प्रसिद्ध है। २ उदित होते हुए सूर्य के समान कान्ति वाली, अत्यन्त उष्ण और चार अंगुल ऊंची ऐसी ऊपर संचार करने वाली आवर्त (गोलाकार भ्रमण) युक्त वायु को दहन कहा जाता है।

दंशमशकपरीषहजय—१. दंशमशक-मक्षिका-पिशुक-पुत्तिका-मत्कुण-कीट-पिपीलिकाऽवृश्चिकादिकृतां बाधामप्रतिकारां सहमानस्य तेषां बाधां त्रिधाऽप्यकुर्वाणस्य निर्वाणप्राप्तिमात्रसंकल्पप्रावरणस्य तद्वेदनासहनं दंशमशकपरिषहक्षमा। (स. सि. ९–९)। २. दंशमशकादिबाधासहनमप्रतीकारम्। प्रत्याख्यातशरीराच्छादनस्य क्वचिदपि अप्रतिबद्धचेतसः परकृतायतन-गुहा-गह्वरादिषु रात्रौ दिवा वा दंशमशक-मक्षिका-पिशुक-पुत्तिका-यूक-मत्कुण-कीट-पिपीलिका-वृश्चिकादिभिः तीक्ष्णपातैर्भक्ष्यमाणस्यातितीव्रवेदनोत्पादकैः अव्यथितमनसः स्वकर्मविपाकमनुचिन्तयतो विद्या-मंत्रौषादिभिः तन्निवृत्तिं प्रति निरुत्सुकस्य आ शरीरपतनादपि निश्चितात्मनः परबलप्रमर्दनं प्रति प्रवर्तमानस्य मदान्धगन्धसिन्धुरस्य रिपुजनप्रेरितविविधशस्त्रप्रतिघातादपराङ्मुखस्य निःप्रत्यूहविजयोपलम्भनमिव कर्मागतपृतानापराभवं प्रति प्रयतनं दंशमशकादिबाधासहनमप्रतीकारमित्याख्यापते। (त. वा. ९, ९, ८)। ३. न दष्टो दंशमशकैस्त्रासं द्वेषं मुनिर्व्रजेत्। न वारयेदुपेक्षेत सर्वाहारप्रियत्ववित् ॥ (आव. नि. हरि. वृ. ९१८, पृ. ४०३ उद्.)। ४. दंशमशकादिभिः दश्यमानोऽपि न ततः स्थानादपगच्छेत्, न च तदपनयनार्थं धूमादिना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यतेत, न च व्यजनादिना निवारयेदित्येवं दंशमशक-परीषहजयः कृतः स्यात्, नान्यथेति। (त. भा. सिद्ध. वृ. ९–९)। ५. दंशमशकादीनां सहनम्। (त. श्लो. ९–९)। ६. दंशाश्च मशकाश्च दंशमशकम्, दंशमशकैः खाद्यमानस्य शरीरपीडा दंशमशकमित्युच्यते कार्ये कारणोपचारात् ××× तत्सहनं दंशमशकादिसहनम्। (मूला. वृ. ५–५७)। ७. शून्यागार-दरी-गुहादिशुचिनि स्थाने विविक्ते स्थितस्तीक्ष्णैर्मत्कुण-कीट-दंशमशकाद्यैश्चंडतुंडैः कृताम्॥ स्वाङ्गार्तिं परदेहजार्तिमिव तां यो मन्यमानो मुनिर्निसंगः स सुखी च दंसमशकक्लेशं क्षमी तं नुमः॥ (आचा. सा. ७–८)। ८. दंशादिदंशककृतां बाधामघजिघांसया। निःक्षोभं सहतो दंशमशकोर्मीक्षमा मुनेः। (अन. ध. ६–९३)। ९. दंशमशकादिभिर्भक्ष्यमाणस्याचलितचेतसः कर्मविपाकं स्मरतो निवृत्तप्रतीकारस्य शस्त्रघातादिपराङ्मुखस्य दंशादिबाधासहनम्। (आरा. सा. टी. ४०)।

१ डांस, मच्छर, मक्खी, पिस्सू, मधुमक्खी, खटमल, कीट, चींटी और बिच्छू आदि के द्वारा की गई बाधा को बिना किसी प्रकार के प्रतिकार के सहते हुए उनको मन-वचन-काय से पीड़ा न पहुंचाना, इसे दंशमशकपरिषहजय कहा जाता है।

दाक्षिण्य—दाक्षिण्यं परकृत्येष्वपि योगपरः शुभाशयो ज्ञेयः। गाम्भीर्य-धैर्यसचिवो मात्सर्यविघातकृत् परमः॥ (षोडश. ४–४)।

गम्भीरता और धीरता को धारण कर जो दूसरों के कार्यों में भी मात्सर्य से विहीन होकर निर्मल अभिप्राय से उत्तम प्रयत्न किया जाता है उसे दाक्षिण्य कहते हैं।

दाता—१. श्रद्धान्वितो भक्तियुतः समर्थो विज्ञानवांल्लोभविवर्जितश्च। क्षान्त्यान्वितः सत्त्वगुणोपपन्नस्तादृग्विधो दानपतिः प्रशस्तः॥ (वरांगच. ७–३०)। २. नवकोटीविशुद्धस्य दाता दानस्य यः पतिः। भक्ति-श्रद्धा-सत्त्व-तुष्टि-ज्ञानालौल्य-क्षमा-गुणः। (सा. ध. ५–४७)।

२. भक्ति, श्रद्धा, सत्त्व, सन्तोष, विज्ञान, अलोभ और क्षमा इन सात गुणों से युक्त नवधा भक्ति-समन्वित दान देने वाले पुरुष को दाता कहते हैं।

दातृदोष—नग्नः शौण्डः पिशाचोऽन्धः पतितो मृतकाऽनुगः। तीव्ररोगी व्रणी विंगी नीचोच्चस्थान-संस्थितः॥ आसन्नगर्भिणी वेश्या दास्यन्तरिता ऽशुचिः। भक्षयन्ति किमप्येवमाद्या दोषास्तु दातृगाः॥ (आचा. सा. ८, ५०–५१)।

नग्न, मद्यपायी, पिशाच, अन्ध, पतित, मृतक का अनुगामी, तीव्ररोगी, घावयुक्त, विंगी(?), नीचे-ऊंचे स्थान में स्थित, आसन्नगर्भिणी, वेश्या, दासी, अन्तरिता, अपवित्र और कुछ भी खाने वाली, इत्यादि ये दाता के दोष हैं।

दातृविशेष—१. अनसूयाविषादादिर्दातृविशेषः। (स. सि. ७–३९; त. श्लो. ७–३९)। २. दातृविशेषः प्रतिगृहीतर्यनसूया, त्यागेऽविषादः, अपरिभाविता, दित्सतो ददतो दत्तवतश्च प्रीतियोगः कुशलाभिसन्धिता, दृष्टफलानपेक्षिता, निरुपधत्वमनिदानत्वमिति। (तत्त्वा. भा. ७–३४)। ३. अनसूयाविषादादिर्दातृविशेषः। प्रतिगृहीतरि अनसूया त्यागेऽविषादः दित्सतो ददतो दत्तवतश्च प्रीतियोगः कुशलाभिसन्धिता दृष्टफलानपेक्षिता निरुपरोधत्वमनिदानत्वमित्येवमादिः दातृविशेषोऽवसेयः। (त. वा. ७, ३९, ४)।

१ दातृविशेष (विशेष दाता) उसे कहा जाता है जो असूया (ईर्ष्या) और विषाद आदि से रहित होता है। २ पात्र के विषय में असूया का अभाव—क्षमाशीलता व प्रसन्नचित्तता, त्याग में अखिन्नता, आदरबुद्धि; देने के इच्छुक, वर्तमान में देते हुए एवं अतीत में दे चुकने वाले दाता के प्रति अनुरागभाव; कर्मांशरूप कुशा (कांस) के काटनेरूप कुशलता का अभिप्राय, सांसारिक दृष्ट फल की उपेक्षा, निष्कपटता और निदान का अभाव; इन गुणों से युक्त दाता दातृविशेष (विशिष्ट दाता) माना गया है।

दान—१. अनुग्रहार्थं स्वस्यातिसर्गो दानम्। (त. सू. ७–३३)। २. नवपुण्यैः प्रतिपत्तिः सप्तगुणसमाहितेन शुद्धेन। अपसूनारम्भाणामार्याणामिष्यते दानम्॥ (रत्नक. ११३)। ३. परानुग्रहबुद्धया स्वस्यातिसर्जनं दानम्। (स. सि. ६–१२; त. वा. ६, १२, ४; त. श्लो. ६–१२); स्व-परोपकारोऽनुग्रहः। ××× अनुग्रहार्थं स्वस्यातिसर्गो दानं वेदितव्यम्। (स. सि. ७–३८; त. वा. ७, ३८, २)। ४. आत्म-परानुग्रहार्थं स्वस्य द्रव्यजातस्यान्नपानादेः पात्रेऽतिसर्गो दानम्। (त. भा. ७–३३)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

५. दानं सर्वेष्वेतेषु स्वस्याहारादेः अतिसर्जनलक्षणम्। (त. भा. हरि. वृ. ६–१३)। ६. रत्नत्रयवद्भ्यः स्ववित्तपरित्यागो दानं रत्नत्रयसाधनदित्सा वा। (धव. पु. १३, पृ. ३८९)। ७. स्वं धनं स्यात् परित्यागोऽतिसर्गस्तस्य तु स्फुटः। तद्दानमिति निर्देशोऽतिप्रसंगनिवृत्तये॥ (त. श्लो. ७–३८)। ८. यत् तेषु दानं भक्त-पान-वस्त्र-पात्राश्रयादेर्दीनानाथ-वनीपकादिषु अगारिष्वनगारेषु च ज्ञान-दर्शनाचरणसम्पन्नेषु त्वेकान्तकर्मनिर्जराफलं च भवति। अथवा ××× स्वस्य परानुग्रहाभिप्रायेणातिसर्गो दानम्। (त. भा. सिद्ध. वृ. ६–१३)। ९. परात्मनोरनुग्राही धर्मवृद्धिकरत्वतः। स्वस्योत्सर्जनमिच्छन्ति दानं नाम गृहिव्रतम्॥ (त. सा. ४–९९)। १०. आत्मनः श्रेयसेऽन्येषां रत्नत्रयसमृद्धये। स्वपरानुग्रहायेत्थं यत्स्यात्तद्दानमिष्यते॥ (उपासका. ७६६)। ११. दानं पात्रेषु द्रव्यविश्राणनम्। (योगशा. स्वो. विव. २–३१)। १२. अनुग्रहार्थं स्वोपकाराय विशिष्टगुणसंचयलक्षणाय परोपकाराय सम्यग्दर्शन-ज्ञान-चारित्रादिवृद्धये स्वस्य धनस्य अतिसर्गोऽतिसर्जनं विश्राणनं प्रदानं दानम्। (त. वृत्ति श्रुत. ७–३८)।

१ अपने और दूसरे के अनुग्रह के लिए जो धन का त्याग किया जाता है उसे दान कहते हैं। ३ दान से दाता के जो पुण्य का संचय होता है, यह हुआ स्व का अनुग्रह; साथ ही उसके आश्रय से पात्र के जो सम्यग्ज्ञानादि की अभिवृद्धि होती है, इसे उससे पर का उपकार भी जानना चाहिए।

दानविधि—१. प्रतिग्रहादिक्रमो विधिः। (स. सि. ७–३९)। २. प्रतिग्रहादिक्रमो विधिः। प्रतिग्रह उच्चदेशस्थापनं पादप्रक्षालनम् अर्चनं प्रणमनमित्येवमादिक्रियाविशेषाणां क्रमो विधिरित्याख्यायते। (त. वा. ७, ३९, १)। ३. तत्र प्रतिग्रहोच्चदेशस्थापनमित्येवमादीनां क्रियाणामादरेण करणं विधिविशेषः। (चा. सा. पृ. १५)।

२ पडिगाहन करना, ऊंचे स्थान में बैठाना, पैरों का धोना, पूजा करना और प्रणाम करना; इत्यादि क्रियाविशेषों के क्रम को दान की विधि कहा जाता है।

दानान्तराय—१. तत्र दानान्तरायं यदुदयात् सति दातव्ये प्रतिग्राहके च पात्रविशेषे दानफलं च जानन्नोत्सहते दातुम्। (श्रा. प्र. टी. २६)। २. जस्स कम्मस्स उदएण देंतस्स विग्घं होदि तं दाणंतराइयं। (धव. पु. ६, पृ. ७८); दानस्य विघ्नकृदन्तरायो दानान्तरायः। (धव. पु. १३, पृ. ३९०); दाणविग्घयरं दाणंतराइयं। (धव. पु. १५, पृ. १४)। ३. दानं देयम्। सत्यपि द्रव्ये न ददाति तद्धि कर्मोदितं दीयमानस्य कर्मणो विघ्नम्—अन्तरायमन्तर्धानं करोतीति दानान्तरायः। द्रव्ये प्रतिग्राहके च सन्निहितेऽस्मै दत्तं महाफलमिति जानानोऽपि दातव्यं न ददाति। (त. भा. सिद्ध. वृ. ८–१४)। ४. सइ फासुयंमि दाणे दाणफलं तह य बुज्झई अउलं। वंभच्चेराइजुयं पत्तंपि य विज्जए तत्थ॥ दाउं नवरि न सक्कइ दाणविघायस्स कम्मणो उदए। दाणंतरायमेयं ×××॥ (कर्मवि. ग. १६०–६१)। ५. सति दातव्ये वस्तुनि समागते च गुणवति पात्रे दानस्य च कल्याणकं फलविशेषं विद्वानपि यदुदयाद्दातुं नोत्सहते तद्दानान्तरायम्। (कर्मस्त. गो. वृ. १०, पृ. ८८)। ६. तत्र यदुदयवशात् सति विभवे समागते च गुणवति पात्रे दत्तमस्मै महाफलमिति जानन्नपि दातुं नोत्सहते तद्दानान्तरायम्। (प्रज्ञाप. मलय. वृ. २३–२९३, पृ. ४७५)। ७. तत्र यदुदयात् सति दातव्ये पात्रविशेषे च प्रतिग्राहके स्वर्गाङ्गनोपभोगसम्प्राप्यादि च दानफलं जानन्नपि दातुं नोत्सहते तत् दानान्तरायम्। (धर्मसं. मलय. वृ. ६२३)। ८. यस्यान्तरायस्य प्रभावतो दातुं न लभते जीवस्तद्दानान्तरायम्। (प्रव. सारो. वृ. १२६०)।

१ जिसके उदय से देने योग्य वस्तु के होने पर, ग्राहक पात्रविशेष के उपस्थित रहने पर तथा दान के फल को जानते हुए भी देने के लिए उत्साह नहीं होता है उसे दानान्तराय कहते हैं। २ जो कर्म दान देने में विघ्न किया करता है वह दानान्तराय कहलाता है।

दान्त—दान्तो नाम इन्द्रिय-नोइन्द्रियजयसम्पन्नः। (व्यव. भा. मलय. वृ. १–३४०, पृ. १९)।

इन्द्रिय और मन के वश में रखने वाले पुरुष को दान्त कहते हैं।

दापना—दापना शय्याहारोपधि-स्वाध्याय-शिष्यगणानां प्रदापनम्। (व्यव. भा. मलय. ५–४९)।

शय्या, आहार, उपधि, स्वाध्याय और शिष्यसमूह

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

के विलाने को दापना कहा जाता है।

दायकदोष—१. दायकः परिवेषकः, तेनाशुद्धेन दीयमानमाहारं यदि गृह्णाति साधुस्तदा तस्य दायकनामानशनदोषः। (मूला. वृ. ६-४३)। २. मलिनी-गर्भिणी-लिंगिन्यादिनार्या नरेण च। शवादिनापि क्लीवेन दत्तं दायकदोषभाक्॥ (अन. ध. ५-३४)।

अशुद्ध परोसने वाले के द्वारा दिये जाने वाले आहार को यदि साधु ग्रहण करता है तो वह दायकदोष का पात्र होता है।

दायकदोषदुष्टा—१. मृत-जातसूतकयुक्तगृहिजनेन मत्तेन व्याधितेन नपुंसकेन पिशाचगृहीतेन नग्नया वा दीयमाना वसतिर्दायकदुष्टा। (भ. आ. विजयो. २-३०)। २. मृत-जातसंयुक्तेन मत्तेन नपुंसकेन पिशाचगृहीतेन नग्नया वा दीयमाना वसतिः दायकदुष्टा। (भ. आ. मूला. टी. २-३०)। ३. मृत-जातसूतकयुक्तगृहिजनेन व्याधितेन गृथिलेन दीयमाना वसतिर्दायकदुष्टा। (कार्तिके. टी. ४४८-४९, पृ. ३३८)।

१ मरण व जन्म के सूतकसे युक्त गृहस्थजन, उन्मत्त, रोगी, नपुंसक और पिशाच से पीड़ित जन के द्वारा तथा नग्न स्त्री के द्वारा दी जाने वाली वसति दायकदोष से दुष्ट कही जाती है।

दायकशुद्ध—दायकशुद्धं तु यत्र दाता औदार्यादिगुणान्वितः। (विपाक. अभय. वृ. पृ. ६३)।

दाता के उदारतादि गुणों से युक्त होने पर दान दायकशुद्ध माना जाता है।

दारक (दरत्)—निजपतेरुत्कर्षजनकत्वेन शत्रुहृदयं दारयति भिनत्तीति दरत् (दारकम्)। (नीतिवा. १९-६, पृ. १९१)।

जो अपने स्वामी का उत्कर्ष बढ़ाकर शत्रुओं के हृदय को विदीर्ण किया करता है उसे दारक या दरत् कहते हैं।

दास—दासो मूल्यक्रीतः। (आ. दि. पृ. ७४)।

मूल्य देकर खरीदे हुए सेवक को दास कहते हैं।

दासी—दासकर्मरता दासी क्रीता वा स्वीकृता सती। (लाटीसं. ६-१०५)।

दासकर्म करने वाली या क्रीत (खरीदी हुई) स्वीकृत (रखैल) स्त्री को दासी कहते हैं।

दासी-दासप्रमाणातिक्रम—तथा दासी-दासप्रमाणातिक्रम इति सर्वद्विपद-चतुष्पदोपलक्षणमेतत्। तत्र द्विपदं पुत्र-कलत्र-दासी-दास-कर्मकर-शुक-सारिकादि, चतुष्पदं गवोष्ट्रादि, तेषां यत्परिमाणं तस्य गर्भाधानविधापनेनातिक्रमो ऽतिचारो भवति। (ध. बि. मु. वृ. ३-२७)।

पुत्र, स्त्री, दासी, दास व सेवक मनुष्य एवं तोता, मैना आदि पक्षी इन द्विपदों का तथा गाय और ऊंट आदि चतुष्पदों का जो प्रमाण किया गया है उसका गर्भाधान कराकर उल्लंघन करना; यह दासी-दास-प्रमाणातिक्रम नाम का परिग्रहपरिमाण अणुव्रत का एक अतिचार है।

दाह—दाहो णाम संकिलेसो। कुदो? इह-परभवसंतावकारणत्तादो। (धव. पु. ११, पृ. ३३९)।

इस भव और परभव में सन्तापजनक संक्लेश को दाह कहा जाता है।

दाहस्थिति— दाहो उक्कस्सट्ठिदिपाओग्गसंकिलेसो, तस्स दाहस्स कारणभूदट्ठिदी दाहट्ठिदी णाम। (धव. पु. ११, पृ. ३४१)।

उत्कृष्ट स्थिति के योग्य संक्लेश का नाम दाह है, उसकी कारणभूत स्थिति को दाहस्थिति कहा जाता है।

दिक्—१. आकाशप्रदेशश्रेणी दिक्। आकाशस्य प्रदेशाः परमाणुपरिच्छेदात् प्रविभक्ता श्रेणीकृता दिग्व्यपदेशमर्हन्ति। (त. वा. ७, २१, १)। २. आकाशप्रदेशश्रेणी दिक्। (त. श्लो. ७-२१)।

१ परमाणुप्रमाण से विभक्त आकाश के प्रदेशों की श्रेणी को दिक् या दिशा कहते हैं।

दिक्कुमार — १. जङ्घाग्रपादेष्वधिकप्रतिरूपाः श्यामा हस्तिचिह्ना दिक्कुमाराः। (त. भा. ४-११) २. दिक्कुमारा भूषणनियुक्तगजरूपचिह्नधारिणः। (जीवाजी. मलय. वृ. ३, १, ११७, पृ. १६१)। ३. दिक्कुमारा जङ्घाग्रपदेष्वत्यन्तरूपाः स्वर्णगौराः। (संग्रहणी दे. वृ. १७, पृ. १३)। ४. दिशन्ति अतिसर्जयन्ति अवकाशमिति दिशः, दिक्क्रीडायोगादमृतान्धसोऽपि दिशः, दिशः च ते कुमाराः दिक्कुमाराः। (त. वृत्ति श्रुत. ४-१०)।

१ जो देव जंघाओं और पावों के अग्रभाग में अधिक सुन्दर, वर्ण से श्याम और हाथी के चिह्न से युक्त होते हैं वे दिक्कुमार कहलाते हैं। ४ जो अवकाश देती हैं वे दिशायें कहलाती हैं। दिशाओं में क्रीड़ा करने वाले अमृतभोजियों (देवों) को भी दिक्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(दिशा) कहा जाता है। तदनुसार दिशास्वरूप देवों को दिक्कुमार जानना चाहिए।

दिक्शुद्धि—दिक्शुद्धिः प्राच्युदीचीजिन-जिनचैत्याद्यधिष्ठिताशासमाश्रयणस्वरूपा। (ध. वि. मु. वृ. ३–१४)।

पूर्व व उत्तर दिशागत जिन और जिनचैत्यालय आदि से अधिष्ठित दिशाओं के आश्रय से की जाने वाली शुद्धि को दिक्शुद्धि कहते हैं।

दिगाचार्य—दिगाचार्यः सचित्ताचित्त-मिश्रवस्त्वनुज्ञायी। (त. भा. सिद्ध. वृ. ९–६, पृ. २०८; योगशा. स्वो. विव. ४–९०)।

सचित्त, अचित्त और मिश्र वस्तुओं के ग्रहण करने की अनुज्ञा देने वाले आचार्य को दिगाचार्य कहते हैं।

दिग्दाह—दिशां दाह उत्पातेन दिशोऽग्निवर्णाः। (मूला. वृ. ५–७७)।

उपद्रवस्वरूप से दिशाओं के अग्नि के समान लाल वर्ण होने को दिग्दाह कहा जाता है।

दिग्विरति— १. दिसि विदिसि माण पढमं ××× । (चा. प्रा. २४)। २. दिग्वलयं परिगणितं कृत्वातोऽहं बहिर्न यास्यामि। इति सङ्कल्पो-दिग्व्रतमामृत्यणुपापविनिवृत्त्यै ॥ (रत्नक. ४–६८)। ३. दिक् प्राच्यादिः, तत्र प्रसिद्धैरभिज्ञानैरवधिं कृत्वा नियमनं दिग्विरतिव्रतम्। (स. सि. ७–२१)। ४. दिग्व्रतं नाम तिर्यगूर्ध्वमधो वा दशानां दिशां यथाशक्ति गमनपरिमाणाभिग्रहः। (त. भा. ७-१३)। ५. ऊर्ध्वाधोदिग्विदिक्स्थानं कृत्वा तत्परिमाणतः। पुनराक्रम्यते नैव प्रथमं तद् गुणव्रतम् ॥ (वरांगच. १५-११७)। ६. तत्र दिशां सम्बन्धि दिक्षु वा व्रतमेतावत्सु पूर्वादिविभागेषु मया गमनाद्यनुष्ठेयम्, न परतः; इत्येवंभूतं दिग्व्रतम्। (श्राव. हरि. वृ. ६, पृ. ८२७)। ७. यः प्रसिद्धैरभिज्ञानैः कृतावध्यनतिक्रमः। दिग्विदिक्षु गुणेष्वाद्यं वेद्यं दिग्विरतिव्रतम् ॥ (ह. पु. ५८–१४४)। ८. जह लोहणासणट्ठं संगपमाणं हवेइ जीवस्स। सव्वदिसाण पमाणं तह लोहं णासए णियमा ॥ जं परिमाणं कीरदि दिसाण सव्वाण सुप्पसिद्धाणं। उवओगं जाणित्ता गुणव्वदं जाण तं पढमं ॥ (कार्तिके. ३४१–४२)। ९. प्रविधाय सुप्रसिद्धैर्मर्यादां सर्वतोऽप्यभिज्ञानैः। प्राच्यादिभ्यो दिग्भ्यः कर्तव्या विरतिरविचलिता ॥ (पु. सि. १३७)। १०. यद्विधायावधिं दिक्षु दशस्वपि निजेच्छया। नाक्रामति पुनः प्रोक्तं प्रथमं तद् गुणव्रतम् ॥ (सुभा. सं. ७९२)। ११. ककुबष्टकेऽपि कृत्वा मर्यादां यो न लङ्घयति धन्यः। दिग्विरतेस्तस्य जिनैर्गुणव्रतं वर्ण्यते प्रथमम् ॥ (अमित. श्रा. ६–७६)। १२. यद्दशस्वपि काष्ठासु विधाय विधिनाऽवधिम्। न ततः परतो याति प्रथमं तद् गुणव्रतम् ॥ (धर्मप. १९-७४, पृ. २७६)। १३. तत्र प्राची-अवाची-उदीची-प्रतीची-ऊर्ध्व-अधो-विदिशश्चेति। तासां परिमाणं योजनादिभिः पर्वतादिप्रसिद्धाभिज्ञानैश्च, ताश्च दिशो दुष्परिहारैः क्षुद्रजन्तुभिराकुला। अतस्ततो बहिर्नयास्यामीति निवृत्तिर्दिग्विरतिः। (चा. सा. पृ. ८)। १४. पुव्वुत्तर-दक्खिण-पच्छिमासु काऊण जोयणपमाणं। परदो गमणणियत्ती दिसि विदिसि गुणव्वयं पढमं ॥ (वसु. श्रा. २१३)। १५. तत्र सूर्योदयलक्षिता पूर्वा, शेषाश्च पूर्व-दक्षिणादिकाः सप्त, तथा ऊर्ध्वमधश्च द्वे, एवं दशसु दिक्षु विषये गमनपरिमाणकरणलक्षणं व्रतं नियमो दिग्व्रतम्। (ध. वि. मु. वृ. ३–१७)। १६. जं तु दिसावेरमणं गमणस्स दु जं च परिमाणं। तं च गुणव्वयपढमं भणियं जियरागदोसेहिं ॥ (धर्मर. १४८)। १७. दशस्वपि कृता दिक्षु यत्र सीमा न लङ्घ्यते। ख्यातं दिग्विरतिरिति प्रथमं तद् गुणव्रतम् ॥ (योगशा. ३-१; त्रि. श. पु. च. १, ३, ६५); ऐन्द्री, आग्नेयी, याम्या, नैर्ऋती, वारुणी, वायव्या, कौवेरी, ऐशानी, नागी, ब्राह्मीति दश दिशस्तासु, अपिशब्दादेक-द्वि-त्र्यादिदिक्ष्वपि, सीमा मर्यादा कृता प्रतिपन्ना यत्र व्रते सति न लङ्घ्यते नातिक्रम्यते तत्प्रथमं गुणव्रतम्। (योगशा. स्वो. विव. ३–१)। १८. यत्प्रसिद्धैरभिज्ञानैः कृत्वा दिक्षु दशस्वपि। नात्येत्यणुव्रती सीमां तत्स्याद्दिग्विरतिर्व्रतम् ॥ (सा. ध. ५–२)। १९. कृत्वा संख्यानमाशायां ततो बहिर्न गम्यते। यावज्जीवं भवत्येतद् दिग्व्रतमादिमं व्रतम् ॥ (भावसं. वाम. ४५९)। २०. तासु दिक्षु प्रदिक्षु च हिमाचल-विन्ध्यपर्वतादिकमभिज्ञानपूर्वकं मर्यादां कृत्वा परतो नियमग्रहणं दिग्विरतिव्रतमुच्यते। (त. वृत्ति श्रुत. ७–२१)। २१. दशदिक्ष्वपि संख्यानं कृत्वा यास्यामि नो बहिः। तिष्ठेदित्याऽऽमृतेर्यत्र तत्स्याद् दिग्विरतिव्रतम् ॥ (धर्मसं. श्रा. ७–३)। २२. सुप्रसिद्धानां जगद्विख्यातानां दशदिशानामाशानां पूर्व-पश्चिम-दक्षिणोत्तर-दिशानां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतसृणां अग्नि-नैर्ऋत्य-वायवीशानविदिशानां चतसृणां ऊर्ध्वदिशः अधोदिशश्चेति दशदिशां परिमाणं मर्यादा योजनाद्यैः संख्या, अतः परं अहं न गच्छामि इति नियमेन मर्यादा क्रियते। अथवा दशसु दिक्षु हिमाचल-विन्ध्यपर्वतादिकं अभिज्ञानपूर्वकं मर्यादां कृत्वा परतो नियमग्रहणं दिग्विरतिव्रतमुच्यते। (कार्तिके. टी. ३४१–४२)। २३. परिमाणव्रतं ग्राह्यं दिक्षु सर्वासु सर्वदा। स्वशक्त्याऽऽम-[त्म-] गुरोः पार्श्वे तदाद्यं स्याद् गुणव्रतम्॥ (पू. उपा. २८)। २४. दिग्विरतिर्यथानाम दिक्षु प्राच्यादिकासु च। गमनं प्रतिजानीते कृत्वा सीमानमार्हतः॥ (लाटीसं. ६–१११)।

२ दिशासमूह को मर्यादित करके "मैं इससे बाहिर नहीं जाऊंगा" ऐसा जीवन पर्यन्त के लिए नियम करके उससे बाहिर नहीं जाना, इसे दिग्विरति या दिग्व्रत कहते हैं।

दिग्व्रत—देखो दिग्विरति।

दिनब्रह्मचारी—देखो दिवाब्रह्मचारी।

दिवस—१. ××× मुहुत्तया तीसं। दिवसो ×××॥ (ति. प. ४–२८८)। २. चउपोरिसिओ दिवसो ××× ॥ (आव. नि. ७३०)। ३. ××× त्रिंशन्मुहूर्ता दिनरात्रिरेका। (वरांग-च. २७–५)। ४. दिवसश्चतुष्प्रहरात्मकः, यद्वा आकाशखण्डमादित्येन स्वभाभिर्व्याप्तं तद्दिवसम् इत्युच्यते। (आव. नि. हरि. वृ. ६६३, पृ. २५७)। ५. षोडश मुहूर्ता दिवसः। (आव. भा. हरि. वृ. १९८, पृ. ४९५)। ६. एक्कवीससहस्स-छस्सय-मेत्तपाणेहिं संवच्छरियाण दिवसो होदि। एत्थ पुण एगलक्ख-तेरहसहस्स-णउदिसयपाणेहिं दिवसो होदि। (धव. पु. ३, पृ. ६७); त्रिंशन्मुहूर्तो दिवसः। (धव. पु. ४, पृ. ३१८); तीसमुहुत्तेहि दिवसो होदि। (धव. पु. १३, पृ. ३००)। ७. तीसमुहुत्तो दिवसो ×××। (भावसं. दे. ३१४)। ८. तीसमुहुत्तं दिवसं ××× (जं. दी. प. १३–७)। ९. चतुष्प्रहरात्मको दिवसः यदि वा यावदाकाशखण्डमादित्येन स्वप्रभाभिर्व्याप्तं तावदाकाशपरिभ्रमणच्छिन्नः कालो दिवसः। (आव. मलय. वृ. ६६३, पृ. ३४१)। १०. द्वादशादिमुहूर्तो दिवसः। (आव. भा. मलय. वृ. २००, पृ. ५९३)।

१ तीस मुहूर्तों का एक दिन होता है। २ चार पौरुषियों का एक दिवस या दिन होता है। ४ चार प्रहर का एक दिवस होता है, अथवा सूर्य के द्वारा जो आकाश का भाग अपनी प्रभा से व्याप्त किया जाता है वह दिवस कहलाता है। ५ सोलह मुहूर्त का दिवस होता है। १० बारह आदि मुहूर्तों का दिवस होता है।

दिवसभृतक—भ्रियते पोष्यते स्मेति भृतः, स एवानुकम्पितो भृतकः, कर्मकर इत्यर्थः। प्रतिदिवसं नियतमूल्येन कर्मकरणार्थं यो गृह्यते स दिवसभृतकः। ××× इह गाथे—दिवसभयओ उ घेप्पइ छिण्णेण धणेण दिवस देवसियं (स्थाना. अभय. वृ. ४, १, २७१)।

अनुकम्पापूर्वक जिसका भरण-पोषण किया जाता है वह भृतक कहलाता है। जो भृतक प्रतिदिन निश्चित मूल्य से—नियमित वेतन देकर—कार्य करने के लिए ग्रहण किया जाता है उसे दिवसभृतक कहते हैं।

दिवाब्रह्मचारी—१. निषेवते यो दिवसे न नारीमुद्दामकन्दर्पमदापसारी। कटाक्षविक्षेपशरैरविद्धो बुधैर्दिनब्रह्मचरः स बुद्धः॥ (अमित. श्रा. ७–७२)। २. मैथुनं भजते मर्त्यो न दिवा यः कदाचन। दिवामैथुननिर्मुक्तः स बुधैः परिकीर्तितः॥ (सुभा. सं. ८३८)। ३. धर्ममना दिवसे गतरागो यो न करोति वधूजनसेवाम्। तं दिनमैथुनसंगविरक्तं धन्यतमं निगदन्ति महिष्ठाः॥ (धर्मप. १९–५८)। ४. मण-वयण-काय-कय-कारियाणुमोएहिं मेहुणं णवधा। दिवसम्मि जो विवज्जइ गुणम्मि सो सावओ छट्ठो॥ (वसु. श्रा. २९६)। ५. मनोवाक्कायसंशुद्धया दिवा नो भजतेऽङ्गनाम्॥ भण्यतेऽसौ दिवाब्रह्मचारीति ब्रह्मवेदिभिः॥ (भावसं. वाम. ५३८)।

१ उद्धत कामदेव के मद को नष्ट करने वाला जो स्त्री के कटाक्षपात रूप बाणों से न बेधा जाकर दिन में उक्त स्त्री का सेवन नहीं करता है वह दिनब्रह्मचारी या दिवाब्रह्मचारी कहलाता है। ४ जो मन, वचन, काय व कृत, कारित, अनुमोदना इन नौ प्रकारों से दिन में मैथुन का परित्याग करता है उसे छठा—छठी प्रतिमा का धारक—श्रावक जानना चाहिए।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दिव्यध्वनि—१. जादे अणंतणाणे णट्ठे छदुमट्ठियम्मि णाणम्मि। णवविहपदत्थसारा(धव.–त्थगब्भा) दिव्वझुणी कहइ सुत्तत्थं ॥ (ति. प. १–७४; धव. पु. १, पृ. ६४ उद्.)। २. स्वर्गापवर्गगममार्गविमार्गणेष्टः सद्धर्मतत्त्वकथनैकपटुस्त्रिलोक्याः। दिव्यध्वनिर्भवति ते विशदार्थसर्वभाषास्वभावपरिणामगुणप्रयोज्यः ॥ (भक्तामर ३५)। ३. केरिसा सा (दिव्वज्झुणी)? सव्वभासासरूवा अक्खराणक्खरप्पिया अणंतत्थगब्भबीजपदघडियसरीरा तिसंज्झूविसय-छघडियासु णिरंतरं पयट्टमाणिया इयरकालेसु संसय-विवज्जासाणज्झवसायभावगयगणहरदेवं पडि वट्टमाणसहावा संकर-वदिगराभावादो विसदसरूवा एऊणवीसधम्मकहाकहणसहावा। (जयध. १, पृ. १२६)। ४. सकलवचनभेदाकारिणी दिव्यभाषा। (जीव. च. ६–१९, पृ. १११)।

१ छद्मस्थ अवस्था के ज्ञान (क्षायोपशमिक मत्यादि) के नष्ट हो जाने पर प्रगट हुए अनन्त ज्ञान (क्षायिक केवलज्ञान) के द्वारा जो जीवाजीवादि नौ पदार्थों से सम्बद्ध सूत्र व अर्थ का कथन करती है उसे दिव्यध्वनि कहा जाता है। ३. जो सर्वभाषामयी है, अक्षरात्मक भी है और अनक्षरात्मक भी है, अनन्त अर्थ-गर्भित बीजपदों से युक्त है, तीनों संध्या समयों में छह घड़ी निरन्तर-प्रवर्तमान होती है, इतर समय में संशय, विपर्यय, व अनध्यवसाय को प्राप्त गणधरदेव के प्रति प्रवर्तमान होती है, संकर-व्यतिकर दोषों के अभाव से निर्मल स्वरूप वाली है, तथा जो स्वभावतः उन्नीस धर्मकथाओं का निरूपण करती है; ऐसी अतिशय वाली तीर्थंकरों की वाणी को दिव्यध्वनि या दिव्यभाषा कहते हैं।

दिव्यभाषा—देखो दिव्यध्वनि।

दिशा—१. सगट्ठाणादो कंडुज्जुवा दिसा णाम। (धव. पु. ४, पृ. २२६)। २. दिसा परलोकदिगुपदर्शनपरसूरिणा स्थापितः भवतां दिशं मोक्षवर्त[त्मं]न्याश्रयमुपदिशति यः सूरिः स दिशा इत्युच्यते। (भ. आ. विजयो. ६८)। ३. दिसा एलाचार्यः संघाधिपतिना यावज्जीवमाचार्यकत्यागेन स्वपदेप्रतिष्ठितः स्वसमानगुणग्रामः, स्वशिष्यः इत्यर्थः। (भ. आ. मूला. ६८)।

१ अपने स्थान से बाण के समान सीधे क्षेत्र को दिशा कहा जाता है। २ जो संघाधिपति के द्वारा अपने पद पर प्रतिष्ठित किया गया है, आपको (या भव्य जीवों को) परलोक की दिशा दिखलाने वाला है, तथा मोक्षमार्ग के आश्रय का उपदेशक है, ऐसे सूरि को दिशा कहा जाता है।

दीक्षा—१. दीक्षा सर्वसत्त्वाभयप्रदानेन भावसत्रम्। (पंचव. स्वो. वृ. ९, पृ. ४)। २. दीक्षां सर्वसंगपरित्यागलक्षणां भवनाशिनीम्। (जम्बू. च. ३–११८)।

१ समस्त प्राणियों को अभयदान के द्वारा जो भावसत्र—अन्तरंग सदावर्त (दैनिक अन्नदान का स्थान) है उसका नाम दीक्षा है। २ समस्त परिग्रह के परित्याग को दीक्षा कहा जाता है।

दीक्षागुरु—१. लिंगग्गहणे तेसिं गुरु त्ति पव्वज्जदायगो होदि। (प्रव. सा. ३–१०)। २. यतो लिङ्गग्रहणकाले निर्विकल्पसामायिकसंयमप्रतिपादकत्वेन यः किलाचार्यः प्रव्रज्यादायकः स गुरुः। (प्रव. सा. अमृत. वृ. ३–१०)।

लिंग (जिनलिंग) ग्रहण के समय दीक्षादानपूर्वक निर्विकल्प सामायिक संयम के प्रतिपादक आचार्य को दीक्षागुरु कहते हैं।

दीक्षायोग्य—सुद्धो जाइ-कुलेणं रूवेणं तह य उवसमी धीरो। संविग्गमणो तुट्ठो पव्वज्जं कप्पए पुरिसो ॥ (आ. दि. पृ. ७५ उद्.)।

जो जाति और कुल से शुद्ध, रूपवान्, शान्तपरिणामी, धीर, सन्तुष्ट एवं संसार से उदासीन हो; वह दीक्षाग्रहण करने के योग्य होता है।

दीन—दीनाः पुनः "दीङ् क्षये" इति वचनात् क्षीणसकलधर्मार्थ-कामाराधनशक्तयः। (ध. बि. मु. वृ. १–१८)।

जिसकी धर्म, अर्थ और कामसेवन की समस्त शक्तियां क्षीण हो गई हों उसे दीन कहते हैं।

दीपक सम्यक्त्व—१. सयमिह मिच्छद्दिट्ठी धम्मकहाईहि दीवइ परस्स। सम्मत्तमिणं दीवग कारणफलभावओ नेयं ॥ (श्रा. प्र. ५०)। २. दीपकं तद्यदन्येषामपि सम्यक्त्वदीपकम्। (त्रि. श. पु. चं. १, ३, ६१०)।

१ जो स्वयं मिथ्यादृष्टि होकर धर्मकथा आदिकों के द्वारा दूसरे के सम्यक्त्व का प्रकाशक होता है उसे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कारण में कार्य के उपचार से दीपक सम्यक्त्व कहा जाता है।

दीप्ततप—१. बहुविहउववासेहिं रविसमवड्ढंतकाय-किरणोघो। काय-मण-वयणबलिणो जीए सा दित्त-तवरिद्धी। (ति. प. ४–१०५२)। २. महोपवास-करणेऽपि प्रवर्धमानकाय-वाङ्मानसबलाः विगन्ध-रहितवदनाः पद्मोत्पलादिसुरभिनिःश्वासाः अप्रच्युत-महादीप्तिशरीराः दीप्ततपसः।(त. वा. ३, ३६, ३)। ३. दीप्तिहेतुत्वाद्दीप्तं तपः, दीप्तं तपो येषां ते दीप्त-तपसः। चउत्थ-छट्ठमादिउववासेसु कीरमाणेसु जेसिं तवजणिदलद्धिमाहप्पेण सरीरतेजो पडिदिणं वड्ढदि धवलपक्खचंदस्सेव ते रिसओ दित्ततवा। (धव. पु. ९, पृ. ९०)। ४. महोपवासकरणेऽपि प्रवर्द्धमान-कायवाङ्मनोबलाः दुर्गन्धरहितवदना पद्मोत्पलादि-सुरभिनिःश्वासाः प्रतिदिनप्रवर्द्धमानाऽप्रच्युतमहादी-प्तिशरीराः दीप्तमनसः[तपसः]। (चा. सा. पृ. ९८)। ५. देहदीप्त्या प्रहतान्धकारा दीप्ततपसः। (योगिभ. टी. १४)। ६. शरीरदीप्त्या द्वादशार्क-तेजस्काः दीप्ततपसः। (त. वृत्ति श्रुत. ३–३६)।

२ जिस ऋद्धि के प्रभाव से महाउपवासों के करने पर भी जिनका मनोबल, वचनबल और कायबल बढ़ता ही रहता है; मुख दुर्गन्ध से रहित और निःश्वास कमल-पुष्पादि के समान सुगन्धित होती है, तथा जिनके शरीर की दीप्ति अविनष्ट रहती है; वे दीप्ततप—दीप्ततप नामक—ऋद्धि के धारक होते हैं।

दीर्घ—द्विमात्रो दीर्घः। (धव. पु. १३, पृ. २४८)। दो मात्रा उच्चारण काल वाले स्वरको दीर्घ कहते हैं।

दीर्घ-ह्रस्व अनुयोगद्वार—दीहे रहस्सेत्ति अणि-योगद्दारं पयडि-ट्ठिदि-अणुभाग-पदेसे अस्सिदूण दीह-रहस्सत्तं परूवेदि। (धव. पु. ९, पृ. २३५)।

दीर्घ-ह्रस्व अनुयोगद्वार वह है जो प्रकृति, स्थिति, अनुभाग और प्रदेश का आश्रय लेकर दीर्घ-ह्रस्वता की प्ररूपणा करता है।

दुरभि—दौर्मुख्यकृतः दुरभिः। (अनुयो. हरि. वृ. पृ. ९०)।

दुर्मुखता (विमुखता) को उत्पन्न करने वाली गन्ध का नाम दुरभि है।

दुरभिगन्धनाम—१. जस्स कम्मस्स उदएण सरीरपोग्गला दुग्गंधा होंति तं दुरहिगंधं णाम। (धव. पु. ६, पृ. ७५)। २. यस्य कर्मस्कन्धस्यो-दयेन शरीरपुद्गला दुर्गन्धा भवन्ति तद् दुर्गन्धनाम। (मूला. वृ. १२–१९४)। ३. यदुदयाद् दुरभिगन्धः शरीरेषूपजायते, यथा लशुनादीनाम्, तद् दुरभिगन्ध-नाम। (प्रज्ञाप. मलय. वृ. २३–२९३. पृ. ४७३)।

१ जिस कर्म के उदय से शरीरगत पुद्गल दुर्गन्ध-युक्त होते हैं उसे दुरभिगन्ध या दुर्गन्ध नामकर्म कहते हैं।

दुर्ग—१. यस्याभियोगात् परे दुःखं गच्छन्ति दुर्जनो-द्योगविषया वा स्वस्यापदो गमयतीति दुर्गम्। (नीतिवा. २०–१, पृ. १९८)। २. × × × तथा च शुक्रः—यस्य दुर्गस्य संप्राप्तैः शत्रवो दुःखमाप्नुयुः। स्वामिनं रक्षयत्येव व्यसने दुर्गमेव तत्॥ दंष्ट्रावि-रहितः सर्पो यथा नागो मदच्युतः। दुर्गेण रहितो राजा तथा गम्यो भवेद् रिपोः॥

जिसके रहने से शत्रु दुःख को प्राप्त होते हैं अथवा जो शत्रुओं के खोजने के उद्योगविषयक अपनी आपत्तियों को जतलाता है वह दुर्ग कहलाता है। यह दुर्ग का निरुक्त लक्षण है।

दुर्गन्धनाम—देखो दुरभिगन्धनाम।

दुर्जन—× × × दुर्जना दोषवित्तकाः। (म. पु. १–८४)।

दोषरूप धन से सम्पन्न—दूसरों के दोषों के देखने वाले—पुरुषों को दुर्जन कहते हैं।

दुर्णय—१. तथा चोक्तम्—× × × दुर्णयस्तन्नि-राकृतिः॥ तत्प्रत्यनीकप्रतिक्षेपो दुर्णयः। (अष्टश. १०६)। २. भेदाभेदात्मके ज्ञेये भेदाभेदाभिसन्धयः। ये तेऽपेक्षाऽनपेक्षाभ्यां लक्ष्यन्ते नय-दुर्नयाः॥ (लघीय. ५–३०, पृ. ६०५)। ३. सावधारणानि वाक्यानि दुर्णयाः। (धव. पु. ९, पृ. १८३)। ४. अविशेषेण गुण-पर्यायेषु मिथ्यात्वप्रतिपत्त्या द्रव्यार्थावधारणं क्वचित् केषुचित् वा प्रत्यभिज्ञाविसंवादात् सर्वेण तद्विसंवादात् पर्यायावधारणं च दुर्णयः तत्त्वप्रतिक्षे-पात्। (सिद्धिवि. स्वो. वृ. १०–६, पृ. ६६८, पं. २७–२८); सर्वथा द्रव्यप्रतिक्षेपे पर्यायप्ररूपण-क्रमोऽयं दुर्णयः। (सिद्धिवि. स्वो. वृ. १०–२७. पृ. ६६९, पं. २६); निरपेक्षाः परविषयनिषेधाः नयाः दुर्णयाः। (सिद्धिवि. स्वो. वृ. १०–२७, पृ. ६९१, पं. १४); विज्ञेया दुर्णयाश्च कुमतिभूताः। (सिद्धिवि. स्वो. वृ. १०–२८, पृ. ६९१, पं २५)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

५. अपेक्षातो निष्क्रान्तो निरस्तो वा अपेक्षा येनासौ निरपेक्षः—दुर्नयः। (न्यायकु. ६–७१, पृ. ७९३)। ६. इतरेतराकांक्षारहितस्तु दुर्नयः। (आव. नि. मलय. वृ. ५४, पृ. ३७०)।

२ भेदाभेदस्वरूप वस्तु में जो अनपेक्षा से—विरुद्ध धर्म की अपेक्षा न करके—भेद-अभेद का अभिप्राय होता है, इसे दुर्नय कहा जाता है।

दुर्दर—देखो दर्दुरदोष।

दुर्दिन—दुर्दिनः पतदुदकाभ्रसंयुक्तो दिवसः। (मूला. वृ. २–७घ)।

जल बरसाते हुए मेघों से व्याप्त दिन को दुर्दिन कहते है।

दुर्ध्यान—दुरिति शब्दो वैकृते वर्तते, विकृतो वर्णो दुर्वर्ण इति यथा, एवं विकृतं ध्यानं विकारान्तरमापन्नं दुर्ध्यानमिति। अथवा व्यृद्धौ दुःशब्दः, ऋद्धिवियुक्ता यवना दुर्यवनम्, दुष्कं (ष्टं ?) बीजमिति, एवं ध्यानलक्षणविनिर्मुक्तं दुर्ध्यानम्। अनीप्सायां वा दुःशब्दः, अनीप्सितोऽस्या भग इति दुर्भगा कन्या, एवमनीप्सितं दुर्ध्यानमिति। (त. भा. सिद्ध. वृ. ९–२८)।

ध्यान के साथ उपयुक्त 'दुर्' शब्द विकार अर्थ का वाचक है—जैसे दुर्वर्ण, अतः विकृत ध्यान का नाम दुर्ध्यान है। अथवा 'दुर्' का अर्थ ऋद्धि से विहीन है, तदनुसार ऋद्धि से रहित ध्यान को दुर्ध्यान जानना चाहिए। अनिच्छित अर्थ में भी 'दुर्' का उपयोग होता है—जैसे दुर्भगा कन्या, इस प्रकार जो ध्यान अभीष्ट नहीं है वह दुर्ध्यान कहलाता है।

दुर्भगनाम—१. यदुदयाद् रूपादिगुणोपेतोऽप्यप्रीतिकरस्तद् दुर्भगनाम। (स. सि. ८–११, त. श्लो. ८–११; भ. आ. विजयो. २१२४; मूला. वृ. १२–१९६)। २. दौर्भाग्यनिर्वर्तकं दुर्भगनाम। (त. भा. ८–१२)। ३. यदुदयाद् रूपादिगुणोपेतोऽपि अप्रीतिकरस्तद् दुर्भगनाम। रूपादिगुणोपेतोऽपि सन् यस्योदयात् परेषामप्रीतिहेतुर्भवति तद् दुर्भगनाम। (त. वा. ८, ११, २४)। ४. दौर्भाग्यं नामानिष्टो मनसो योऽप्रियः दुर्भगस्तद्भावो दौर्भाग्यं यस्य कर्मण उदयादिति। (त. भा. हरि. वृ. ८–१२)। ५. तद्विपरीतं च दुर्भगनामेति। (आ. प्र. टी. २३)। ६. इत्थी-पुरिसाणं दूहवभावणिव्वत्तयं दूहवं णाम। (धव. पु. ६, पृ. ६५); जस्स कम्मस्सुदएण जीवो दूहवो होदि तं दूहवं णाम। (धव. पु. १३, पृ. ३६६)। ७. यतोऽप्रीतिकरोऽन्येषां नाम्ना दुर्भगनाम तत्। (ह. पु. ५८–२७)। ८. सौभाग्यविपरीतलक्षणं दुर्भागनाम। (त. भा. सिद्ध. वृ. ८–१२)। ९. दुर्भगनामकर्मोदयादुपकारं कुर्वन्नपि जनाप्रियो भवति। (पंचसं. स्वो. वृ. ३, १२६, पृ. ३८)। १०. दूहगकम्मुदए पुण दुहओ सो सयललोयस्स। (कर्मवि. ग. १४४)। ११. दुर्भगनाम यदुदयादुपकारकृदपि जनस्य द्वेष्यो भवति। उक्तं च—उवगारकारगो वि हु न रुच्चए दुब्भगस्सुदए। (प्रज्ञाप. मलय. वृ. २९३, पृ. ४७४; प्रव. सारो. वृ. १२६५)। १२. तद्विपरीतं दुर्भगनाम। उक्तं च—उपकारकारगो वि हु ण रुच्चइ दुब्भगस्सुदए। (धर्मसं. मलय. वृ. ६२०)। १३. यदुदयेन रूपलावण्यसहितोऽपि दृष्टः श्रुतो वा परेषामप्रीतिजनको भवति तद् दुर्भगनाम। (त. वृत्ति श्रुत. ८–११)। १४. यदुदयात् रूपादिगुणोपेतेऽपि अप्रीतिं विदधाति जनः तद् दुर्भगनाम। (गो. क. जी. प्र. ३३)।

१ जिस कर्म के उदय से रूपादि गुणों से सम्पन्न होकर भी प्रीतिकर नहीं होता उसे दुर्भग नामकर्म कहते हैं। २ दुर्भगता के जनक कर्म को दुर्भग नामकर्म कहा जाता है। ११ जिस कर्म के उदय से उपकार करने वाला भी व्यक्ति लोगों को अप्रिय होता है उसे दुर्भग नामकर्म कहते हैं।

दुर्भिक्ष—साली-वीहि-जव-गोधूमादिधण्णाणं दुल्लहत्तं दुब्भिक्खं णाम। (धव. पु. १३, पृ. ३६६)।

साली, व्रीहि, जौ और गेहूं आदि की दुर्लभता का नाम दुर्भिक्ष है।

दुर्विनीत—१. यो युक्तायुक्तयोरविवेकी विपर्यस्तमतिर्वा स दुर्विनीतः। (नीतिवा. ५–४०, पृ. ५७)। २. तथा च नारदः—युक्तायुक्तविवेकं यो न जानाति महीपतिः। दुर्वृत्तः स परिज्ञेयो यो वा वाममतिर्भवेत्॥ (नीतिवा. टी. ५–४०, पृ. ५७)।

योग्य-अयोग्य के विवेक से रहित अथवा विपरीत बुद्धि वाले राजा को दुर्विनीत कहते हैं।

दुर्वृष्टि—अतिवृष्ट्यवृष्टिलिङ्गा स्वगतक्षारत्वादिगुणेन सस्यसम्पादने अक्षमा वा दुर्वृष्टिः। (धव. पु. १३, पृ. ३३६)।

अधिक वर्षा का होना या वर्षा का न होना, अथवा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपने में वर्तमान क्षारता आदि गुण के कारण जो धान्य के उत्पादन में असमर्थ रहती है उसे दुर्वृष्टि कहा जाता है।

दुष्ट—दुष्टः कषायविषय[विष] दूषितः। (आचा. दि. पृ. ७४)।

कषायरूप विष से दूषित मनुष्य को दुष्ट कहते हैं।

दुष्पक्वाहार—१. असम्यक्पक्वो दुःपक्वः। (स. सि. ७–३५)। २. दुष्पक्वास्त्वर्धस्विन्नाः। (श्रा. प्र. टी. २८६)। ३. असम्यक् पक्वो दुष्पक्वः। अन्तस्तण्डुलभावेनातिक्लेदनेन वा दुष्ठु पक्व आहारो दुष्पक्व इत्युच्यते। (त. वा. ७, ३५, ६)। ४. दुष्पक्वं मन्दपक्वमभिन्नतन्दुल-फल-लोष्ट-यव-गोधूम-स्थूलमण्डककण्डुकादि, तस्याभ्यवहारः ऐहिक-प्रत्यवायकारी यावता वांशेन सचेतनस्तावता पर-लोकमप्युपहन्तीति। (त. भा. सिद्ध. वृ. ७–३०)। ५. सान्तस्तन्दुलभावेनातिक्लेदनेन वा दुष्टः पक्वो दुष्पक्वाहारः। (चा. सा. पृ. १३)। ६. तथा दुष्पक्वो मन्दपक्वः, स चासाहारश्च दुष्पक्वाहारः। स चार्धस्विन्नपृथुक-तन्दुल-यव-गोधूम-स्थूलमण्डक-कर्कटकफलादिरैहिकप्रत्यवायकारी, यावता चांशेन सचेतनस्तावता परलोकमुपहन्ति, पृथुकादेर्दुष्पक्वतया सम्भवत्सचेतनावयत्वात्, पक्वत्वेनाचेतन इति भुञ्जा-नस्यातिचारः पञ्चमः। (योगशा. स्वो. विव. ३–९८)। ७. असम्यक् पक्वो दुःपक्वः अस्विन्नः, अतिक्लेदनेन वा दुष्टः पक्वो दग्धपक्वः दुःपक्वः, तस्य आहारः दुःपक्वाहारः। (त. वृत्ति श्रुत. ७, ३५)। ८. आहारं स्निग्धग्राहिश्च(?) दुर्जरं जठ-राग्निना। असंख्यातवतस्तस्य दोषो दुष्पक्वसंज्ञकः। (लाटीसं. ६–२१८)।

१ ठीक से न पके हुए आहार को दुष्पक्वाहार कहते हैं। २ आधे पके हुए आहार का नाम दुष्पक्वाहार है। ६ मन्द पके हुए (अधपके) आहार को दुष्पक्वाहार कहते हैं। जैसे—अधपके पृथुक (शाक-विशेष), चावल, जौ, गेहूं, स्थूलमण्डक (मोटी रोटी ?) और ककड़ी आदि जो स्वास्थ्य के लिए हानिकारक है ऐसे दुष्पक्व आहार के ग्रहण करने पर दुष्पक्वाहार नाम का भोगोपभोगपरिमाणव्रत का अतिचार होता है।

देशसंयम—देखो देशव्रत। १. देशविरते प्रत्याख्यानावरणकषायाणां सर्वघातिस्पर्धकोदयाभावलक्षणे क्षये तेषामेव हीनानुभागरूपतया परिणतानां सदवस्थालक्षणे उपशमे च देशघातिस्पर्धकोदयसहिते उत्पन्नं देशसंयमरूपचारित्रं क्षायोपशमिकम्। (गो. जी. म. प्र. १३)। २. देशसंयतापेक्षया प्रत्याख्यानावरणकषायाणाम् उदयागतदेशघातिस्पर्धकानन्तबहुभागानुभागोदयेन सहानुदयागतक्षीयमाणविवक्षितोदयनिषेकसर्वघातिस्पर्धकानन्तबहुभागानामुदयाभावलक्षणक्षये तेषामुपरितननिषेकाणां अनुदयप्राप्तानां सदवस्थालक्षणोपशमे च सति समुद्भूतत्वात् चारित्रमोहं प्रतीत्य देशसंयमः क्षायोपशमिकभावः। (गो. जी. जी. प्र. १३)।

१ प्रत्याख्यानावरण कषायों के सर्वघातिस्पर्धकों का उदयाभावस्वरूप क्षय, हीन अनुभागरूप से परिणत उन्हीं का सदवस्थारूप उपशम और देशघातिस्पर्धकों का उदय होने पर देशविरत (पांचवें) गुणस्थान में देशसंयमरूप क्षायोपशमिक चारित्र होता है।

देशसंवर—शेषकाले (बादर-सूक्ष्मयोगनिरोधकालात् प्राक्) चरणप्रतिपत्तेरारभ्य देशसंवरपरिणतिभागात्मा भवति। ××× देशसंवरस्तु सामायिकादिचारित्रवतां सत्यपि परिस्पन्दवत्वे विदिततत्त्वानां संसारजलधेरुत्तरीतुमभिवाञ्छतां प्रधानसंवराभावेऽपि न्यस्तसमस्तप्रमादस्थानानां देशसंवरः समस्त्येवेति। (त. भा. सिद्ध. वृ. ९-१)।

बादर व सूक्ष्म योगों के निरोध से पूर्व चारित्रप्राप्ति से लेकर आत्मा देशसंवर से युक्त हो जाता है। सामायिक आदि चारित्र वाले जीव यद्यपि परिस्पन्दन से युक्त होते हैं, फिर भी तत्त्वों के ज्ञाता होकर वे चूंकि संसार से पार होने के इच्छुक होते हैं, इसीलिए प्रधान संवर के न होने पर भी समस्त प्रमादस्थानों का उनके देशसंवर होता ही है।

देशस्नान — देशस्नानमधिष्ठानशौचातिरेकेणाक्षिपक्ष्मप्रक्षालनमपि। (दशवै. सू. हरि. वृ. ३२, पृ. ११६)।

अधिष्ठानप्रदेश की पवित्रता के अतिरिक्त आंखों के पलकों के धोने को भी देशस्नान कहा जाता है।

देशाख्यान — तदेकदेशदेशाद्रि-द्वीपाब्ध्यादिप्रपञ्चनम्। देशाख्यानम्। ××× ॥ (म. पु. ४-५)।

लोक के एकदेशभूत देश, पर्वत, द्वीप और समुद्रादि का विस्तारपूर्वक कथन करने को देशाख्यान कहते हैं।

देशाभिहृत— एकदेशादागतमोदनादिकं देशाभिघटकम्। (मूला. वृ. ६-१९)।

एक देश से आये हुये ओदन (भात) आदि भोज्य सामग्री के ग्रहण करने को देशाभिघट (देशाभिहृत) दोष कहते हैं।

देशामर्शक—जेणेदं सुत्तं देसामासयं, तेण उत्तासेसलक्खणाणि एदेण उत्ताणि। एदं देसामासियसुत्तं कुदो ? एगदेसपदुप्पायणेण एत्थतणसयलत्थस्स सूचयत्तादो। एदं देसामासियसुत्तं, तेणेदेण आमासियत्थेण अणामासियत्थो उच्चदे। (धव. पु. १, पृ. ८ का टिप्पण नं १)।

जो सूत्र आमृष्ट—स्पृष्ट या विवेचित—अर्थ के साथ उससे सम्बद्ध अन्य समस्त अर्थ का सूचक होता है उसे देशामर्शक कहते हैं।

देशावकाशिकव्रत—देखो देशविरति। १. देशावकाशिकं स्यात् कालपरिच्छेदनेन देशस्य। प्रत्यहमणुव्रतानां प्रतिसंहारो विशालस्य ॥ (रत्नक. ९२)। २. दिसिव्वयगहियस्स दिसापरिमाणस्स पइदिणं परिमाणकरणं देसावगासियं। (आव. ६-१०)। ३. [देशः] दिग्व्रतगृहीतदिक्परिमाणस्यैकदेशः अंशः, तस्मिन्नवकाशः—गमनादिचेष्टास्थानं देशावकाशिकस्तेन निर्वृत्तं देशावकाशिकम्। (आव. वृ. ६-१०, पृ. ८३५)। ४. पुव्वपमाणकदाणं सव्वदिसीणं पुणो विसंवरणं। इंदियविसयाण तहा पुणो वि जो कुणदि संवरणं। वासादिकयपमाणं दिणे दिणे लोह-कामसमणट्ठं। सावज्जवज्जणट्ठं तस्स चउत्थं वयं होदि ॥ (कार्तिके. ३६७-६८)। ५. देशेऽवकाशो देशावकाशः, तत्र भवं देशावकाशिकम्। इदमुक्तं भवति-पूर्वगृहीतस्य दिग्व्रतस्य योजनशतादिकस्य यत्प्रतिदिनं संक्षिप्ततरं योजन-गव्यूति-पत्तन-गृहमर्यादादिकं परिमाणं विधत्ते तद् देशावकाशिकमित्युच्यते। (सूत्रकृ. शी. वृ. २, ७, ७९, पृ. १८२)। ६. देशे विभागे प्राक्प्रतिपन्नदिग्व्रतस्य योजनशतादिपरिमाणरूपस्य अवकाशो गोचरो यस्य प्रतिदिनं प्रत्याख्येयतया तत्तथा। (ध. बि. मु. वृ. ३-१८)। ७. देशावकाशिकं देशे मर्यादीकृतदेशमध्येऽपि स्तोकप्रदेशेऽवकाशो नियतकालमवस्थानम्, सोऽस्यास्तीति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देशावकाशिकं शिक्षाव्रतम् । (रत्नक. टी. ४–२) । ८. दिग्व्रते परिमाणं यत्तस्य संक्षेपणं पुनः । दिने रात्रौ च देशावकाशिकव्रतमुच्यते ॥ (योगशा. ३, ८४; त्रि. श. पु. च. १, ३, ६४०); देशे दिग्व्रत-गृहीतपरिमाणस्य विभागे अवकाशोऽवस्थानं देशावकाशः, सोऽत्रास्तीति देशावकाशिकम् । (योगशा. स्वो. विव. ३–८४) । ९. दिग्व्रतपरिमितदेशविभागेऽवस्थानमस्ति मितसमयम् । यत्र निराहुर्देशावकाशिकं तद्व्रतं तज्ज्ञाः ॥ (सा. ध. ५–२५) । १०. दिग्व्रतादृतदेशस्य यत्संहारो घनस्य च । क्रियते सावधिः सीम्नां तत्स्याद् देशावकाशिकम् ॥ (धर्मसं. श्रा. ७–३४) ।

१ अणुव्रती श्रावक दिवसादिरूप काल के नियमपूर्वक जो प्रतिदिन दिग्व्रत में ग्रहण किये विशाल देश का संकोच किया करते हैं, इसे देशावकाशिकव्रत कहा जाता है । ५ दिग्व्रत में जो सौ योजनादि रूप दिशा का प्रमाण किया गया है उसमें प्रतिदिन संक्षेप करके एक योजन, कोश, ग्राम व गृह आदि का प्रमाण करना; यह देशावकाशिकव्रत कहलाता है ।

देशावधि—भवं प्रतीत्य यो जातो गुणं व प्राणिनामिह । देशावधिः स विज्ञेयो दृष्टिमोहाद् विपर्ययः ॥ (त. श्लो. १, ३२, ११३, पृ. २६७) ।

भव या गुण (क्षयोपशम) के आश्रय से जो जीवों के अवधिज्ञान होता है उसे देशावधि कहते हैं । वह दर्शनमोह के उदय से विपर्यय (विभंग) हुआ करता है ।

देशावधिमरण—यत्सांप्रतमुदेत्यायुर्यथाभूतं तथाभूतमेव बध्नाति देशतो यदि तद् देशावधिमरणम् । (भ. आ. विजयो. २५; भा. प्रा. टी ३२) ।

वर्तमान समय में जैसा आयुकर्म उदय में आ रहा है, उसी प्रकार का यदि एक देश रूप से बांधता है तो इसे देशावधिमरण कहते हैं ।

देशावरण—देशं ज्ञानस्याऽऽभिनिबोधादिमावृणोतीति देशज्ञानावरणीयम् । ××× मत्याद्यावरणं तु घनातिच्छादितादित्येषत्प्रभाकल्पस्य केवलज्ञानदेशस्य कट-कुट्यादिरूपावरणतुल्यमिति देशावरणमिति । (स्थाना. अभय. वृ. २, ४, १०५, पृ. ९१) ।

ज्ञान के देशभूत आभिनिबोध आदि को जो आच्छादित करता है उसे देशज्ञानावरण कहते है । जिस प्रकार मेघों से आच्छादित सूर्य की थोड़ी सी प्रभा दृष्टिगोचर होती है उसी प्रकार ज्ञानावरण से आच्छादित ज्ञान के देशभूत मतिज्ञान आदि प्रगट रहते हैं । ज्ञान के देशभूत मतिज्ञानादि को आवृत करने वाले मतिज्ञानावरणादि थोड़ी सी सूर्यप्रभा के आच्छादक कट व कुटी आदि के समान हैं ।

देशावसन्न—आवस्सय-सज्झाए पडिलेहणभिक्खभाणभत्तट्ठं । आगमणे णिग्गमणे ठाणे य निसीयणतुयट्टे ॥ आवस्सयाइयाइं न करेइ अहवा विहीणमहियाइं । गुरुवयणवलाय तहा भणिओ देसावसन्नोत्ति । (प्रव. सारो. १०७–८); यदैतान्यावश्यकस्वाध्यायादीनि स्थानानि सर्वथा न करोत्यथवा हीनाधिकानि करोति प्रतिषिद्धकालकरणादिदोषदुष्टानि वा करोति तदा देसावसन्नो भवतीत्यर्थः । (प्रव. सारो. वृ. १०७–८) ।

जो प्रतिक्रमणादि आवश्यक, स्वाध्याय, प्रतिलेखन, भिक्षा (गोचरी), ध्यान, भोजन, आगमन, निर्गमन, स्थान (कायोत्सर्गादि में अवस्थान), निषीदन (बैठना) और त्वग्वर्तन (शयन); इन आवश्यक क्रियाओं को या तो सर्वथा ही नहीं करता है या हीनाधिक रूप में करता है, अथवा निषिद्ध काल में उन्हें करता है वह देशावसन्न (साधु) कहलाता है जो वन्दना के अयोग्य होता है ।

देशोपशमना—१. मूलुत्तरकम्माणं पगडिट्ठितिमादि होइ चउमेया । देशकरणेहिं देसं समेइ जं देससमणातो ॥ (पंचसं. उपश. ९५, पृ. २०६) । २. देशोपशमना करणकृता करणरहिता च । ××× तत्र या करणरहिता तस्या व्याख्या नास्ति, तद्धेतूनामभावात् । सा च गिरिनदीपाषाणवृत्तादिभाववत् संसारस्थजीवानां करण-विशिष्टगुणाभ्यां विनापि वेदनानुभवनादिकारणैर्भवति । (पंचसं. स्वो. वृ. उपश. १); मूलोत्तरकर्माणि प्रकृति-स्थित्यनुभाग-प्रदेशभेदाच्चतुर्धा भवन्ति, देशकरणैः (णाभ्यां) यथाप्रवृत्तापूर्वकरणसंज्ञैः (ज्ञाभ्यां) देशं किञ्चिन्मात्रं प्रकृति-स्थित्यादीनां यत उपशामयति अतो देशोपशमना भण्यते । (पंचसं. स्वो. वृ. उपश. ९५, पृ. २०६) । ३. देशोपशमना द्विधा करणकृता करणरहिता च । ××× करणानि यथाप्रवृत्तापूर्वानिवृत्तिसंज्ञानि, तैः कृता करणकृता ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तद्विपरीता करणरहिता या संसारिणां जीवानां गिरिनदीप्रोषाणवृत्तत्वादिसंभवत्यथाप्रवृत्तादिकरण-साध्यक्रियाविशेषमन्तरेणापि वेदनानुभवनादिभिः कारणैरुपजायते। तस्याश्च सम्प्रत्यनुयोगो व्यवच्छिन्नः; तद्वेतूनामभावात्। (पंचसं. मलय. वृ. उपश. १); यत् यस्मात्कारणाद् देशभूताभ्यामेकदेशभूताभ्यां यथाप्रवृत्तापूर्वकरणसंज्ञिताभ्यां करणाभ्यां प्रकृतिस्थित्यादीनां देशमेकदेशं शमयत्युपशमयति, अतो देशोपशमनाभिधीयते। (पंचसं. मलय. वृ. उपश. ९५)।

१ देशकरणरूप अधःप्रवृत्त और अपूर्वकरण परिणामों के द्वारा जो प्रकृति, स्थिति, अनुभाग और प्रदेश का अल्प मात्रा में उपशम किया जाता है उसे देशकरणोपशमना कहा जाता है।

देह—देहोऽपि औदारिक-वैक्रियिकाहारकवर्गणागत-पुद्गलपिण्डः, कर-चरण-शिरोग्रीवाद्यवयवैः परिणतो वा। (मूला. वृ. १२-२)।

औदारिक, वैक्रियिक और आहारक वर्गणाओं के पुद्गलपिण्ड को देह कहते हैं। अथवा हाथ, पैर, शिर और ग्रीवा आदि अवयवस्वरूप से परिणत पुद्गल-पिण्ड को देह कहा जाता है।

दव्व—१. योग्यता कर्म पूर्वं वा दैवमुभयमदृष्टम्। (अष्टश. ८८)। २. जमुदग्गं थेवेणं कम्मं परिणमइ इह पयासेण। तं दइवं × × × ॥ (उपदे. प. ३५१)। बहुकम्मणिमित्तो पुण अज्झवसाओ उ दइवोत्ति॥ (उपदे. प. ३५१)। ३. यदुदग्रमुत्कटरसतया भाक्समुपार्जितं स्तोकेनापि कालेन परिमितेन कर्म सद्वेद्यादि-परिणमति फलदानं प्रति प्रह्वीभवति इह जने प्रयासेन राजसेवादिना पुरुषकारेण, तद् दैवं लोके समुद्घुष्यते। (उपदे. प. मु. वृ. ३५०); अथवा × × × बहु प्रभूतं पुरुषकारमाश्रित्य) कर्म निमित्तं यत्र स पुनरध्यवसाय इह नवोऽल्पार्थत्वादल्पो व्यवसायः पुनर्दैवमिति। यत्र हि कार्यसिद्धावल्पः कर्मणो भावो बहुश्च पुरुषप्रयासस्तत्कार्यं पुरुषप्रकारस्साध्यमुच्यते। यत्र पुनरेतद्विपर्यस्तस्तत् कर्मकृतमिति। (उपदे. प. मु. वृ. ३५१)।

१ योग्यता अथवा पूर्व कर्म को दैव कहते हैं, जिन्हें अदृष्ट कहा जाता है। २ पूर्वोपार्जित कर्म जो परिमित समय में ही तीव्र अनुभागस्वरूप से साता-वेदनीय आदिरूप परिणत होता हुआ फल देने के उन्मुख होता है, इसका नाम दैव है। अथवा पुरुषार्थ की अपेक्षा जिस अध्यवसाय में बहुत कर्म निमित्त होता है उसे दैव कहा जाता है।

दैवकृत—अतर्कितोपस्थितमनुकूलं प्रतिकूलं वा दैवकृतम्। (अष्टश. ९१)।

अतर्कित—विना किसी प्रकार के विचारादि के—जो अनुकूल या प्रतिकूल सामग्री प्राप्त होती है वह दैवकृत कहलाती है।

दैवविवाह—१. स दैवो विवाहो यत्र यज्ञार्थमृत्विजः कन्याप्रदानमेव दक्षिणा। (नीतिवा. ३१, ५, पृ. ३७४; ध. वि. मु. वृ. १-१२; योगशा. स्वो. विव. १-४७, पृ. १४७)। २. तथा च गुरुः—कृत्वा यज्ञविधानं तु यो ददाति च ऋत्विजः। समाप्तौ दक्षिणां कन्यां दैवं वैवाहिकं हि तत्॥ (नीतिवा. टी. ३१-५)।

यज्ञ करके उसके समाप्त होने पर याज्ञिक के द्वारा ब्राह्मण को दक्षिणा के रूप में कन्या के देने को दैव विवाह कहते हैं।

दैवसिक—दिवसेन निर्वृत्तो दिवसपरिणामो वा दैवसिकः। (आव. हरि. वृ. ४, पृ. ५७१)।

दिन के आश्रय से या दिन प्रमाण जो अतिचार किया जाता है वह दैवसिक कहलाता है।

दोग्रन्थिकप्राभृत (दोगंधियपाहुड)—परमाणंदाणंदमेत्तीणं 'दोगंधिय' इत्ति ववएसो। तेसिं कारणदव्वाणं पि उवयारेण 'दोगंधिय' ववएसो। तत्थ [परमाणंद-] आणंदमेत्तीणं पट्ठवणाणुववत्तीदो तण्णिमित्तदव्वपट्ठवणं दोगंधियपाहुडं। (जयध. पु. १, पृ. ३२४)।

परमानन्द और आनन्द मात्र का नाम दोग्रन्थिक है। उनमें चूंकि परमानन्द और आनन्द मात्र का प्रस्थापन (प्रेषण) घटित होता नहीं है, अतएव उनके निमित्तभूत द्रव्यों के प्रस्थापन को दोग्रन्थिक-प्राभृत कहा जाता है। यह नोआगम की अपेक्षा प्रशस्त भावप्राभृत माना गया है।

दोलायित—१. दोलायितं दोलामिवात्मानं चलाचलं कृत्वा शयित्वा वा यो विदधाति वन्दनां तस्य दोलायितदोषः। (मूला. वृ. ७-१०६)। २. दोलायितं चलन् कायो दोलावत् प्रत्ययोऽथवा। (अन. ध. ८-९९)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१ हिंदोले के समान अपने को चल-अचल करके अथवा लेट कर वन्दना करने पर दोलायित दोष का भागी होता है। २ अथवा अस्थिर प्रत्यय—स्तुत्य, स्तुति एवं उसके फल विषयक सन्देह—का नाम दोलायत दोष जानना चाहिए।

दोष—१. अज्ञानादिर्दोषः स्व-परपरिणामहेतुः। (अष्टश. ४)। २. दोषः अज्ञानादि, ××× अथवा मोहान्तराया दोषाः। (आ. मी. वसु. वृ. ४)।

१ स्व-परपरिणाम जनित अज्ञान आदि दोष कहलाते हैं।

दोष (वन्दनादोष)—जइ वेलंवगलिंगं जाणंतस्स नमओ हवइ दोषो। निद्धंधसमिय नाऊण वंदमाणे धुवो दोसो॥ (आव. नि. ११३७)।

विदूषक आदि विडम्बकों के द्वारा धारण किये गये साधु के वेष को जानते हुए भी नमस्कार करना तथा इसी प्रकार निर्लज्ज पार्श्वस्थ आदि को भी जानते हुए वन्दना करना, यह वन्दना का दोष है।

दोषज दुःख—दोषजं वात-पित्त-कफवैषम्यसम्भूतम्। (नीतिवा. ६–२१, पृ. ७३)।

वात, पित्त और कफ की विषमता से उत्पन्न होने वाले दुख को दोषज दुःख कहते हैं।

द्युति—१. शरीर-वसनाभरणादिदीप्तिः द्युतिः। (स. सि. ४–२०; त. वा. ४, २०, ४; त. श्लो. ४–२०)। २. द्युतिः शरीराभरणादिदीप्तिः। (औपपा. अभय. वृ. ३८, पृ. ८७)। ३. द्युतिः शरीराभरणादिप्रभा। (ध. वि. ७–८, पृ. ८७)। ४. शरीर-वस्त्राभरणादीनां द्युतिर्दीप्तिः। (त. वृत्ति श्रुत. ४–२०)।

१ शरीर, वस्त्र और आभूषण आदि की दीप्ति को द्युति कहते हैं।

द्यूत—अक्षपासादिनिक्षिप्तं वित्ताज्जय-पराजयम्। क्रियायां विद्यते यत्र सर्वं द्यूतमिति स्मृतम्॥ (लाटी-सं. २–११४)।

जिस क्रिया में चौसर के पांसे आदि पर निक्षिप्त धन से जय-पराजय होता है उसे द्यूत कहते हैं।

द्रव—रात्रिचतुःप्रहरैः प्रक्लिन्नओदनो द्रव उच्यते। (त. वृत्ति श्रुत. ७–३५)।

रात्रि के चार प्रहरों में पकाये गये भात को द्रव कहा जाता है।

द्रवशील—भासइ दुयं दुयं गच्छए अ दरिउव्व गोविसो सरए। सव्वद्दुय-दुयकारी फुट्टइ व ठिओ वि दप्पेणं॥ (बृहत्क. १२९९)।

जो शरद् ऋतु के अभिमानी बैल के समान अतिशय शीघ्रतापूर्वक विना सोचे-विचारे बोलता है व जाता है, जो सभी क्रियाओं को विना विचारे अतिशय शीघ्रता से करता है, तथा जो तीव्र अभिमान से स्थित भी रहता है, उसे द्रवशील कहा जाता है।

द्रविक—द्रविका नाम राग-द्वेषविनिर्मुक्ता, द्रवः संयमः सप्तदशविधानः कर्मकाठिन्यद्रवणकारित्वात्—विलयहेतुत्वात्, स येषां विद्यते ते द्रविकाः। (आचारा. शी. वृ. १, ७, ५८, पृ. ७०)।

कर्म की कठिनता को विलीन करने के कारण सत्तरह प्रकार के संयम को द्रव कहा जाता है। इस द्रव के धारक—राग-द्वेष से रहित—जीवों का नाम द्रविक है।

द्रव्य—१. अपरिच्चत्तसहावेणुप्पादव्वय-धुवत्तसंबद्धं। गुणवं च सपज्जायं जं तं दव्व त्ति वुच्चंति॥ (प्रव. सा. २–३)। २. दवियदि गच्छदि ताइं ताइं सब्भावपज्जयाइं जं। दवियं तं भण्णंते अणण्णभूदं तु सत्तादो॥ दव्वं सल्लक्खणियं उप्पादव्वय-धुवत्त-संजुत्तं। गुण-पज्जयासयं वा जं तं भण्णंति सव्वण्हू॥ (पंचा. का. ९–१०)। ३. सद् द्रव्यलक्षणम्। (त. सू. ५–२९); गुण-पर्ययवद् द्रव्यम्। (त. सू. ५, ३८)। ४. गुणैर्द्रोष्यते गुणान् द्रोष्यतीति वा द्रव्यम्। (स. सि. १–५)। ५. तदुभयं (गुण-पर्यायाः) यत्र विद्यते तद् द्रव्यम्। गुण-पर्याया अस्य सन्त्यस्मिन् वा सन्तीति गुण-पर्ययवत्। (त. भा. ५–३७)। ६. नयोपनयैकान्तानां त्रिकालानां समुच्चयः। अविभ्राड्भावसम्बन्धो द्रव्यमेकमनेकधा॥ (आ. मी. १०७)। ७. गुणाणमासओ दव्वं। (उत्तरा. २८, ६)। ८. दव्वं पज्जवविउयं दव्वविउत्ता य पज्जवा णत्थि। उप्पाय-ठिइ-भंगा हंदि दवियलक्खणं एयं॥ (सन्मति. १२)। ९. ऋते द्रव्यान्न पर्याया द्रव्यं वा पर्ययैर्विना। स्थित्युत्पत्तिनिरोधोऽयं द्रव्यलक्षणमुच्यते॥ (वरांग. २६–५५)। १०. द्रोष्यते गम्यते गुणैर्द्रोष्यति गमिष्यति गुणानिति वा द्रव्यम्। ××× अनागतपरिणामविशेषं प्रति गृहीताभिमुख्यं द्रव्यम्—यद्भाविपरिणामप्राप्ति प्रति योग्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तामादधानं तद् द्रव्यमित्युच्यते। (त. वा. १, ५, ३); इयर्ति पर्यायानर्यते वा तैरित्यर्थो द्रव्यम्। (त. वा. १, १७, १); स्वपर्यायान् द्रवति द्रूयते वा तैरिति द्रव्यम्। (त. वा. १, २९, १); स्व-परप्रत्ययोत्पाद-विगमपर्यायैः द्रूयन्ते द्रवन्ति वा तानीति द्रव्याणि। (त. वा. ५, २, १)। ११. ××× द्रव्यमेकान्वयानुगम् ॥ ××× निश्चयात्मकम् ×××। (लघीय. ६६–६७)। ११. अद्रवद् द्रवति द्रोष्यत्येकानेकं स्वपर्ययम्। (न्यायवि. ११४)। १३. तदेकान्तानां विपक्षोपेक्षालक्षणानां त्रिकालविषयाणां समितिर्द्रव्यम्। (अष्टश. १०७)। १४. द्रवति द्रोष्यति अदुद्रवदिति वा द्रव्यम्। (लघीय. स्वो. वृ. २–३०)। १५. अनादिनिधनं द्रव्यमुत्पित्सु स्थास्नु नश्वरम्। स्वतोऽन्यतो विवर्तेत क्रमाद्धेतु-फलात्मना ॥ (सिद्धि-वि. ३–१९, पृ. २१०, पं. ८–९)। १३. गुण-पर्ययवद् द्रव्यम् ×××। (न्यायवि. १–११५; प्रमाणसं. स्वो. वृ. ५६)। १७. द्रोष्यत्यदुद्रुवत्तांस्तान् पर्यायानिति द्रव्यम्। (धव. पु. १, पृ. ८३); द्रवति द्रोष्यति अदुद्रुवत् पर्यायानिति द्रव्यम्। अथवा द्रूयते द्रोष्यते अद्राविं पर्याय इति द्रव्यम्। (धव. पु. ३, पृ. २); 'उप्पाद-ट्ठिदि-भंगा हंदि दवियलक्खणं' इक्चारिसादो त्ति। (धव. पु. ४, पृ. ३३६); स्वकासाधारणलक्षणापरित्यागेन द्रव्यान्तरासाधारणलक्षणपरिहारेण द्रवति द्रोष्यत्यदुद्रुवत् तांस्तान् पर्यायानिति द्रव्यम्। (धव. पु. १५, पृ. ३३)। १८. द्रवति गच्छति तांस्तान् पर्यायान्, द्रूयते गम्यते तैस्तैः पर्यायैरिति वा द्रव्यम्। (जयध. १, पृ. २११); तिकालगोयराणंतपज्जयाणं समुच्चओ अजहउत्तिलक्खणो धम्मी, तं चेव दव्वं। (जयध. १, पृ. २८६)। १९. द्रवति गच्छति तांस्तान् पर्यायानिति द्रव्यम्। ××× द्रव्यलक्षणं चेदम्—भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके। तद् द्रव्यं तत्त्वज्ञैः सचेतनाचेतनं कथितम् ॥ (अनुयो. हरि. वृ. पृ. ८ उद्.; आव. मलय. वृ. पृ. ६उद्.)। २०. स्व-परप्रत्ययोत्पाद-विगमपर्यायैर्द्रूयन्ते द्रवन्ति वा तानीति द्रव्याणि। (त. श्लो. ५, २)। २१. द्रव्यस्य लक्षणं गुण-पर्ययवत्त्वम्। (अष्टस. ७१, पृ. २२८); ततः सूक्तम्—त्रिकालवर्तिनयोपनयविषयपर्यायविशेषसमूहो द्रव्यमेकानेकात्मकं जात्यन्तरं वस्त्विति (अष्टस. १०७, पृ. २९०)। २२. समुत्पाद-व्यय-ध्रौव्यलक्षणं क्षीणकल्मषाः। गुण-पर्ययवद् द्रव्यं वदन्ति जिन-पुङ्गवाः ॥ (त. सा. ५–१२१)। २३. द्रवति गच्छति सामान्यरूपेण व्याप्नोति तांस्तान् क्रमभुवः सहभुवश्च सद्भावपर्यायान् स्वभावविशेषानित्यनुगतार्थया निरुक्त्या द्रव्यं व्याख्यातम्। (पंचा. का. अमृत. वृ. ९); सद्द्रव्यलक्षणमुक्तलक्षणायाः सत्ताया अविशेषाद् द्रव्यस्य सत्स्वरूपमेव लक्षणम्। (पंचा. का. अमृत. वृ. १०); द्रव्यं हि गुणानां समुदायः। (पंचा. का. अमृत. वृ. ४४)। २४. निजनिजप्रदेशसमूहैरखण्डवृत्त्यास्वभाव - विभावपर्यायान् द्रवति द्रोष्यति अदुद्रुवदिति द्रव्यम्। (आलापप., पृ. १४०)। २५. दवदि दविस्सदि दविदं जं सब्भावेहिं विविहपज्जाए। (द्रव्यस्व. ३६)। २६. द्रूयते गुणपर्यायैर्यद् द्रवति तानथ। तद् द्रव्यं ××× ॥ (योगशा. २–५)। २७. द्रव्यं पूर्वोत्तरविवर्त्तवर्त्यन्वयप्रत्ययसमधिगम्यम् ऊर्ध्वतःसामान्यम्। (न्याय-कु. १–५, पृ. ११७)। २८. यत्र सद्भिराधीयमाना गुणा संक्रामन्ति तद् द्रव्यम्। (नीतिवा. ५–४१, पृ. ५७)। २९. शुद्धगुण-पर्यायाधारभूतं शुद्धात्मद्रव्यं द्रव्यम्। (प्रव. सा. जय. वृ. २–२३)। ३०. अवस्थान्तरं द्रवति गच्छतीति द्रव्यम्। आ. मी. वसु. वृ. १०)। ३१. स्थित्युत्पत्ति-व्ययात्मा द्रवति द्रोष्यत्यदुद्रुवत्। स्वपर्यायानिति द्रव्यमर्थस्तान् तान् विवक्षितान् ॥ गुणपर्ययवद्द्रव्यं स्याद् ××× ॥ (आचा. सा. ३, ७–८)। ३२. तत्र द्रव्यमन्वयिरूपम्। (धर्मसं. मलय. वृ. पृ. ३३८); अन्वयिरूपमिह द्रव्यमुच्यते। (धर्मसं. मलय. वृ., पृ. ३४१)। ३३. द्रवति द्रोष्यत्यदुद्रुवदिति द्रव्यम्। (लघीय. अभय. वृ., पृ. ९५)। ३४. द्रूयन्ते गम्यन्ते प्राप्यन्ते यथास्वं यथायथं यथात्मीयं पर्यायैर्यानि तानि द्रव्याणि, द्रवन्ति वा पर्यायैः प्रवर्तन्ते यानि तानि द्रव्याणि। (त. वृत्ति श्रुत. ५–२)। ३५. गुणपर्ययवद् द्रव्यं लक्षणमेतत् सुसिद्धमविरुद्धम्। गुणपर्ययसमुदायो द्रव्यं पुनरस्य भवति वाक्यार्थः ॥ गुणसमुदायो द्रव्यं लक्षणमेतावताऽप्युशन्ति बुधाः। समगुणपर्यायो वा द्रव्यं कैश्चिन्निरूप्यते वृद्धैः ॥ (पंचाध्या. १, ७२–७३)। ३६. गुण-पर्ययवद् द्रव्यं विगमोत्पाद-ध्रुवत्ववच्चापि। सल्लक्षणमिति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च स्याद् द्वाभ्यामेकेन वस्तु लक्ष्येद्वा ॥ (अध्यात्मक. २–५)।

१ जो अपने स्वभाव को न छोड़ता हुआ उत्पाद, व्यय और ध्रौव्य से सम्बद्ध रहकर गुण और पर्याय से सहित होता है, उसे द्रव्य कहते हैं। ६ नय और उपनय के जो त्रिकालविषयक एकान्त हैं उनके समुदाय का नाम द्रव्य है, इसे वस्तु भी कहा जाता है। ७ जो गुणों का आश्रय होता है उसे द्रव्य कहा जाता है।

द्रव्यकरण—१. द्रव्यस्य द्रव्येण द्रव्यनिमित्तं वा करणम्—अनुष्ठानं द्रव्यकरणम्। (सूत्रकृ. नि. शी. वृ. १, ५, पृ. ३)। २. द्रव्यस्य द्रव्येण द्रव्ये वा करणं द्रव्यकरणमिति। (आव. भा. मलय. वृ. १५३, पृ. ५५८)।

१ द्रव्य का द्रव्य के द्वारा या द्रव्य के निमित्त अनुष्ठान करने को द्रव्यकरण कहते हैं।

द्रव्यकर्म—१. जाणि दव्वाणि सब्भावकिरियाणिप्फण्णाणि तं सव्वं दव्वकम्मं णाम। (षट्खं. ५, ४, १५—धव. पु. १३, पृ. ४३)। २. पोग्गलपिंडो दव्वं (कम्मं) ××× ॥ (गो. क. ६)।

१ जो द्रव्य स्वभावतः सद्भावक्रिया से निष्पन्न हैं, इस सबको द्रव्यकर्म कहा जाता है। जीव का जो ज्ञान-दर्शनस्वरूप से परिणमन है, यह जीवद्रव्य की सद्भावक्रिया है, पुद्गल का जो वर्ण रसादिरूप परिणमन है, यह पुद्गलद्रव्य की सद्भावक्रिया है। इसी प्रकार धर्मादि द्रव्यों की भी सद्भावक्रिया जानना चाहिए। २ द्रव्य और भाव के भेद से कर्म दो प्रकार का है। उनमें ज्ञानावरणादि रूप से परिणत पुद्गल पिण्ड को द्रव्यकर्म कहा जाता है।

द्रव्यकाय—द्रव्यकायो ज्ञशरीर-भव्यशरीरव्यतिरिक्तः, शरीरत्वयोग्या अगृहीतास्तत्स्वामिना वा जीवेन मुक्ता यावत् तं परिणामं न मुञ्चन्ति तावद् द्रव्यकायः। (आव. सू. १, मलय. वृ. पृ. ५५७)।

ज्ञायकशरीर और भव्यशरीर से व्यतिरिक्त द्रव्यकाय कहलाता है। शरीर के योग्य अगृहीत अथवा उसके स्वामी जीव के द्वारा छोड़े गये पुद्गलस्कन्ध जब तक उस परिणाम (अवस्था) को नहीं छोड़ते हैं तब तक उन्हें द्रव्यकाय कहा जाता है।

द्रव्यकायोत्सर्ग—१. कायोत्सर्गव्यावर्णनीयप्राभृतज्ञोऽनुपयुक्तस्तच्छरीरं वा द्रव्यकायोत्सर्गः। (मूला. वसु. वृ. ७–१५१)। २. सावद्यद्रव्यसेवनद्वारेणागतातीचारनिर्हरणाय कायोत्सर्गः, कायोत्सर्गव्यावर्णनीयप्राभृतज्ञोऽनुपयुक्तस्तच्छरीरं भाविजीवस्तद्व्यतिरिक्तो वा द्रव्यकायोत्सर्गः। (अन. ध. स्वो. टी. ८–७०)।

१ जो कायोत्सर्ग के वर्णन करने वाले प्राभृत का ज्ञाता हो करके वर्तमान में उसके उपयोग से रहित है ऐसे जीव को, अथवा उसके शरीर को द्रव्यकायोत्सर्ग कहते हैं।

द्रव्यकारक—द्रव्यस्य द्रव्येण द्रव्यभूतो वा कारको द्रव्यकारकः। (सूत्रकृ. नि. शी. वृ. ४)।

द्रव्य के, द्रव्य के द्वारा अथवा द्रव्यस्वरूप कारक को द्रव्यकारक कहते हैं।

द्रव्यकाल—१. चेयणमचेयणस्स व दव्वस्स ठिइ उ जा चउविगप्पा। सा होइ दव्वकालो अहवा दवियं तु तं चेव ॥ (आव. नि. ६६१)। २. दव्वस्स वत्तणा जा स दव्वकालो तदेव वा दव्वं। न हि वत्तणाविभिण्णं जम्हा दव्वं जओऽभिहिअं ॥ सुत्ते जीवाजीवा समयाऽऽवलियादओ पवुच्चंति। दव्वं पुण सामन्नं भण्णइ दव्वट्ठयामेत्तं ॥ (विशेषा. २५२८–२९)। ३. वर्तनादिलक्षणो द्रव्यकालः। (आव. नि. हरि. वृ. ६६०, पृ. २५७)। ४. 'द्रव्य' इति वर्तनादिलक्षणो वाच्यः ××× । तत्र चेतनस्य सुरादेर्द्रव्यस्य अचेतनस्य स्कन्धादेर्द्रव्यस्य या स्थितिः—या अवस्था चतुर्विकल्पा—चतुर्भङ्गा—सा द्रव्यकालो भवति, द्रव्यस्य कालो द्रव्यकाल इति षष्ठीतत्पुरुषो भेदे, अथवा तदेव सुरादिद्रव्यं काल उच्यते, पर्यायपर्यायिणोरभेदोपचारात्। ××× द्रवतीति द्रव्यम्, तस्य द्रव्यस्य या वर्तना दव्वकालो—सा द्रव्यकालो भण्यते। वा—अथवा तदेव द्रव्यं कालो द्रव्यकाल इति कर्मधारयः समासः। ××× जीवाजीवाः समयादयोऽभिधीयन्ते, जीवादयः काल उच्यते इत्यर्थस्तस्माद् द्रव्यमेव कालो द्रव्यकाल इति। (विशेषा. भा. को. वृ. २५२८–२९, पृ. ६०६–७)।

१ चेतन-अचेतन द्रव्य की जो चार भंग (सादि-सपर्यवसान, सादि-अपर्यवसान, अनादि-अपर्यवसान व अनादि-सपर्यवसान) रूप-स्थिति है, उसे द्रव्यकाल (द्रव्य का काल) कहा जाता है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रव्यक्रीत—सचित्तं गो-बलीवर्दादिकं दत्त्वा संयतार्थं क्रीतम्, अचित्तं वा घृत-गुड-खण्डादिकं दत्त्वा क्रीतं (वेश्म) द्रव्यक्रीतम् । (भ. आ. २३०; कार्तिके. टी. ४४८–४९) ।

सचित्त गाय-बैल आदि को देकर अथवा अचित्त घी, गुड एवं खांड आदि को देकर ग्रहण की गई वसतिका द्रव्यक्रीत नामक उद्गम दोष से दूषित होती है ।

द्रव्यक्रोध—दव्वकोहो णाम भावकोवुप्पत्तिणिमित्तं दव्वं । (धव. पु. ७, पृ. ८२) ।

भावक्रोध की उत्पत्ति के कारणभूत द्रव्य को द्रव्यक्रोध कहते हैं ।

द्रव्यगत पिण्डदोष—द्रव्यमुद्गमादिदोषसहितमप्यधःकर्मणा युक्तं द्रव्यगतमित्युच्यते । (मूला. वृ. ६–६९) ।

उद्गमादि दोषसहित भी अधःकर्म से युक्त भोज्यपदार्थ द्रव्यगत पिण्डदोष (आहारदोष) से दूषित होता है ।

द्रव्यगत स्वभाव—बाह्येतरोपाधिसमग्रतेयं कार्येषु ते द्रव्यगतः स्वभावः । (बृहत्स्व. स्तो. ६०) ।

कार्यों के विषय में अन्तरंग और बहिरंग कारणों की पूर्णता को द्रव्यगत स्वभाव कहा जाता है ।

द्रव्यचतुर्विंशति—द्रव्यचतुर्विंशतिश्चतुर्विंशतिर्द्रव्याणि, सचित्ताचित्त-मिश्रभेदभिन्नानि । (आव. भा. मलय. वृ. १९२, पृ. ५८९) ।

सचित्त, अचित्त और मिश्ररूप चौबीस द्रव्यों को द्रव्यचतुर्विंशति कहते हैं ।

द्रव्यचारित्र—द्रव्यचारित्रमभव्यस्य भव्यस्य वाऽनुपयुक्तस्य । (त. भा. सिद्ध. वृ. १–५) ।

अभव्य अथवा भव्य के उपयोग से रहित चारित्र को द्रव्यचारित्र कहा जाता है ।

द्रव्यच्छेदना—दवियं णाम उप्पाद-ट्ठिदि-भंगलक्खणं तं पि छेदणा होदि, दव्वादो दव्वंतरस्स परिच्छेददंसणादो । (धव. पु. १४, पृ. ४३५) ।

द्रव्य का लक्षण उत्पाद, स्थिति और भंग (व्यय) है । इस प्रकार का द्रव्य भी छेदनारूप है, क्योंकि एक द्रव्य (कुडव—धान्य के नापने का एक माप) से दूसरे द्रव्य (धान्य) का छेद—प्रमाण का ज्ञान होता देखा जाता है ।

द्रव्यजिन—१. घणुहसहचारपज्जाएण तीदाणागय-वट्टमाणमणुआणं घणुहववएसो व्व जिणाहारपज्जाएण तीदाणागय-वट्टमाणसरीराणं दव्वजिणत्तं पडिविरोहाभावादो (जिणाहारपज्जाएण तीदाणागद-वट्टमाणसरीरा दव्वजिणा) । (धव. पु. ९, पृ. ७) । २. दव्वजिणा जिणजीवा ××× ॥ (चैत्यवन्दनक भा. दे. गा. ५१) ।

१ जिनकी आधारभूत पर्याय के आश्रय से अतीत, अनागत और वर्तमान शरीर को द्रव्यजिन कहा जाता है । २ जिन जीवों—तीर्थंकरों (समवसरणस्थ तीर्थंकर को छोड़कर)—को द्रव्यजिन कहते हैं ।

द्रव्यजीव—१. यथेन्द्रार्थमानीतं काष्ठमिन्द्रप्रतिमापर्यायप्राप्ति प्रत्यभिमुखम् इन्द्रः इत्युच्यते तथा जीव-सम्यग्दर्शनपर्यायप्राप्ति प्रति गृहीताभिमुख्यं द्रव्यं द्रव्यजीवो द्रव्यसम्यग्दर्शनमिति चोच्यते । (त. वा. १, ५, ४) । २. द्रव्यं तद्गुणवियुक्तः । ××× विवक्षया ज्ञानादिगुणवियुक्तत्वं द्रव्यजीवः । (त. भा. हरि. वृ. १–५) । ३. द्रव्यजीवो नाम योऽयमस्मिन् शरीर आत्मा स यदा भावैर्ज्ञानादिभिर्वियुतो विवक्ष्यते स द्रव्यजीवः । (त. भा. सिद्ध. वृ. १–५) ।

१ जीवनपर्याय (मनुष्यादिविशेषरूप) की प्राप्ति के प्रति अभिमुख द्रव्य को द्रव्यजीव और सम्यग्दर्शनपर्याय की प्राप्ति के अभिमुख द्रव्य को द्रव्यसम्यग्दर्शन कहा जाता है । २ विवक्षावश ज्ञानादिगुणों की वियुक्तता का नाम द्रव्यजीव है ।

द्रव्यज्ञान—तथा द्रव्यज्ञानमनुपयुक्ततावस्था । (त. भा. सिद्ध. वृ. १–५) ।

ज्ञान की उपयोग रहित अवस्था को द्रव्यज्ञान कहते हैं ।

द्रव्यतः इन्द्रियविवेक—१. रूपादिविषये चक्षुरादीनामादरेण कोपेन वा अप्रवर्तनम् इदं पश्यामि शृणोमि वा, तथा तस्या निविड़कुचतटं पश्यामि, नितम्बरोमराजिं वा विलोकयामि, पृथुतरं जघनं स्पृशामि, कलं गीतं सावधानं शृणोमि, मुख-कमल-परिमलं जिघ्रामि, बिम्बाधरमास्वादयामि इति वचनानुच्चारणं वा द्रव्यतः इन्द्रियविवेकः । (भ. आ. विजयो., पृ. १६८) । २. रूपादिषु चक्षुरादीनां रागेण द्वेषेण वा अप्रवर्तनमिदं पश्यामीत्यादिरूपेणान्तर्विकल्पेन वाग्व्यापारेण वा द्रव्यतः इन्द्रियविवेकः । (भ. आ. मूला., पृ. १६८) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१ रूप-रसादिरूप इन्द्रिय विषयों में आदर (राग) से अथवा कोप (द्वेष) के वश प्रवृत्त न होना, इसे द्रव्यतः इन्द्रियविवेक कहते हैं अथवा इसे देखता हूं, उसे सुनता हूं, उस स्त्री के कुचों को देखता हूं, अथवा नितम्बगत रोमपंक्ति को देखता हूं, इत्यादि रूप से वचन का उच्चारण न करना; इसे द्रव्यतः इन्द्रियविवेक जानना चाहिए।

द्रव्यतः क्रमोत्तर—तत्र द्रव्यतः परमाणोर्द्विप्रदेशिकः ततोऽपि त्रिप्रदेशिकः एवं यावदन्तोऽनन्तप्रदेशिकः स्कन्धः। (उत्तरा. नि. शा. वृ. १-१, पृ. ४)। परमाणु की अपेक्षा द्विप्रदेशी स्कन्ध, उसकी अपेक्षा त्रिप्रदेशी स्कन्ध, इस प्रकार अन्तिम अनन्तप्रदेशी स्कन्ध तक उत्तरोत्तर बढ़ते हुए स्कन्धों को द्रव्यतः क्रमोत्तर कहते हैं।

द्रव्यतः लोभविवेक—द्रव्यतो लोभविवेको यत्रास्य लोभस्तदुद्दिश्य कराप्रसारणादिकः कायेन, ममेदमित्याद्यवचनं वाचा। (भ. आ. मूला., १६८)। जिस वस्तु के विषय में इसे लोभ है उसको लक्ष्य बनाकर हाथ फैलाने आदिरूप काय से प्रवृत्ति नहीं करना तथा 'यह मेरा है' इत्यादि प्रकार से वचन का उच्चारण न करना, उसे द्रव्यतः लोभविवेक कहा जाता है।

द्रव्यतः न भावतः (हिंसा)—या पुनर्द्रव्यतो न भावतः सा खल्वीर्यादिसमितस्य साधोः कारणे गच्छत इति। उक्तं च—उच्चालिअम्मि पाए इरियासमिअस्स संकमट्ठाए। वावज्जेज कुलिंगी मरिज्ज तं जोग्गमासज्जा॥ न य तस्स तण्णिमित्तो बंधो सुहुमो वि देसिओ समए। जम्हा सो अपमत्तो सा य पमाओ त्ति निद्दिट्ठा॥ (दशवै. नि. हरि. वृ. ४५)।

ईर्यासमिति से युक्त साधु जब कारणवश कहीं अन्यत्र जाता है तब वह पैरों को जो उठाता धरता है उसके आश्रय से द्वीन्द्रिय आदि क्षुद्र प्राणियों का मरण सम्भव है, फिर भी उसके आश्रय से उसे सूक्ष्म बन्ध भी आगम में नहीं कहा गया, कारण इसका यह है कि वह प्रमाद से रहित है, अर्थात् जीवरक्षा में सावधान है, और प्राणिहिंसा जो होती है वह प्रमाद से ही हुआ करती है। इस प्रकार उक्त साधु के द्वारा जीवहिंसा (द्रव्यतः) के होने पर भी वैसा भाव न होने से वस्तुतः (भावतः) हिंसा नहीं है। यही द्रव्यतः न भावतः हिंसा कहलाती है।

द्रव्यतीर्थ—१. दाहोपसमण तण्हाछेदो मलपंकपवहणं चेव। तिहिं कारणेहिं जुत्तो तम्हा तं दव्वदो तित्थं॥ (मूला. ७-६२)। २. द्रव्यतीर्थं तीर्थकृतां जन्म-दीक्षा-ज्ञान-निर्वाण-स्थानम्। यदाह—जम्मं दिक्खा णाणं तित्थयराणं महाणुभावाणं। जत्थ य किर निव्वाणं आगाढं दंसणं होई॥ (योगशा. स्वो. विव. २-१६)।

१ सन्ताप की शान्ति, तृष्णा का विनाश और मलरूप कीचड़ का दूर करना; इन तीन कारणों से जो युक्त है—उनका कारण है—उसे द्रव्यतीर्थ कहते हैं। २ तीर्थंकरों के जन्म, दीक्षा, ज्ञान और निर्वाण स्थानों को द्रव्यतीर्थ कहा जाता है।

द्रव्यदिक्—तेरसपएसियं खलु तावइएसुं भवे पएसेसुं। जं दव्वं ओगाढं जहण्णयं तं दसदिसागं॥ (आचारा. नि. ४१, पृ. १२)।

आगम और नोआगम के भेद से द्रव्यदिक् दो प्रकार की है। उनमें दिशानिरूपक आगम का ज्ञाता होकर जो जीव वर्तमान में तद्विषयक उपयोग से रहित है उसे आगम द्रव्यदिक् कहते हैं। ज्ञायकशरीर और भव्यशरीर से भिन्न जो तेरह प्रदेशी द्रव्य तेरह प्रदेशवाले क्षेत्र में स्थित है वह नोआगम की अपेक्षा द्रव्यदिक् कहलाती है। वह दस दिशाओं का विभाग करनेवाली है।

द्रव्यद्रव्य—१. द्रव्यद्रव्यं नाम गुण-पर्यायवियुक्तं प्रज्ञास्थापितं धर्मादीनामन्यतमत्। केचिदप्याहुः—यद् द्रव्यतो द्रव्यं भवति तच्च पुद्गलद्रव्यमेवेति प्रत्येतव्यम्। अणवः स्कन्धाश्च, सङ्घातभेदेभ्य उत्पद्यन्त इति वक्ष्यामः। (त. भा. १-५)। २. द्रव्यद्रव्यमिति उभाभ्यां द्रव्यशब्दाभ्यां गुणादिभ्यो निष्कृष्य द्रव्यमात्रे स्थाप्यते। ××× केचित् पुनर्ब्रुवते यदित्यणुकादि द्रव्यतो द्रव्यमिति। तृतीयार्थे पञ्चम्यर्थे वा तसिरुत्पाद्यः—द्रव्यैः सम्भूय यत् क्रियते, यथा बहुभिः परमाणुभिः सम्भूय स्कन्धस्त्रिप्रदेशिकादिरारभ्यते तद् द्रव्यद्रव्यम्। अथवा यद् द्रव्यात् तस्मादेव स्कन्धात् त्रिप्रदेशिकादेर्यदैकः परमाणुः पृथग्भूतो भवति तदा तस्माद् भिद्यमानात् त्रिप्रदेशिकात् स्कन्धात् परमाणुश्च निष्पद्यते द्विप्रदेशिकश्च स्कन्ध इति स परमाणुरपि द्रव्यद्रव्यं द्विप्रदेशिकोऽपि द्रव्यद्रव्यं भवतीति। तच्चैतद् द्रव्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रव्यं पुद्गलमेव भवतीति प्रत्येतव्यम्। (त. भा. सिद्ध. वृ. १-५, पृ. ४९-५०)।

१ गुण और पर्याय से विहीन बुद्धि में स्थापित धर्माधर्मादिकों में से किसी एक को द्रव्यद्रव्य कहा जाता है। किन्हीं आचार्यों के मत से द्रव्य-द्रव्य—द्रव्य से द्रव्य—संघात और भेदके कारण पुद्गल द्रव्य ही होता है।

द्रव्यधर्म—१. सचित्तेतरभेदस्स होइ दव्वस्स जो खलु सहावो। एसो उ दव्वधम्मोऽणुवउत्तस्सऽहव सुयमादी॥ (धर्मसं. ३०)। २. द्रव्यस्य—अनुपयुक्तस्य—धर्मो मूलोत्तरगुणानुष्ठानं द्रव्यधर्मः। इहानुपयुक्तो द्रव्यम्; 'अनुपयोगो द्रव्यम्' इति वचनात्। द्रव्यमेव वा धर्मो द्रव्यधर्मः—धर्मास्तिकायः, ××× तिक्तादिर्वा द्रव्यस्य स्वभावो द्रव्यधर्मः। ××× गम्यादिर्धर्मः स्त्रीविषयो द्रव्यधर्मः। तत्र केषांचित् मातुलदुहिता गम्या, केषांचिदगम्येत्यादिः। (आव. नि. मलय. वृ. १०७५)।

१ सचित्त—चेतन मनुष्य आदि—और अचित्त—धर्मास्तिकायादि—द्रव्यों के निज स्वभाव को द्रव्यधर्म कहते हैं। अथवा अनुपयुक्त—तत्तद्विषयक उपयोग से रहित—जीव का जो श्रुत आदि है उसे द्रव्यधर्म जानना चाहिए।

द्रव्यनपुंसक—१. नपुंसकवेदोदययुक्ताङ्गोपाङ्गनामकर्मोदयात् स्मश्रु-कूर्च-स्तन-योन्यादिलिंगाभावविशिष्टदेहं द्रव्यनपुंसकं भवति। (गो. जी. म. प्र. २७१)। २. नपुंसकवेदोदयेन निर्माणनामकर्मोदययुक्ताङ्गोपाङ्गनामकर्मोदयेन उभयलिङ्गव्यतिरिक्तदेहाङ्कितो भवप्रथमसमयमादिं कृत्वा तद्भवचरमसमयपर्यन्तं द्रव्यनपुंसकजीवो भवति। (गो. जी. जी. प्र. २७१)।

१ नपुंसक वेद के उदय के साथ अंगोपांगनामकर्म के उदय से स्मश्रु, कूर्च, स्तन और योनि आदि चिह्नों से रहित देह को द्रव्यनपुंसक कहते हैं।

द्रव्यनमस्कार—१. नमस्तस्मै इत्यादिशब्दोच्चारणं उत्तमांगावनतिः कृतांजलिता च द्रव्यनमस्कारः। (भ. आ. विजयो. ७२२)। २. वाचा अर्हत्-सिद्धप्रमुखपरमेष्ठिस्वरूपशुद्धपरमात्मद्रव्यवस्तुस्तवगुणस्तवनगम्भीरोदारार्थविराजमानसकलशब्दब्रह्मबीजभूतनानास्तोत्ररूपः, कायेन पंचांगनत्या प्रणमनरूपो द्रव्यनमस्कारः। (आरा. सा. टी. १, पृ. ४)।

१ 'उसके लिए नमस्कार हो' इत्यादि शब्दों का उच्चारण करना, मस्तक का झुकाना और हाथों की अंजलिका बांधना—हाथों का जोड़ना, यह द्रव्यनमस्कार कहलाता है।

द्रव्यनिक्षेप—१. अनागतपरिणामविशेषं प्रति गृहीताभिमुख्यं द्रव्यम्। (लघीय. स्वो. ७६, पृ. ७९९)। २. यत्स्वतोऽभिमुखं वस्तु भविष्यत्पर्ययं प्रति। तद् द्रव्यं द्विविधं ज्ञेयमागमेतरभेदतः॥ (त. श्लो. १, ५, ६०, पृ. १११)। ३. भाविनः परिणामस्य यत्प्राप्तिं प्रति कस्यचित्। स्याद् गृहीताभिमुख्यं हि तद् द्रव्यं ब्रुवते जिनाः॥ (त. सा. १-१२)। ४. विवक्षितासाम्प्रतिकपर्यायविशेषस्थितिर्द्रव्यनिक्षेपः। (सिद्धिवि. वृ. १२-२, पृ. ७३९, पं. १३)। ५. आगामिगुणयोग्योऽर्थो द्रव्यन्यासस्य गोचरः। (उपासका. ८२७)। ६. द्रव्यं भविष्यत्पर्यायं गतापितविवर्ति च। (आचा. सा. ९-७)। ७. गुणैर्द्रुतं गतं प्राप्तं द्रव्यम्, गुणान् वा द्रुतं गतं प्राप्तं द्रव्यम्, गुणैर्द्रोष्यते द्रव्यम्, गुणान् द्रोष्यतीति द्रव्यम्। (त. वृत्ति श्रुत. १-५)। ८. वर्तमानतत्पर्यायादन्यद्द्रव्यम्। (परमा. त. १-९)।

१ जो भावी परिणामविशेष (पर्याय) की प्राप्ति के प्रति अभिमुख हो—उसकी योग्यता को धारण करता हो—उसे द्रव्यनिक्षेप कहते हैं।

द्रव्यनिबन्धन—निबध्यते तदस्मिन्निति निबन्धनम्। जं दव्वं जम्हि णिबद्धं तं णिबंधणं ति भणिदं होदि। ××× जं दव्वं जाणि दव्वाणि अस्सिदूण परिणमदि, जस्स वा दव्वस्स सहावो दव्वंतरपडिबद्धो तं दव्वणिबंधणं। (धव. पु. १५, पृ. १-२)।

जो द्रव्य जिन द्रव्यों का आश्रय लेकर परिणमता है, अथवा जिस द्रव्य का स्वभाव द्रव्यान्तर से सम्बद्ध है उसका नाम द्रव्यनिबन्धन है।

द्रव्यनिद्रा—तत्र द्रव्यनिद्रा निद्रावेदो वेदनमनुभवः, दर्शनावरणीयविशेषोदय इति यावत्। (सूत्रकृ. नि. शी. वृ. ४२, पृ. ५६)।

दर्शनावरणीयविशेष के उदय से जो निद्रा का वेदन या अनुभव होता है उसे द्रव्यनिद्रा कहते हैं।

द्रव्यनिर्जरा—१. द्रव्यनिर्जरा नाम गृहीतानामशनपानादिद्रव्याणां एकदेशापगमनं वमनादि। (भ. आ. विजयो. १८४७; अन. ध. स्वो. टी. २-४२)। २. द्रव्यनिर्जरा मोक्षाधिकारशून्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्रीह्यादीनाम् । (त. भा. सिद्ध. वृ. १-५, पृ ४९)। ३. तदनुभावनीरसीभूतानामेकदेशसंक्षयः समुपात्त-कर्मपुद्गलानां द्रव्यनिर्जरा । (पंचा. का. अमृत. वृ. १४४) । ४. तस्स कर्मणो गलनं यच्च सा द्रव्य-निर्जरा । (बृ. द्रव्यसं. ३६) । ५. तेन शुद्धोपयोगेन नीरसीभूतस्य चिरन्तनकर्मण एकदेशगलनं द्रव्यनि-र्जरा । (पंचा. का. जय. वृ. १०८); तस्य शुद्धो-पयोगस्य सामर्थ्येन नीरसीभूतानां पूर्वोपार्जितकर्म-पुद्गलानां संवरपूर्वकभावेनैकदेशसंक्षयो द्रव्यनिर्जरा । (पंचा. का. जय. वृ. १४४) । ६. आत्मनो गलनं द्रव्यकर्मणां द्रव्यनिर्जरा । (आचा. सा. ३-३५) । ७. पूर्वनिबद्धकर्मणां निर्जरणं द्रव्यनिर्जरा । (परमा. त. ६-१) । ८. आत्मनः शुद्धभावस्य तपसोऽति-शयादपि । यः पातः पूर्वबद्धानां कर्मणां द्रव्यनिर्जरा ।। (जम्बू. च. १३-१२८) । ९. शुद्धादुपयोगादिह निश्चयतपसश्च संयमादेर्वा । गलति पुरा बद्धं किल कर्मैषा द्रव्यनिर्जरा गदिता ।। (अध्यात्मक. ४-१३)। १ ग्रहण किये गये भोजन-पानादिरूप द्रव्यों का वमन-विरेचनादिरूप में एक देश निर्जीर्ण होना, इसका नाम द्रव्यनिर्जरा है । २ मोक्ष के अधिकार को छोड़कर जो व्रीहि (धान्यविशेष) आदि का विनाश होता है, यह द्रव्यनिर्जरा कहलाती है । ३ फलानुभवन के पश्चात् नीरस हुए पूर्वसंचित कर्मरूप पुद्गलों के एकदेश क्षय को द्रव्यनिर्जरा कहते हैं ।

द्रव्यनिर्देश—द्रव्यस्यापि त्रिविधस्य सचित्तादेर्य-द्विशिष्टमभिधानं स द्रव्यनिर्देशः । तत्र सचित्त-द्रव्यविशेषस्य निर्देशो यथा गौरित्यादि, अचित्त-द्रव्यविशेषस्य यथाऽयं दण्ड इत्यादि, मिश्रद्रव्यवि-शेषस्य यथाऽयं रथोऽश्वयुक्त इत्यादि । तेन सचित्ता-दिद्रव्यविशेषेण निर्देशो यथा गोमानित्यादि । (आव. नि. मलय. वृ. १४०) ।

सचित्तादि द्रव्यों का जो विशेषता से युक्त कथन किया जाता है उसे द्रव्यनिर्देश कहते हैं । सचित्त द्रव्य का निर्देश जैसे—'यह गाय है' इत्यादि, इसी प्रकार अचित्त द्रव्यविशेष का निर्देश जैसे—'यह दण्ड है' इत्यादि, तथा मिश्र द्रव्यविशेष का निर्देश जैसे—'यह घोड़ों से युक्त रथ है' इत्यादि । इस प्रकार सचित्त आदि द्रव्यविशेष से जो निर्देश किया जाता है—जैसे यह गाय वाला है, इत्यादि, इसे द्रव्यनिर्देश जानना चाहिए ।

द्रव्यनिर्विचिकित्सागुण—भेदाभेदरत्नत्रयाराधक-भव्यजीवानां दुर्गन्धबीभत्सादिकं दृष्ट्वा धर्मबुद्ध्या कारुण्यभावेन वा यथायोग्यं विचिकित्सापरिहरणं द्रव्यनिर्विचिकित्सागुणः । (बृ. द्रव्यसं. ४१) ।

भेद-अभेदरूप रत्नत्रय के धारक भव्य जीवों के दुर्गन्धित व बीभत्स शरीर आदि को देख करके धर्मबुद्धि से या करुणाभाव से ग्लानि नहीं करने को द्रव्यनिर्विचिकित्सागुण कहते हैं ।

द्रव्यपक्व—उस्सेइमाइ तं चिय पक्विंधणजोगतो पक्वं ।। (बृहत्क. नि. १०३४) ।

जो उत्स्वेदिम, संस्वेदिम, उपस्कृत और पर्यायरूप आम द्रव्य कहे गये हैं । उनको ईंधन के संयोग से पका लेने पर द्रव्यपक्व कहा जाता है ।

द्रव्यपरिवर्तन—देखो कर्मद्रव्यपुद्गलपरिवर्तन व नोकर्मद्रव्यपरिवर्तन । १. अण्णं गिण्हदि देहं तं पुण मुत्तूण गिण्हदे अण्णं । घडिजंतं व य जीवो भमदि इमो दव्वसंसारे ।। (भ. आ. १७७३) । २. णोकम्म-पोग्गलपरियट्टणं कम्मपोग्गलपरियट्टणं च दव्वपरि-वट्टणं । (धव. पु. ४, पृ. ३२५) । ३. बंधदि मुंचदि जीवो पडिसमयं कम्मपुग्गला विविहा । णोकम्मपुग्गला वि य मिच्छत्त-कसाय-संजुत्तो ।। (कार्तिके. ६७) । ४. द्रव्यसंसारो नाम शरीरग्रहण-मोक्षणाभ्यावृत्तिरसकृत् । (भ. आ. विजयो. ४४६) । ५. शुद्धात्मद्रव्यादितराणि स पूर्वापूर्वमिश्रपुद्गलद्रव्याणि ज्ञानावरणादिद्रव्यकर्म-रूपेण शरीरपोषणार्थाशन-पानादि-पंचेन्द्रियविषय-रूपेण चानन्तवारान् गृहीत्वा विमुक्तानीति द्रव्य-संसारः । (बृ. द्रव्यसं. टी. ३५, पृ. ८९) । ६. तत्र संसरणम्—इतश्चेतश्च परिभ्रमणं संसारः । तत्र संसारशब्दार्थज्ञस्तत्रानुपयुक्तो द्रव्याणां वा जीव-पुद्गललक्षणानां यथायोगं भ्रमणं द्रव्यसंसारः । (स्थानां. अभय. वृ. ४, १, २६१) । ७. नारकादि-शरीराणां ग्रहण-मोक्षणाभ्यामसकृद्वृत्तिर्द्रव्यसंसारः । (भ. आ. मूला. ४३०) । ८. तावत्स द्रव्यसंसारो लक्ष्यो सूक्ष्मार्थदर्शिभिः । कर्म-नोकर्मरूपेण पुद्गला-दानलक्षणः ।। गृहीताश्चागृहीताश्च मिश्राश्चापि निसर्गतः । विद्यन्ते पुद्गलास्त्रेधा लोकेऽस्मिन् निचि-ताः स्फुटम् ।। तद्विवक्षितजीवेन ते त्रेधापीह पुद्गलाः । कर्म-नोकर्मभावेन नीत्वा वारानन्तशः ।। भुक्तो-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्झिताः पुनश्चापि पुनर्नीत्वा पुनस्तथा। एवं समुदितः सर्वो द्रव्यसंसार उच्यते ॥ (जम्बू. च. १३, २७–३०)।

१ प्राणी एक शरीर को ग्रहण करता है, पश्चात् उसे छोड़ अन्य को ग्रहण करता है, फिर उसे भी छोड़ अन्य को ग्रहण करता है। इस प्रकार अरहट की घटिकाओं के समान उत्तरोत्तर पूर्व शरीर को छोड़कर अन्य-अन्य शरीर को ग्रहण करता हुआ संसार में जो परिभ्रमण करता है, इसका नाम द्रव्यपरिवर्तन है। ६ इधर उधर परिभ्रमण का नाम संसार है। संसार शब्द के अर्थ का ज्ञाता होकर जो तद्विषयक उपयोग से रहित होता है उसे द्रव्यसंसार कहते हैं, अथवा जीव व पुद्गल द्रव्यों का जो यथायोग्य परिभ्रमण होता है उसे द्रव्यसंसार जानना चाहिए। इसे द्रव्यपरिवर्तन भी कहा जाता है।

द्रव्यपर्याय—अनेकद्रव्यात्मिकाया ऐक्यप्रतिपत्तिनिबन्धनकारणभूतो द्रव्यपर्यायः अनेकद्रव्यात्मिकैकयानवत्। (पंचा. का. जय. वृ. १६)।

अनेक द्रव्यस्वरूप एक यान (नौका आदि) के समान अनेक द्रव्यस्वरूप एकताप्रतिपत्ति (अभेदज्ञान) की कारणभूत पर्याय को द्रव्यपर्याय कहते हैं। वह अचेतन परमाणुओं के स्कन्धरूप सजातीय और भवान्तर्गत जीव की शरीरनोकर्मपुद्गल के साथ मनुष्यादि पर्यायस्वरूप असमान जातीय के भेद से दो प्रकार की है।

द्रव्यपर्यायार्थिकनैगम— १. द्रव्यार्थिकनयविषयं पर्यायार्थिकनयविषयं च प्रतिपन्नः द्रव्य-पर्यायार्थिकनैगमः। (जयध. १, पृ. २४५)। २. द्रव्य-पर्यायार्थिकनयद्वयविषयः नैगमोद्भेदजः। (धव. पु. ९, पृ. १८१)।

जो द्रव्यार्थिक और पर्यायार्थिक दोनों ही नयों के विषय को ग्रहण करता है उसे द्रव्यपर्यायार्थिक नैगमनय कहते हैं।

द्रव्यपाप—१, पुद्गलस्य कर्तृनि (अन. 'कर्तृनि') श्चयकर्मतामापन्नोऽविशिष्टप्रकृतित्वपरिणामो जीवाऽशुभपरिणामनिमित्तो द्रव्यपापम्। (पंचा. का. अमृत. वृ. १३२; अन. ध. स्वो. टी. २–४०)। २. तन्निमित्तेन (भावपापनिमित्तेन) असद्वेद्याद्यशुभप्रकृतिरूपः पुद्गलपिण्डो द्रव्यपापम्। (पंचा. का. जय. वृ. १०८)।

जीव के अशुभ परिणाम के निमित्त से जो पुद्गल का विशिष्ट प्रकृतित्वरूप—ज्ञानावरणादि स्वभावरूप—परिणमन होता है उसे द्रव्यपाप कहते हैं। पुद्गल के इस परिणमन का कारण स्वयं पुद्गल है, परन्तु अज्ञानी जीव अपने को उसका कर्ता मान उसमें कर्मता का निश्चय करता है।

द्रव्यपापास्रव—तन्निमित्तो (भावपापास्रवनिमित्तो)ऽशुभकर्मपरिणामो योगद्वारेण प्रविशतां पुद्गलानां द्रव्यपापास्रवः। (पंचा. का. अमृत. वृ. १३९)।

भावपापास्रव के निमित्त से योगरूप द्वार से प्रविष्ट होते हुए पुद्गलों का जो अशुभ कर्मरूप परिणमन होता है उसे द्रव्यपापास्रव कहते हैं।

द्रव्यपुण्य—१. पुद्गलस्य कर्तृनिश्चयकर्मतामापन्नो विशिष्टप्रकृतित्वपरिणामो जीवशुभपरिणामनिमित्तो द्रव्यपुण्यम्। (पंचा. का. अमृत. वृ. १३२)। २. भावपुण्यनिमित्तेनोत्पन्नः सद्वेद्यादिशुभप्रकृतिरूपः पुद्गलपरमाणुपिण्डो द्रव्यपुण्यम्। (पंचा. का. जय. वृ. १०८)। ३. यावता (येन कारणेन) पुद्गलस्य कर्तृनिश्चयकर्मतामापन्नो विशिष्टप्रकृतित्वपरिणामो जीवशुभपरिणामनिमित्तो द्रव्यपुण्यम्। (अन. ध. स्वो. टी. २–४०)।

जीव के शुभ परिणामों के निमित्त से जो पुद्गल का विशिष्ट प्रकृतिरूप परिणमन होता है उसे द्रव्यपुण्य कहते हैं। पुद्गल के इस परिणमन का कारण स्वयं पुद्गल ही है, पर अज्ञानी जीव अपने को उसका कर्ता मान उसमें कर्मता का निश्चय करता है।

द्रव्यपुण्यास्रव— तन्निमित्तः (भावपुण्यास्रवनिमित्तः) शुभकर्मपरिणामो योगद्वारेण प्रविशतां पुद्गलानां द्रव्यपुण्यास्रवः। (पंचा. का. अमृत. वृ. १३५)।

योगरूप द्वार से प्रविष्ट होते हुए पुद्गलों का जो भावपुण्यास्रव के निमित्त से शुभ कर्मरूप परिणमन होता है उसे द्रव्यपुण्यास्रव कहते हैं।

द्रव्यपुद्गलपरावर्त— ओराल-विउव्वा-तेय-कम्म-भासाणपाण - मणएहिं ॥ फासेवि सव्वपोग्गल-मुक्का अह वायर परट्टो। अहव इमो दव्वाई ओराल-विउव्व-तेय-कम्मेहिं। नीसेसदव्वगहणंमि बायरो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

होइ परियट्टो ॥ दव्वे सुहुमपरट्टो जाहे एगेण अह सरीरेणं। फासे वि सव्वपोग्गल अणुक्कमेणं नणु गणिज्जा ॥ (प्रव. सारो. १०४१–४३)।

एक जीव ने संसाररूप वन में भटकते हुए अनन्त भवों में औदारिक, वैक्रियिक, तैजस, कार्मण, भाषा, आनपान और मन इन सात के रूप में समस्त पुद्गलों को छूकर—उनका उपभोग करके—उन्हें छोड़ा। इस क्रिया में उसका जितना काल व्यतीत हुआ उतने कालविशेष का नाम एक बादर द्रव्यपुद्गलपरावर्त है। अथवा मतान्तर के अनुसार एक जीव के द्वारा सर्वलोकगत पुद्गलों को औदारिक, वैक्रियिक, तैजस और कार्मण इन चार शरीरों के रूप में ग्रहण करके छोड़ देने पर एक बादर द्रव्यपुद्गलपरावर्त होता है। सूक्ष्म द्रव्यपुद्गलपरावर्त—कोई एक जीव संसार में परिभ्रमण करता हुआ उक्त औदारिक आदि शरीरों में से एक किसी शरीर के रूप में अनुक्रम से समस्त पुद्गलों को ग्रहण करके उन्हें छोड़ता है। इसमें उसका जितना काल लगता है उसे सूक्ष्म पुद्गलद्रव्यपरावर्त कहा जाता है। इस सूक्ष्म पुद्गल द्रव्यपरावर्त में जो पुद्गल मध्य में विवक्षित शरीर से अन्य शरीररूप से परिणत होते हैं उनकी गणना नहीं है, किन्तु जब-जब विवक्षित शरीर रूप से वे परिणत होते हैं तभी उनकी गणना की जाती है। आहारकशरीर चूंकि एक जीव के अधिक से अधिक चार बार ही सम्भव है, अत एव उसका पुद्गलपरावर्त में उपयोग न होने से उसे उक्त शरीर के साथ नहीं ग्रहण किया गया है।

द्रव्यपुरुष—१. पुंवेदोदयविशिष्टांगोपांगनामकर्मोदयवशात् स्मश्रु-कूर्च-शिश्नादिलिंगांकितशरीरो जीवः द्रव्यपुरुषः भवति। (गो. जी. म. प्र. टी. २७१)। २. पुंवेदोदयेन निर्माणनामकर्मोदययुक्तांगोपांगनामकर्मोदयवशेन श्मश्रु-कूर्च शिश्नादिलिंगांकितशरीरविशिष्टो जीवो भवप्रथमसमयमादि कृत्वा तद्भवचरमसमयपर्यन्तं द्रव्यपुरुषो भवति। (गो. जी. जी. प्र. टी. २७१)।

१ पुंवेद के उदय से युक्त अंगोपांगनामकर्म के उदय के वश स्मश्रु, कूर्च और शिश्न आदि चिह्नों से अंकित शरीर को द्रव्यपुरुष कहते हैं।

द्रव्यपुलाक—दव्वपुलाओ पलंजि भण्णइ। (दशवै. चू. पृ. ३४६)।

पलंजी—भूसा या पुआल (धान्य के निकाल लेने पर शेष रहे सूखे तृणों का समुदाय)—को द्रव्यपुलाक कहते हैं।

द्रव्यपूजा—१. गन्ध-पुष्प-धूपाक्षतादिदानम् अर्हदाद्युद्दिश्य द्रव्यपूजा। (भ. आ. विजयो. ४७)। २. वचोविग्रहसंकोचो द्रव्यपूजा निगद्यते। तत्र मानससंकोचो भावपूजा पुरातनैः ॥ गन्ध-प्रसून सान्नाह्य दीपधूपाक्षतादिभिः। क्रियमाणाऽथवा ज्ञेया द्रव्यपूजा विधानतः ॥ (अमित. श्रा. १२, १२-१३)। ३. दव्वेण य दव्वस्स य जा पूजा जाण दव्वपूजा सा। (वसु. श्रा. ४४८)। ४. द्रव्यपूजाऽर्हदादीनुद्दिश्य गन्धाक्षतादिदानम्। (अन. ध. २–११०; भ. आ. मूला. टी. ७)। ५. सचित्ताचित्त-मिश्रेण द्रव्यपूजा त्रिधा भवेत्। प्रत्यक्षमर्हदादीनां सचित्ताऽर्चा जलादिभिः ॥ तेषां तु यच्छरीराणां पूजनं सा परार्चना। यत् पुनः क्रियते पूजा द्वयोः सा मिश्रसंज्ञिका ॥ (धर्मसं. श्रा. ९, ९२–९३)।

१ अर्हत्-सिद्धादि को लक्ष्य बनाकर गन्ध, पुष्प, धूप और अक्षत आदि के देने का नाम द्रव्यपूजा है। २ वचन और शरीर के संकोच को—उनके उस ओर लगाने को द्रव्यपूजा कहते हैं। ××× अथवा गन्ध, पुष्प, नैवेद्य, दीप और धूप आदि के द्वारा जो पूजा की जाती है वह द्रव्यपूजा कहलाती है।

द्रव्यपूति—गंधाइगुणसमिद्धं जं दव्वं असुइगंधदव्वजुयं। पूइत्ति परिहरज्जइ तं जाणसु दव्वपूइत्ति ॥ (पिण्डनि. २४४)।

सुगन्ध आदि गुणों से समृद्ध होकर भी जो द्रव्य पीछे अपवित्र गन्धद्रव्य से संयुक्त होकर पूति—दुर्गन्धयुक्त—हुआ है उसे द्रव्यपूति कहते हैं। यह भोजन सम्बन्धी १६ उद्गम दोषों में तीसरा है, जिसे छोड़ना चाहिए। प्रकृत पिण्डनिर्युक्ति में आगे (२४५–४६) इसके लिए एक उदाहरण भी दिया गया है।

द्रव्यप्रतिक्रमण—१. वास्तु-क्षेत्रादीनां दशप्रकाराणां उद्गमोत्पादनैषणादोषदुष्टानां वसतीनाम् उपकरणानां भिक्षाणां च परिहरणम्, अयोग्यानां चाहारादीनां गृद्धेर्दर्पस्य च कारणानां संक्लेशहेतूनां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वा निरसनं द्रव्यप्रतिक्रमणम्। (भ. आ. विजयो. ११६, पृ. २७५); सचित्तमचित्त-मिश्रमिति त्रिविकल्पं द्रव्यं तस्य परिहरणं द्रव्यप्रतिक्रमणम्। (भ. आ. विजयो. ४२१)। २. सावद्यद्रव्यसेवायाः परिणामस्य निवर्तनं द्रव्यप्रतिक्रमणम्। (मूला. वृ. ७-११५)।

१ वास्तु क्षेत्र आदि दस प्रकार के परिग्रह; उद्गम, उत्पादन और एषणा दोष से दूषित वसतियों; उपकरणों और भिक्षाओं का परित्याग करना; तथा लोलुपता व अभिमान के कारणभूत अथवा संक्लेश के हेतुभूत अयोग्य आहारादि का छोड़ना, इसका नाम द्रव्यप्रतिक्रमण है। २ पापयुक्त द्रव्य के सेवन-विषयक परिणाम के छोड़ने को द्रव्यप्रतिक्रमण कहा जाता है।

द्रव्यप्रतिसेवना—तत्र या तस्य तस्य वस्तुनः प्रतिषेव्यमानता सा द्रव्यरूपा प्रतिषेवणा। (व्यव. भा. मलय. वृ. १-३९, पृ. १६)।

विवक्षित वस्तु की प्रतिसेव्यमानता—प्रतिसेवन की योग्यता या कल्प्यता—को द्रव्यप्रतिसेवना कहा जाता है।

द्रव्यप्रत्याख्यान—१. दव्वम्मि निण्हगाई ××× । (आव. नि. १०५३)। २. द्रव्यमिति द्वारपरामर्शः, निण्हगाइत्ति निह्नवादिप्रत्याख्यानम्। आदिशब्दाद् द्रव्ययोर्द्रव्याणां द्रव्यभूतस्य द्रव्यहेतोर्वा यत् प्रत्याख्यानं तद् द्रव्यप्रत्याख्यानमिति। (आव. नि. हरि. वृ. १०४०)। ३. द्रव्यतो भावतश्चैव प्रत्याख्यानं द्विधा मतम्। अपेक्षादिकृतं ह्याद्यमतोऽन्यच्चरमं मतम्॥ अपेक्षाचाविधिश्चैवापरिणामस्तथैव च। प्रत्याख्यानस्य विघ्नास्तु वीर्याभावस्तथापरः॥ उदग्रवीर्यविरहात् क्लिष्टकर्मोदयेन यत्। बाधते तदपि द्रव्यप्रत्याख्यानं प्रकीर्तितम्॥ (अष्टक. ८, १-२ व ६)। ४. अयोग्याहारोपकरणद्रव्याणि न ग्रहीष्यामीति चिन्ताप्रबन्धो द्रव्यप्रत्याख्यानम्। (म. आ. विजयो. ११६, पृ. २७६)। ५. द्रव्यप्रत्याख्यानं तु द्रव्यस्य द्रव्येण द्रव्याद् द्रव्ये द्रव्यभूतस्य वा प्रत्याख्यानं द्रव्यप्रत्याख्यानम्, तत्र सचित्ताचित्तमिश्रभेदस्य द्रव्यस्य प्रत्याख्यानं द्रव्यप्रत्याख्यानम्, द्रव्यनिमित्तं वा प्रत्याख्यानम् यथा धम्मिलस्स (सूत्रकृ. नि. शी. वृ. २, ४, १७९)। ६. पापबन्धकारणद्रव्यं सावद्यं निरवद्यमपि तपोनिमित्तं त्यक्तं न भोक्तव्यं न भोजयितव्यं नानुमन्तव्यमिति द्रव्यप्रत्याख्यानम्। (मूला. वृ. ७-१३५)। ७. द्रव्ये द्रव्यविषयं प्रत्याख्यानं निह्नवः, द्रव्यस्य द्रव्ययोर्द्रव्याणां द्रव्यभूतस्य द्रव्यहेतोर्वा प्रत्याख्यानम्। (आव. नि. मलय. वृ. १०५३, पृ. ५७९)।

१ द्रव्यविषयक प्रत्याख्यान व निह्नव—सत्यके अपलाप—आदि के प्रत्याख्यान का नाम द्रव्यप्रत्याख्यान है। ४ मैं अयोग्य आहार व उपकरण द्रव्य को ग्रहण नहीं करूँगा, इस प्रकार के विचार की निरन्तरता को द्रव्यप्रत्याख्यान कहते हैं। ५ द्रव्यका, द्रव्यके द्वारा, द्रव्यसे, द्रव्यके विषय में अथवा द्रव्यस्वरूप वस्तुके प्रत्याख्यानको द्रव्यप्रत्याख्यान कहते हैं। सचित्त, अचित्त व सचित्त-अचित्त द्रव्यके प्रत्याख्यान का अथवा द्रव्य के निमित्त किये जाने वाले प्रत्याख्यानको द्रव्यप्रत्याख्यान कहा जाता है। जैसे—धम्मिल्ल (बद्धकेश) का प्रत्याख्यान।

द्रव्यप्रमाण—प्रमिनो[णो]ति प्रमीयते वा परिच्छिद्यते येनार्थस्तत्प्रमाणम्, तत्र द्रव्यमेव प्रमाणं दण्डादिद्रव्येण वा धनुरादिना शरीरादेर्द्रव्यैर्वा दण्ड-हस्ताङ्गुलादिभिः द्रव्यस्य वा जीवादेः द्रव्याणां वा जीवधर्माधर्मादीनां द्रव्ये वा परमाण्वादौ पर्यायाणां द्रव्येषु वा तेष्वेव तेषामेव प्रमाणं द्रव्यप्रमाणम्। (स्थाना. अभय. वृ. ४, १, २५८)।

'जो मापता है' इस विग्रह के अनुसार द्रव्य ही प्रमाण होता है अथवा जिसके द्वारा पदार्थ जाना जाता है उसका नाम प्रमाण है। तदनुसार धनुष आदि द्रव्य के द्वारा शरीरादि की ऊँचाई का प्रमाण जाना जाता है; दण्ड, हाथ व अंगुल आदि द्रव्यों के द्वारा एक जीवादि द्रव्यका अथवा जीव, धर्म व अधर्म आदि अनेक द्रव्यों का प्रमाण जाना जाता है; इसी प्रकार परमाणु आदि द्रव्यगत पर्यायों का प्रमाण जाना जाता है। इस क्रमसे द्रव्यप्रमाण अनेक प्रकार का सम्भव है।

द्रव्यप्रमाणानुगम—यथावस्त्ववबोधः अनुगमः, केवलि-श्रुतकेवलिभिरनुगतानुरूपेणावगमो वा। द्रव्यप्रमाणस्य द्रव्यप्रमाणयोर्वा अनुगमः द्रव्यप्रमाणानुगमः। (धव. पु. ३, पृ. ८)।

वस्तु के यथार्थ अवबोध का नाम अनुगम है। अथवा केवली और श्रुतकेवली के परम्परागत उपदेश के अनुसार जो वस्तु का बोध होता है वह अनुगम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कहलाता है। द्रव्य के प्रमाण का बोध कराने वाले अथवा द्रव्य और प्रमाण दोनों का ही बोध कराने वाले अधिकार को द्रव्यप्रमाणानुगम कहा जाता है। जैसे—षट्खण्डागमके प्रथम खण्डभूत जीवस्थानगत तृतीय अनुयोगद्वार इत्यादि।

द्रव्यप्राण—१. पुद्गलसामान्यान्वयिनो द्रव्यप्राणाः। (पंचा. का. अमृत. वृ. ३०)। २. द्रव्यप्राणाः इन्द्रिय-पंचक-बलत्रिकोच्छ्वासनिःश्वासायुःकर्मानुभवलक्षणाः। (प्रज्ञाप. मलय. वृ. १८–२३२)। ३. चित्सामान्यानुविधायिपुद्गलपरिणामो द्रव्यप्राणाः। (अन. ध. ४–२२)। ४. पौद्गलिकद्रव्येन्द्रियादिव्यापाररूपाः द्रव्यप्राणाः। (गो. जी. जी. प्र. टी. १२९)।

१ पुद्गल सामान्य से अनुगत इन्द्रिय आदि को द्रव्यप्राण कहा जाता है। २ इन्द्रियां पांच, बल तीन, उच्छ्वास-निःश्वास और आयुकर्म; इनके अनुभवन स्वरूप द्रव्यप्राण कहलाते हैं।

द्रव्यबन्ध—१. भावेण जेण जीवो पेच्छदि जाणादि आगदं विसए। रज्जदि तेणेव पुणो बज्झदि कम्मत्ति उवएसो॥ (प्रव. सा. २–८४)। २. द्रव्यबन्धः कर्म-नोकर्मपरिणतः पुद्गलद्रव्यविषयः। (त. वा. २, १०, २)। ३. पुद्गलानां नुरादानं बन्धो द्रव्यात्मकः स्मृतः। योग्यानां कर्मणः स्वेष्टानिष्टनिर्वर्तनात्मनः॥ (त. श्लो. ८, २, १)। ४. द्रव्यबन्धो निगडादिः। (त. भा. सिद्ध. वृ. १–५)। ५. पुनस्तेनैव (भावबन्धेनैव) पौद्गलिकं कर्म बध्यत एव, इत्येष भावबन्धप्रत्ययो द्रव्यबन्धः। (प्रव. सा. अमृत. वृ. २–८४)। ६. कम्मादपदेसाणं अण्णोण्णपवेसणं इदरो॥ (द्रव्यसं. ३२)। ७. भावबन्धनिमित्तेन कर्मप्रदेशानामात्मप्रदेशानां च क्षीर-नीरवदन्योन्यप्रवेशनं संश्लेषो द्रव्यबन्धः। (बृ. द्रव्यसं. टी. ३२)। ८. भावबन्धनिमित्तेन तैलम्रक्षितशरीरे धूलिबन्धवज्जीव-कर्मप्रदेशानामन्योन्यसंश्लेषो द्रव्यबन्धः।(पंचा. का. जय. वृ. १०८)। ९. भावास्रवातितापात्मलोहस्वात्मैकदेहगम्। आदत्ते सर्वतोऽनन्तानन्तकर्माणुजीवनम्॥ आत्मनस्तेन संश्लेषो द्रव्यबन्धश्चतुर्विधः। स स्यात् प्रकृति-प्रदेशानुभाग-स्थितिभेदतः॥ (आचा. सा. ३, ३८–३९)। १०. जीव-कर्मप्रदेशानामाश्लेषो द्रव्यबन्धनम्। (भावसं. वाम. ३८७)। ११. यस्तु कर्म-नोकर्मरूपः जीव-पुद्गलसंयोगबन्धः असौ द्रव्यबन्धः। (कार्तिके. टी. २०६)। १२. द्रव्यं पौद्गलिकः पिण्डो बन्धस्तच्छक्तिरेव वा। (पञ्चाध्या. २–४७)।

१ जिस मोह, राग और द्वेषरूप भाव से जीव विषयता को प्राप्त—दृष्टव्य या ज्ञेय—वस्तु को देखता व जानता है, तथा उसी से जो अनुरक्त होता है; इसका नाम भावबन्ध और उसके निमित्त से जो पौद्गलिक कर्म बंधता है उसका नाम द्रव्यबन्ध है। ४ सांकल आदि बन्धन के कारणों को द्रव्यबन्ध कहा जाता है।

द्रव्य-भावतः हिंसा—द्रव्यतो भावतश्चेति "जहा केइ पुरिसे मिग्गवहपरिणामपरिणए मियं पसित्ता आयन्नाइड्ढियकोदंड-जीवे सरं णिसिरिज्जा, से मिए तेण सरेण विद्धे मए सिआ एसा दव्वओ हिंसा भावओ वि।" (दशवै. नि. हरि. वृ. ४५)।

कोई वधक मृग के घात का विचार करता हुआ उसे देख कर कर्ण पर्यन्त धनुष की डोरी को खींचता है और बाण को छोड़ देता है। उससे विद्ध होकर मृग मर जाता है। इस प्रकार की हिंसा मृग के प्राणों का घात करने के साथ वधक के तदनुरूप परिणाम के भी रहने से द्रव्य और भाव दोनों से हुआ करती है।

द्रव्यमन—१. पुद्गलविपाकिकर्मोदयापेक्षं द्रव्यमनः। (स. सि. २–११; त. वा. २, ११, १; धव. पु. १, पृ. २५९; त. वृ. २–११)। २. तत्थ मणपज्जत्तिणामकम्मुदयातो जोग्गे मणोदव्वे घेत्तूं मणजोगपरिणामिति दव्वा दव्वमणो भण्णइ। (नन्दी. चू. पृ. २६)। ३. द्रव्यमनश्च रूपादियोगात पुद्गलद्रव्यविकारः। (त. वा. ५, ३, ३); द्रव्यमनश्च ज्ञानावरण-वीर्यान्तरायक्षयोपशमलाभप्रत्ययाः गुण-दोष-विचार-स्मरणादिप्रणिधानाभिमुखस्याऽऽत्मनोऽनुग्राहकाः पुद्गला वीर्यविशेषावर्जनसमर्थाः मनस्त्वेन परिणताः इति कृत्वा पौद्गलिकं नाकाशमयम्। (त. वा. ५, १९, २०)। ४. तत्र मनोऽभिनिर्वृत्यै यद् दलिकद्रव्यमुपात्तमात्मना सा मनःपर्याप्तिर्नाम करणविशेषः, तेन करणविशेषेण सर्वात्मप्रदेशवर्तिना यानन्तप्रदेशान् मनोवर्गणायोग्यान् स्कन्धान् चित्तार्थमादत्ते ते करणविशेषपरिगृहीता स्कन्धाः द्रव्यमनोऽभिधीयते(न्ते)। (त. भा. सि. बृ.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धन-धान्यप्रमाणातिक्रम—१. तथा धनं गणिम-धरिम-मेय-परिच्छेद्यभेदाच्चतुर्विधम् । तत्र गणिमं पूगफलादि, धरिमं गुडादि, मेयं घृतादि, परिच्छेद्यं माणिक्यादि, धान्यं व्रीह्यादि । एतत्प्रमाणस्य बन्धनतोऽतिक्रमोऽतिचारो भवति । (ध. बि. मु. वृ. ३–२७) । २. धनं गणिम-धरिम-मेय-परीक्ष्य-लक्षणम् । ××× धान्यं सप्तदशविधम् । यदाह—व्रीहिर्यवो मसूरो गोधूम-मुद्ग-माष-तिल-चणकाः । अणवः प्रियङ्गु-कोद्रव-मकुष्ठकाः शालि-राढक्यः ।। किं च कलाय-कुलत्थौ सणसप्तदशानि धान्यानि । धनं च धान्यं च धनधान्यम्, तस्य धन-धानस्य ××× संख्या व्रतकाले यावज्जीवं चतुर्मासादिकालावधि वा यत्परिमाणं गृहीतं तस्या अतिक्रम उल्लङ्घनं संख्यातिक्रमोऽतिचारः । (योग-शा. स्वो. विव. ३–९५) ।

१ गणिम—सुपारी आदि, धरिम—गुड़ आदि, मेय—घी आदि और परिच्छेद्य—माणिक्य आदि के भेद से धन चार प्रकार का है । २ व्रीहि, जौ, मसूर, गेहूं, मूंग, उड़द, तिल, चना, अणु (व्रीहिभेद), प्रियंगु, कोद्रव, मकुष्ठ, शालि, आढकी, कलाय (मटर), कुलत्थ और शण; यह सत्तरह प्रकार का धान्य है । इन दोनों के नियमित प्रमाण का अतिक्रमण करना, यह धन-धान्यप्रमाणातिक्रम नाम का परिग्रह-परिमाणव्रत का अतिचार है ।

धन-धान्यसंख्यातिक्रम—देखो धन-धान्यप्रमाणातिक्रम ।

धनुष—१. छण्णवइ अंगुलाणि से एगे दंडेइ वा धणूइ वा जुएइ वा नालियाइ वा अक्खेइ वा मुसलेइ वा । (भगवती ६, ७, १) । २. दंडं धणुं जुगं नालिया य अक्खं मुसलं च चउहत्था । (ज्योतिष्क. ७६) । ३. चउहत्थं धणु । (संग्रहणी २४७) ।

१ छयानवे अंगुल या चार हाथ प्रमाण माप को धनुष कहते हैं । इसके दण्ड, युग, नालिका, अक्ष और मुसल ये नामान्तर हैं ।

धरण—सोलस रूप्पियमासा एक्को धरणो हवेज्ज संखित्तो । (ज्योतिष्क. १८) ।

सोलह रौप्यमास (तोला) का एक धरण होता है ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धरणी—धरणीव बुद्धिर्धरणी। यथा धरणी गिरि-सरित्-सागर-वृक्ष-क्षुपाश्मादीन् धारयति तथा निर्णीतमर्थं या बुद्धिर्धारयति सा धरणी नाम। (धव. पु. १३, पृ. २४३)।

जिस प्रकार धरणी (पृथिवी) पर्वत, नदी और समुद्र आदि को धारण करती है उसी प्रकार जो बुद्धि निर्णीत अर्थ को धारण करती है उसे धरणी कहा जाता है।

धरणीकम्प—धरणीकम्पः पर्वत-प्रासादादिसमन्विताया भूमेश्चलनम्। (मूला. वृ. ५–७८)।

पर्वत और भवन आदि से संयुक्त पृथिवी के चलन (कम्पन) को धरणीकम्प कहते हैं।

धर्म—१. धम्मो दयाविशुद्धो ××× । (बोधप्रा. २५); मोहक्खोहविहीणो परिणामो अप्पणो धम्मो ॥ (भावप्रा. ८१)। २. सद्दृष्टि-ज्ञान-वृत्तानि धर्मं धर्मेश्वरा विदुः। (रत्नक. ३; तत्त्वानु. ५१)। ३. तो भणइ मुणी धम्मो जीवदया निग्गहो कसायाणं। एएसु चेव जीवो मुच्चइ घणकम्मबंधाओ। (पउमच. २६–३४)। ४. धम्मो मंगलमुक्किट्ठं अहिंसा संजमो तवो। (दशवै. सू. १–१)। ५. अहिंसालक्षणस्तदागमदेशतो धर्मः। (स. सि. ६–१३; इष्टे स्थाने धत्ते इति धर्मः। (स. सि. ९-२)। ६. यस्माज्जीवं नारक-तिर्यग्योनि-कुमानुष-देवत्वेषु प्रपतन्तं धारयतीति धर्मः। उक्तं च—दुर्गतिप्रसृतान् जीवान् यस्माद् धारयते ततः। धत्ते चैतान् शुभे स्थाने तस्माद् धर्म इति स्थितः॥ (दशवै. चू. पृ. १५)। ७. अहिंसादिलक्षणो धर्मः। (त. वा. ६, १३, ५); इष्टे स्थाने धत्त इति धर्मः। आत्मानमिष्टे नरेन्द्र-सुरेन्द्र-मुनीन्द्रादिस्थाने धत्त इति धर्मः। (त. वा. ९, २, ३)। ८. धर्मस्तु सम्यग्दर्शनादिरूपो दान-शील-तपोभावनामयः साश्रवानाश्रवो महायोगात्मकः। (ललितवि. पृ. १६); चेतःस्वास्थ्यसाध्यश्चाधिकृतो धर्मः। (ललितवि. पृ. ३९); तथा दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः। उक्तं च—दुर्गतिप्रसृतान् जन्तून् यस्माद् धारयते ततः। धत्ते चैतान् शुभे स्थाने तस्माद्धर्म इति स्मृतः॥ (ललितवि. पृ. ९०; आव. सू. मलय. वृ. पृ. ५९२)। ९. दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः। (दशवै. नि. हरि. वृ. १–२०, पृ. १३; आव. नि. हरि. वृ. २११ व ५७४; आव. सू. २, हरि. वृ. पृ. ४९४)। १०. वचनाद्यदनुष्ठानमविरुद्धाद्ययोदितम्। मैत्र्यादिभावसंयुक्तं तद्धर्म इति कीर्त्यते॥ (ध. बि. १, श्लोक ३)। ११. धारेइ दुग्गतीए पडंतमप्पाणगं जतो तेणं। धम्मोत्ति सिवगतीइ व सततं धरणा समक्खाओ॥ (धर्मसं. हरि. २०)। १२. धर्मो दयामयः प्रोक्तः जिनेन्द्रैर्जितमृत्युभिः। (वरांगच. १५, १०७); यत् प्राणिनां जन्म-जरोग्रमृत्युमहाभयत्रासगिराकृतानाम्। भैषज्यभूतो हि दशप्रकारो धर्मो जिनानामिति चिन्तनीयम्। (वरांगच. ३१–९७)। १३. धारणार्थो धृतो धर्मशब्दो वाचि परिस्थितः॥ पतन्तं दुर्गतौ यस्मात् सम्यगाचरितो भवेत्। प्राणिनं धारयत्यस्माद् धर्म इत्यभिधीयते। (पद्मपु. १४, १०३–४)। १४. धम्मो णाम सम्मद्दंसण-णाण-चरित्ताणि। (धव. पु. ८, पृ. ९२)। १५. यतोऽभ्युदयनिःश्रेयसार्थसंसिद्धिरंजसा। सद्धर्मः ×××॥ (म. पु. १–१२० व ५–२०); स धर्मो विनिपातेभ्यो यस्मात् संधारयेन्नरम्। धत्ते चाभ्युदयस्थाने निरपायसुखोदये॥ (म. पु. २–३७); दयामूलो भवेद् धर्मो ×××। (म. पु. ५-२१); ध्रियते धारयत्युच्चैर्विनेयान् कुगतेस्ततः॥ धर्म इत्युच्यते सद्भिः ××× । (म. पु. ४७, ३०२–३)। १६. ध्रियते वा धारयतीति वा धर्मः। (उत्तरा. चू. ३, पृ. ९८)। १७. अहिंसालक्षणो धर्मः। (त. श्लो. ६–१३); इष्टे स्थाने धत्ते इति धर्मः। (त. श्लो. ९–२)। १८. स धर्मो यत्र नाधर्मः ×××। (आत्मानु. ४६; उपासका. २९१)। १९. दुर्गतिप्रस्थितजीवधारणात् शुभे स्थाने वा दधाति इति धर्मः। (भ. आ. विजयो. ४६); अभ्युदय-निःश्रेयससुखानि च प्रयच्छति सुचरितो धर्मः। (भ. आ. विजयो. १४६)। २०. क्षान्त्यादिलक्षणो धर्मः स्वाख्यातो जिनपुङ्गवैः। अयमालम्बनस्तम्भो भवाम्भोधौ निमज्जताम्॥ (त. सा. ६–४२)। २१. धर्मः श्रुत-चारित्रात्मको जीवस्यात्मपरिणामः कर्मक्षयकारणम्। (सूत्रकृ. सू. शी. वृ. २, ५, १४)। २२. धम्मो दयापहाणो ××× ॥ (कार्तिके. ९७); धम्मो वत्थुसहावो खमादिभावो य दसविहो धम्मो। रयणत्तयं च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धम्मो जीवाणं रक्खणं धम्मो ॥ (कार्तिके. ४७८)। २३. यतोऽभ्युदय-निःश्रेयससिद्धिः स धर्मः। (नीतिवा. १–१, पृ. ८)। २४. यस्मादभ्युदयः पुंसां निःश्रेयसफलाश्रयः। वदन्ति विदिताम्नायास्तं धर्मं धर्मसूरयः॥ (उपासका. २)। २५. आत्मानमिष्टनरेन्द्र-सुरेन्द्र मुनीन्द्र-मुक्तिस्थाने धत्त इति धर्मः। (चा. सा. पृ. २); चतुर्दशगुणस्थानानां गत्यादिचतुर्दशमार्गणास्थानेषु स्वतत्त्वविचारलक्षणो धर्मः। (चा. सा. पृ. ८९)। २६. धारयतीति धर्मः दुर्गतौ पतन्तं सत्त्वमिति। (ओघनि. भा. द्रो. वृ. ५)। २७. संसारे पतन्तं जीवमुद्धृत्य नागेद्र नरेन्द्र देवेन्द्रादिवन्द्ये अव्याबाधानन्तसुखाद्यनन्तगुणलक्षणे मोक्षपदे धरतीति धर्मः अहिंसालक्षणः सागारानगारलक्षणो वा उत्तमक्षमादिलक्षणो वा निश्चय-व्यवहाररत्नत्रयात्मको वा शुद्धात्मसंवित्त्यात्मकमोहक्षोभरहितात्मपरिणामो वा धर्मः। (बृ. द्रव्यसं. टी. ३५)। २८. धारयति दुर्गतौ प्रपततो जीवान् धारयति सुगतौ वा तान् स्थापयतीति धर्मः। उक्तं च—दुर्गतिप्रसृतान् जन्तून् यस्माद्धारयते ततः। धत्ते चैतान् शुभे स्थाने तस्माद्धर्म इति स्मृतः॥ (स्थाना. अभय. वृ. १–४०, पृ. २१)। २९. धर्मं श्रुतचारित्रात्मकं दुर्गतिप्रपतज्जन्तुधारणस्वभावं ×××। (समवा. अभय. वृ. १, पृ. ४)। ३०. धर्मो नाम कृपामूलः ×××। (क्षत्रचू. ५–३५)। ३१. धर्मः सद्वेद्य-शुभायुर्नाम-गोत्रलक्षणं पुण्यम्, उत्तमक्षमादिस्वरूपो वा, तत्साध्यः कर्तृशुभफलदः पुद्गलपरिणामो वा, जीवादिवस्तुनो यथावस्थितस्वभावो वा। (न्यायकु. १, पृ. ३)। ३२. मिथ्यात्व-रागादिसंसरणरूपेण भावसंसारे पतन्तं प्राणिनमुद्धृत्य निर्विकारशुद्धचैतन्ये धरतीति धर्मः। (प्र. सा. जय. वृ. १–८)। ३३. सो धम्मो जत्थ दया××× (नि. सा. वृ. ६ उद्.)। ३४. दुर्गतिप्रपतत्प्राणिधारणाद् धर्म उच्यते। (आचा. दि. पृ. ४८)। ३५. धारयति दुर्गतौ निपततो जीवानिति धर्मः। तथा च वाचकः—प्राग् लोकबिन्दुसारे सर्वाक्षरसन्निपातपरिपठितः। धृञ् धरणार्थो धातुस्तदर्थयोगाद् भवति धर्मः॥ दुर्गतिभयप्रपाते पतन्तमभयकरदुर्लभत्राणे। सम्यक् चरितो यस्माद् धारयति ततः स्मृतो धर्मः॥ (उत्तरा. सू. शा. वृ. ३–८, पृ. १८४)। ३६. 'धर्म' इति दुर्गतिपतज्जन्तुजातधारणात् स्वर्गादिसुगतौ धानाच्च धर्मः। (ध. बि. मु. वृ. १, श्लोक ३)। ३७. दुर्गतिप्रपतत्प्राणिधारणाद् धर्म उच्यते। (योगशा. २–११; त्रि. श. पु. च. १, १, १५२); धर्मोऽभ्युदय-निःश्रेयसकारणम्। (योगशा. स्वो. विव. २–४०); दुर्गतौ प्रपतन्तं सत्त्वसंघातं धारयतीति धर्मः। (योगशा. स्वो. विव. ३–१२४)। ३८. सम्यग्दर्शनाद्यात्मपरिणामलक्षणो धर्मः। (धर्मसं. मलय. वृ. २५)। ३९. ध्रियन्ते तिष्ठन्ति नरकादिभ्यो गतिभ्यो निवृत्ता जीवास्तेन सुगताविति धरत्यात्मानं सुगताविति वा धर्मस्तम्, रत्नत्रयलक्षणं मोहक्षोभविवर्जितात्मपरिणामरूपं वा, वस्तुयाथात्म्यस्वभावं वा, उत्तमक्षयादिदशलाक्षणिकं वा ×××। (अन. ध. स्वो. टी. १–५); धर्मः पुंसो विशुद्धिः सुदृगवगम-चारित्ररूपा स च स्वां, सामग्रीं प्राप्य मिथ्यारुचिमतिचरणाकारसंक्लेशरूपम्। मूलं बन्धस्य दुःखप्रभवभवफलस्याबधुन्वन्नधर्मं संजातो जन्मदुःखाद् धरति शिवसुखे जीवमित्युच्यतेऽर्थात्॥ (अन. ध. १–९०)। ४०. धर्मः स्वदारसन्तोषाद्यात्मकसंयमलक्षणो देवादिपरिचरणस्वरूपः सत्पात्रदानादिस्वभावश्च। (सा. ध. स्वो. टी. २–५)। ४१. धर्मो वस्तुस्वभावः शम-धृतिरथवा स्वोत्थशुद्धोपयोगः, सद्वृत्तं वा श्रुतं वा दशविधविलसल्लक्षणो वापि धर्मः। (आत्मप्र. ८६)। ४२. अहिंसालक्षणो धर्मो यज्ञादिलक्षणोऽथवा। (भावसं. वाम. ३०६)। ४३. अहिंसा सत्यमस्तेयं ब्रह्मचर्यं निःसंगत्वमित्यादिलक्षणोपलक्षितः सर्वज्ञ-वीतरागप्रणीतः धर्मः, दुर्गतिदुःखादुद्धृत्य इन्द्रादिपूजितपदे धरतीति धर्मः। (त. वृत्ति श्रुत. ६–१३); संसार-सागरादुद्धृत्य इन्द्र-नरेन्द्र-धरणेन्द्र-चन्द्रादिवन्दिते पदे आत्मानं धरतीति धर्मः। (त. वृत्ति श्रुत. ९–२)। ४४. ××× धर्मो हिंसादिवर्जितः। (पू. उपासका. ३)। ४५. दयादिलक्षणो धर्मः सर्वज्ञोक्तः स्वशक्तितः। पतन्तं दुर्गतौ धत्ते चेतनं सुखदे पदे॥ (धर्मसं. श्रा. १०–९९)। ४६. सर्वप्राणिदयालक्ष्मो गृहस्थ-शमिनोर्द्विधा। रत्नत्रयमयो धर्मः स त्रिधा जिनदेशितः॥ (जम्बू. च. ३–१५१); यस्मादुच्चैःपदे धत्ते जीवं नीचैःपदादपि॥ धर्मो वस्तुस्वभावः स्यात्कर्मनिर्मूलनक्षमः। तच्चैव शुद्धचारित्रं साम्यभावचिदात्मनः॥ (जम्बू. च. १३, १५३–५४)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

४७. अहिंसा परमो धर्मः ××× । (लाटीसं. २–१); धर्मो नीचैःपदादुच्चैःपदे धरति धार्मिकम् । तन्नाजवञ्जवो नीचैःपदमुच्चैस्तदत्ययः ।। सम्यग्दर्शनज्ञानचारित्रं धर्मो रत्नत्रयात्मकः । (लाटीसं. ४, २३७–३८) । ४८. संसारदुःखादुद्धृत्य मोक्षसुखे धरतीति धर्मः । (कार्तिके. टी. ४०५) ।

१ मोह और क्षोभ से रहित आत्मा के शुद्ध परिणाम को धर्म कहते हैं । २ सम्यग्दर्शन, ज्ञान और चारित्र को धर्म माना गया है । ३ जीवों की दया और कषायों के निग्रह को धर्म कहा जाता है, कारण यह कि इन्हीं के आश्रय से जीव क्लिष्ट कर्मबन्धन से छुटकारा पाता है ।

धर्मकथा—१. धम्मकहा नाम जो अहिंसादिलक्खणं सव्वण्णुपणीयं धम्मं अणुयोगं वा कहेइ एसा धम्मकहा । (दशवै. चू., पृ. २९) । २. अहिंसालक्षणधर्मान्वाख्यानं धर्मकथा । (अनुयो. हरि. वृ. पृ. १०) । ३. एक्कंगस्स एगाहियारोवसंहारो धम्मकहा । तत्थ जो उवजोगो सो वि धम्मकहा त्ति घेत्तव्वो । (धव. पु. ९, पृ. २६३); वत्थु-अणियोगादिविसओ भावो धम्मकहा णाम । (धव. पु. १४, पृ. ९) । ४. यतोऽभ्युदय-निःश्रेयसार्थसंसिद्धिरंजसा । सद्धर्मस्तन्निबद्धा या सा सद्धर्मकथा स्मृता ।। (म. पु. १–१२०) । ५. सयलंगेक्कंगेक्कंगहियारसवित्थरं ससंखेवं । वण्णणसत्थं थय-थुइ-धम्मकहा होइ णियमेण । (गो. क. ८८) ।

१ सर्वज्ञोक्त अहिंसादिस्वरूप धर्म का जो कथन किया जाता है उसे अथवा अनुयोग के विचार को धर्मकथा कहते हैं । ३ एक अंग के एक अधिकार का जो उपसंहार किया जाता है, इसका नाम धर्मकथा है । तद्विषयक उपयोग को भी धर्मकथा कहा जाता है ।

धर्मकथी—धर्मकथा प्रशस्यास्तीति धर्मकथी । (योगशा. स्वो. विव. २–१६) ।

प्रशंसनीय धर्मकथा से युक्त पुरुष को धर्मकथी कहा जाता है ।

धर्मचरण—धर्मचरणं क्षान्त्याद्यासेवनम् । (पंचव. स्वो. स्वो. विव. ९) ।

उत्तमक्षमादि धर्मों का आचरण करने को धर्मचरण कहते हैं ।

धर्मतीर्थंकर—धर्म एव धर्मप्रधानं वा तीर्थं धर्मतीर्थम्, तत्करणशीला धर्मतीर्थंकराः । (ललितवि. पृ. ९०) ।

धर्मरूप या धर्मप्रधान तीर्थ का प्रवर्तन करने वाले महापुरुष को धर्मतीर्थ कहते हैं ।

धर्मदेव—से केणट्ठेणं भंते एवं वुच्चइ धम्मदेवा ? धम्मदेवा गोयमा ? जे इमे अणगारा भगवतो इरियासमिया जाव गुत्तबंभयारी से तेणट्ठेणं जाव धम्मदेवा । (भगवती १२, ९, २, पृ. १७६५) ।

ईर्यासमिति से युक्त होकर ब्रह्मचर्य को सुरक्षित रखने वाले अनगारों (साधुओं) को धर्मदेव कहते हैं ।

धर्मद्रव्य—देखो धर्मास्तिकाय । १. तत्थ धम्मदव्वस्स लक्खणं वुच्चदे—ववगदपंचवण्णं ववगदपंचरसं ववगददुगंधं ववगदअट्ठफासं जीव-पोग्गलाणं गमणागमणकारणं असंखेज्जपदेसियं लोगपमाणं धम्मदव्वं । (धव. पु. ३, पृ. ३); धम्मदव्वस्स जीव-पोग्गलदव्वाणं गमणागमणहेउभावेण परिणामो सब्भावकिरिया । (धव. पु. १३, पृ. ४३); जीव-पोग्गलाणं गमणागमणकारणं धम्मदव्वं । (धव. पु. १५, पृ. ३३) । २. एकजीवपरीमाणसंख्यातीतप्रदेशको लोकाकाशमभिव्याप्य धर्माधर्मौ व्यवस्थितौ ।।४८।। स्वयं गन्तुं प्रवृत्तेषु जीवाजीवेषु सर्वतः । सहकारी भवेद्धर्मः पानीयमिव यादसाम् ।।४९।। (योगशा. स्वो. विव. १–१६, पृ. ११३) ।

१ जो पांच वर्ण, पांच रस, दो गन्ध और आठ प्रकार के स्पर्श से रहित होता हुआ जीव व पुद्गलों के गमनागमन का कारण एवं लोक प्रमाण असंख्यात प्रदेशों वाला है उसे धर्मद्रव्य कहते हैं ।

धर्मध्यान—१. धम्मस्स लक्खणं से अज्जव-लहुगत्त-मद्दवोवसमा [मद्दवुवदेसा] । उवदेसणा य सुत्ते णिसग्गजाओ रुचीओ दे ।। (भ. आ. १७०९) । २. आज्ञापाय-विपाक-संस्थानविचयाय धर्म्यम् । (त. सू. दि. ९–३६); आज्ञापाय-विपाक-संस्थानविचयाय धर्ममप्रमत्तसंयतस्य । (त. सू. श्वे. ९–३७) । ३. धर्मादनपेतं धर्म्यम् । (स. सि. ९–२८, त. वा. ९, २८, ३; त. श्लो. ९–२८) । ४. आज्ञाविचयाय अपायविचयाय विपाकविचयाय संस्थानविचयाय च स्मृतिसमन्वाहारो धर्मध्यानम् । तदप्रमत्तसंयस्य भवति । (त. भा. ९–३७) । ५. दसविहसमणधम्मसमणुगतं धम्मं । (दशवै. चू. पृ. २९) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

६. इत्याश्रवनिरोधोऽयं कषायस्तम्भलक्षणः। तद् धर्म्यम् ××× ॥ (द्वात्रिंशिका १०–२७)। ७. तत्रानपेतं यद्धर्माद् धर्म्यध्यानमितीष्यते। धर्मो हि वस्तुयाथात्म्यमुत्पादादित्रयात्मकम् ॥ (ह. पु. २१–२३); बाह्यात्मिकभावानां याथात्म्यं धर्म उच्यते। तद्धर्मादनपेतं यद्धर्म्यं तद् ध्यानमुच्यते ॥ (ह. पु. ५६–३५)। ८. सूत्रार्थसाधनमहाव्रतधारणेषु बन्ध-प्रमोक्षगमनागमहेतुचिन्ता। पञ्चेन्द्रियव्युपरमश्च दया च भूते ध्यानं तु धर्ममिति तत्प्रवदन्ति तज्ज्ञाः ॥ (दशवै. हरि. वृ., प. ३२ उद्.)। ९. जिनप्रणीतभाव-श्रद्धानादिलक्षणं धर्म्यम्। (आव. अ. ४, हरि. वृ. पृ. ५८२)। १०. दहलक्खणसंजुत्तो अहवा धम्मो त्ति वण्णिओ सुत्ते। चिंता जा तस्स हवे भणियं तं धम्मझाणुत्ति ॥ अहवा वत्थुसहावो धम्मं वत्थू पुणो व सो अप्पा। झायंताणं कहियं धम्मज्झाणं मुणिंदेहिं ॥ (भावसं. दे. ३७२, ३७३)। ११. जिनप्रणीतभावश्रद्धानादिलिङ्गं धर्म्यम्। (त. भा. सिद्ध. वृ. ९–२७)। १२. वज्जिय सयलवियप्पे अप्पसरूवे मणं णिरुंधंतो। जं चिंतदि साणंदं तं धम्मं उत्तमं झाणं ॥ (कार्तिके. ४८२)। १३. सदृष्टि-ज्ञान-वृत्तानि धर्मं धर्मेश्वराः विदुः। तस्माद्यदनपेतं हि धर्म्यं तद् ध्यानमम्यधुः ॥ आत्मनः परिणामो यो मोहक्षोभविवर्जितः। स च धर्मोऽनपेतं यत्तस्मात् तद्धर्म्यमित्यपि ॥ शून्यीभवदिदं विश्वं स्वरूपेण धृतं यतः। तस्माद् वस्तुस्वरूपं हि प्राहुर्धर्मं महर्षयः ॥ ततोऽनपेतं यज्ज्ञातं तद् धर्म्यं ध्यानमिष्यते। धर्मो हि वस्तुयाथात्म्यमित्यार्षेऽप्यभिधानतः ॥ यस्तूत्तमक्षमादिः स्याद्धर्मो दशतया परः। ततोऽनपेतं यद् ध्यानं तद्वा धर्म्यमितीरितम् ॥ (तत्त्वानु. ५१–५५)। १४. आज्ञापाय-विपाकानां विवेकाय च संस्थितेः। मनसः प्रणिधानं यद् धर्मध्यानं तदुच्यते ॥ (त. सा. ७–३९)। १५. सुत्तत्थधम्ममग्गण-वय-गुत्ती-समिदि-भावणाईणं। जं कीरइ चिंतवणं धम्मज्झाणं च इह भणियं ॥ जीवाइ जे पयत्था कायव्वा ते जहट्ठिया चेव। धम्मज्झाणं भणियं रायद्दोसे पमुत्तूणं ॥ (ज्ञा. सा. १६–१७)। १६. श्रद्धानं सदशंकितादिसदनं तत्त्वार्थसंचिन्तनं संवेगः प्रशमोदयेन्द्रियदमः प्राज्योद्यमः संयमः ॥ वैराग्यं वरगुप्तिताऽतिमृदुता निर्मायिताऽसंगता धर्मस्येति समस्तवस्तुपरमोपेक्षा च लक्ष्मोदितम् ॥ (आचा. सा. १०–४५)। १७. धर्मो वस्तुस्वभावः शम-धृतिरथवा स्वोत्थशुद्धोपयोगः सद्वृत्तं वा श्रुतं वा दशविधविलसल्लक्षणो वापि धर्मः। धर्मस्थं धर्मधाम प्रगुणगुणगणं पंचकं वा गुरूणां नेदृक्षाद् ध्येयधर्माद् व्यपगतमिति हि ध्यानमाभाति धर्म्यम् ॥ आज्ञामपायं विविधं विपाकं संस्थानमित्थं न तदन्यथेति। वै चिन्त्यते येन यतोऽथ यत्र चत्वारि तत्त्वानि तदेव धर्म्यम् ॥ (आत्मप्र. ८६–८७)। १८. धर्मो वस्तुस्वरूपम्, तस्मादनपेतम् आश्रितं धर्म्यम्। (भावप्राटी. ७८)।

१ आर्जव (सरलता), लघुता (अपरिग्रहता), मृदुता—जात्यादिविषयक अभिमान का अभाव और हितोपदेश ये धर्मध्यान के लक्षण हैं। २ आज्ञाविचय, अपायविचय, विपाकविचय और संस्थानविचय के लिए जो बार बार स्मृति को उसी ओर लगाया जाता है; यह धर्मध्यान या धर्मध्यान कहलाता है। विचय का अर्थ विवेक या विचारणा है। ५ दस प्रकार के मुनिधर्म से जो अनुगत होता है उसे धर्मध्यान कहा जाता है।

धर्मध्यान का ध्याता— सम्यनिर्णीतजीवादिध्येयवस्तुव्यवस्थितिः। आर्त-रौद्रपरित्यागाल्लब्धचित्तप्रसत्तिकः ॥ मुक्तलोकद्वयापेक्षः षोढाशेषपरीषहः। अनुष्ठितक्रियायोगो ध्यानयोगे कृतोद्यमः ॥ महासत्त्वः परित्यक्तदुर्लेश्यःशुभभावनः। इतीदृग्लक्षणो ध्याता धर्मध्यानस्य सम्मतः ॥ (तत्त्वानु. ४३-४५)। जिसने ध्येयभूत जीवादि तत्त्वों की व्यवस्था का भली भांति निर्णय कर लिया है, जिसने आर्त और रौद्र ध्यान से रहित होकर चित्त की प्रसन्नता को प्राप्त कर लिया है, जो उभय लोक की अपेक्षा से रहित है, सर्व परीषहों का सहन करने वाला है, क्रियायोग के अनुष्ठानपूर्वक ध्यानयोग में उद्यत है, तथा जो अशुभ लेश्या व अशुभ भावना से रहित है, ऐसा जीव धर्मध्यान का ध्याता होता है।

धर्मपत्नी—परिणीतात्मज्ञातिश्च धर्मपत्नी च सैव च। धर्मकार्ये च सद्रीची यागादौ शुभकर्मणि ॥ (लाटीसं. २–१८०)।

जिसके साथ विधिपूर्वक विवाह किया गया है, जो सजातीय है, और पूजादिरूप धर्मकार्यों में सदा सहयोग प्रदान करती है; उसे धर्मपत्नी कहते हैं।

धर्मरुचि—जो अत्थिकायधम्मं सुयधम्मं खलु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चरित्तधम्मं च। सद्दहइ जिणाभिहियं सो धम्मरुइ त्ति नायव्वो ॥ (प्रज्ञाप. गा. १३०; प्रव. सारो. ९६०)।

जो जिनप्ररूपित अस्तिकायधर्म, श्रुतधर्म और चारित्रधर्म का श्रद्धान करता है उसे धर्मरुचि—सराग दर्शन-आर्य (दसवां)—कहा जाता है।

धर्मवर्णजनन—१. दुःखात् त्रातुम्, सुखं दातुम्, निधीनां चाधिपत्ये स्थापयितुम्, स्वचक्रविक्रमानमितसकलभूपाल-खेचरगणबद्धमरुच्चक्रांश्चक्रलांछनान् पादयोः पातयितुम्, सुरविलासिनीचेतःसंमोहावहं तदीयविलुठत्पाठीनलोचनरागमभिवर्धयन्तीं हर्षभरपरवशाद्भिन्नसांद्ररोमांचकचुकमाचरितुम्, उद्यतां रूपशोभामन्दिरां संपादयितुम्; अतिशयिताणिमादिगुणप्रसाधनां सामानिकादिसुरसहस्रानुयानोपनीतमहत्तां सततप्रत्यग्रयुवतालिंगतां सुभगतालतारोहयष्टिम् अनेकसमुद्रबिन्दुगणनागणितायुःस्थितिं मेरु-कुरु-सुरसरित्कुलाचलादिगोचरस्वेच्छाविहारचतुरां सुरांगनापृथुलनितंबबिंबाधरकठिननिविडसमुन्नतकुचतटक्रीडालोकनस्पर्शनादिक्रियोपयोगामितप्रीतिविस्मितां शतमखतामखेदेन झटिति घटयितुम्, विरूपताजननीजरा-डाकिनीनामगोचरां शोकवृकानुल्लंघितां विपद्दावानलशिखाभिरनुपप्लुतां रोगोरगैरदष्टवपुषं यम-महिषखुराखंडितां भीतिवराहसमितिभिरनुल्लिखितां संक्लेशशतशरभैरनध्यासितां प्रियवियोगचंडपुंडरीकैरसेविताम्, अनर्घ्यसुखरत्नप्रभवभूमिं, निर्वृतिं प्रापयितुं समर्थो जिनप्रणीतो धर्म इति धर्मस्वरूपकथनं धर्मवर्णजननम्। (भ. आ. विजयो. ४७)। २. चतुर्गतिदुःखात् त्रातुं निरातंकातिशयितदीर्घकालोपलालितं सुखं दातुं सकलसाम्राज्यं स्वर्गाधिराज्यं चाधिकर्तुं सुरेन्द्रनागेन्द्रान् पादयोः पातयितुं समवसरणादिबहिरंगानंतज्ञानाद्यन्तरंगलक्ष्मीलक्षणां जीवन्मुक्तिं सम्यक्त्वाद्यष्टगुणलक्षणामात्यंतिकीं परममुक्तिं च सम्पादयितुं समर्थो जिनप्रणीत एव धर्मो नान्य इति धर्ममहिमख्यापनं धर्मवर्णजननम्। (भ. आ. मूला. ४७)।

१ दुःखों से रक्षा करने, सुख के देने, निधियों के स्वामित्व में स्थापित करने, तथा अपने चक्ररत्न के प्रभाव से समस्त राजाओं एवं विद्याधरों आदि के चरणसेवक बनाने आदि में धर्म ही सर्वथा समर्थ है। इस प्रकार वह सांसारिक उत्कृष्ट सुख के साथ निर्बाध मोक्षसुख को भी प्राप्त कराने वाला है। इत्यादि प्रकार से धर्म के कीर्तन करने को धर्मवर्णजनन कहा जाता है।

धर्मवाद—परलोकप्रधानेन मध्यस्थेन तु धीमता। स्वशास्त्रज्ञाततत्त्वेन धर्मवाद उदाहृतः। (अष्टक १२–६)।

स्वसमय के रहस्यके जानने वाले व परलोक के मानने वाले मध्यस्थ बुद्धिमान् पुरुष के द्वारा जो धर्मचर्चा की जाती है उसे धर्मवाद कहते हैं।

धर्मानुकम्पा—१. धर्मानुकम्पा नाम परित्यक्तासंयमेषु, मानावमान-सुखदुःख-लाभालाभ-तृणसुवर्णादिषु समानचित्तेषु, दान्तेन्द्रियान्तःकरणेषु मातरमिव मुक्तिमाश्रितेषु परिहृतोग्रकषाय-विषयेषु दिव्येषु भोगेषु दोषान् विचिन्त्य विरागतामुपगतेषु, संसार-महासमुद्राद्। भयेन निशास्वप्यल्पनिद्रेषु अगीकृतनिःसंगत्वेषु क्षमादिदशविधधर्मपरिणतेषु याऽनुकम्पा सा धर्मानुकम्पा। (भ. आ. विजयो. १८३४)। २. धर्मानुकम्पा नाम यया प्रयुक्तो विवेकिलोकः स्वशक्त्यनिनिगूहनेन संयमनिष्ठेभ्यस्तद्योग्यान्न-पान-वसत्युपकरणौषधादिकं संयमसाधनं प्रयच्छति। (भ. आ. मूला. १८३४)।

१ जिन्होंने सर्व प्रकार के असंयमों को छोड़ दिया है; जो मान-अपमान, सुख-दुःख, लाभ-अलाभ और तृण-सुवर्णादि में समानचित्त रहते हैं, जिन्होंने इन्द्रियों व मन को जीत लिया है, तथा जो माता के समान मुक्ति के आश्रित हैं; इत्यादि गुणों से विभूषित धर्मात्मा जनों के ऊपर जो दया की जाती है उसे धर्मानुकम्पा कहते हैं।

धर्मानुप्रेक्षा—१. संसारविसमदुग्गे भवगहणे कह वि मे भमंतेण। दिट्ठो जिणवरदिट्ठो जेट्ठो धम्मो त्ति चिंतेज्जो ॥ (मूला. ८–६४)। २. अयं जिनोपदिष्टो धर्मोऽहिंसालक्षणः सत्याधिष्ठितो विनयमूलः क्षमाबलो ब्रह्मचर्यगुप्त उपशमप्रधानो नियतिलक्षणो निष्परिग्रहतालम्बनः, तस्यालाभादनादिसंसारे जीवाः परिभ्रमन्ति दुष्कर्मविपाकजं दुःखमनुभवन्तः। अस्य पुनः प्रतिलम्भे विविधाभ्युदयप्राप्तिपूर्विका निःश्रेयसोपलब्धिर्नियतेति चिन्तनं धर्मस्वाख्यातत्वानुप्रेक्षा। (स. सि. ९–७)। ३. जीवस्थान-गुणस्थानानां गत्यादिमार्गणालक्षणो धर्मः स्वाख्यातः ××× एवमादिलक्षणो धर्मो निःश्रेयसप्राप्तिहेतुरहो भग-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वद्भिरर्हद्भिर्व्याख्यात इति चिन्तनं धर्मस्वाख्यातत्वानुप्रेक्षा । (त. वा. ९, ७, १०, पृ. ६०३ व २०७, पं. ३–४)। ४. जीवस्थान-गुणस्थानानां गत्यादिषु मार्गणालक्षणो धर्मः । (त. श्लो. ९-७)। ५. चतुर्दशगुणस्थानानां गत्यादिचतुर्दशमार्गणास्थानेषु स्वतत्त्वविचारलक्षणो धर्मः निःश्रेयसप्राप्तिहेतुरहो भगवद्भिरर्हद्भिः स्वाख्यात इति चिन्तनं धर्मस्वाख्यातत्वानुप्रेक्षा । (चा. सा. पृ. ८९)। ६. दाताऽभीष्टविशिष्टवस्तुनिचयस्याकांक्षिणेऽपिक्षणाद्वर्त्तार्त्तेर्नर-नारकादिभवसंभूतेः स्मृतेर्भीकृतेः । हन्ताऽऽक्रान्तजगत्त्रयान्तक-रिपोर्यः स्वान्तगः संस्तुतस्त्राताऽत्राणशरीरिणां न हि परो धर्मात् सुशर्मप्रदात् ॥ (आचा. सा. १०–४४)। ७. लोकालोके रविरिव करैरुल्लसन् सत्क्षमाद्यैः, खद्योतानामिव घनतमोद्योतिनां यः प्रभावम् । दोषोच्छेदप्रथितमहिमा हन्ति धर्मान्तराणाम्, स व्याख्यातः परमविशदख्यातिभिः ख्यातु धर्मः ॥ (अन. ध. ६–८०)।

२ अहिंसा जिसका लक्षण है, सत्य से जो अधिष्ठित है, विनय जिसका मूल है व क्षमा बल है, ब्रह्मचर्य से जो सुरक्षित है, उपशमप्रधान है, और अपरिग्रहता जिसका आलम्बन है; इत्यादि यह जिनोपदिष्ट धर्म है। इसके विना जीव संसार में परिभ्रमण करते हैं और उसे पा करके वे अनेक अभ्युदय के साथ मोक्ष को प्राप्त करते हैं। इस प्रकार का विचार करने को धर्मानुप्रेक्षा करते हैं।

धर्मावर्णवाद—१. जिनोपदिष्टो धर्मो निर्गुणस्तदुपसेविनो ये ते चासुरा भविष्यन्तीत्येवमभिधानं धर्मावर्णवादः। (स. सि. ६–१३)। २. निर्गुणत्वाद्यभिधानं धर्मे। जिनोपदिष्टो दशविकल्पो धर्मो निर्गुणः, तदुपसेविनो ये ते चासुरा भवन्ति, इत्येवमाद्यभिधानं धर्मावर्णवादः। (त. वा. ६, १३, ११)। ३. अन्तःकलुषदोषादसद्भूतमलोद्भावनमवर्णवादः। ××× निर्गुणत्वाद्यभिधानं धर्मे। (त. श्लो. ६–१३)। ४. दुर्गतिप्रतिबन्धं स्वर्गादिकं च फलं विधत्ते धर्म इति कथमदृष्टं श्रद्धीयते ? न हि सन्निहितकारणस्य कार्यस्यानुद्भवोऽस्ति यथांकुरस्य। सुखप्रदायी स्वनिष्पत्त्यनन्तरं सुखमात्मन किं न करोति इति धर्मावर्णवादः। (भ. आ. विजयो. ४७)।

१ जिनेन्द्र के द्वारा उपदिष्ट धर्म निर्गुण है, इसका सेवन करने वाले असुर होने वाले हैं, इत्यादि प्रकार से धर्म की निन्दा करने को धर्मावर्णवाद कहते हैं।

धर्मास्तिकाय—१. धम्मत्थिकायमरसं अवण्णगंधं असद्दमप्फासं। लोगोगाढं पुट्ठं पिहुलमसंखादियपदेसं ॥ अगुरुगलघुगेहिं सया तेहिं अणतेहिं परिणदं णिच्चं। गदिकिरियाजुत्ताणं कारणभूदं सयमकज्जं ॥ (पंचा. का. ८३–८४)। २. गमणणिमित्तं धम्मं ××× । (नि. सा. ३०)। ३. गतिपरिणामिनां जीव-पुद्गलानां गत्युपग्रहे कर्तव्ये धर्मास्तिकायः साधारणाश्रयः। (स. सि. ५–१७)। ४. गइलक्खणो उ धम्मो ××× । (उत्तरा. २८–९)। ५. धर्माधर्मौ यथासंख्यं गति-स्थित्योस्तु कारणम् । (वरांगच. २६–२३)। ६. पढमे धम्मत्थिकाए, सो गइलक्खणो। (दशवै. चू. पृ. १६)। ७. जीवपोग्गलदव्वाण गतिकिरियापरिणयाण उवग्गहकरणत्तणओ धम्मो, अस्तीति ध्रौव्यं, आयत्ति कायः उत्पाद विनाशः, अस्ति चासौ कायश्च अस्तिकायः धर्मश्चासावस्तिकायश्च धर्मास्तिकायः। (अनुयो. चू. पृ. २९)। ८. स्वयं क्रियापरिणामिनां साचिव्यधानाद् धर्मः। स्वयं क्रियापरिणामिनां जीवपुद्गलानां यस्मात् साचिव्यं दधाति तस्माद्धर्म इत्याख्यायते। (त. वा. ५, १, १९)। ९. जीवानां पुद्गलानां च गत्युपष्टम्भकारणम्। धर्मास्तिकायो ज्ञानस्य दीपश्चक्षुष्मतो यथा ॥ (श्रा. प्र. टी. ७८ उद्.)। १०. गतिपरिणामपरिणतानां जीव-पुद्गलानां गत्युपष्टम्भको धर्मास्तिकायः। (आव. नि. हरि. वृ. ८६)। ११. जीव-पुद्गलानां स्वाभाविके क्रियावत्त्वं गतिपरिणतानां तत्स्वभावधारणाद् धर्मः, अस्तयः प्रदेशास्तेषां कायः संघातः अस्तिकायः धर्मश्चासावस्तिकायश्चेति समासः। (अनुयो. हरि. वृ. पृ. ४१)। १२. तत्र यो हि गतिपरिणामपरिणतयोर्जीव-पुद्गलयोर्गत्युपष्टम्भहेतुर्जलमिव झषस्य, स खल्वसंख्येयप्रदेशात्मकोऽमूर्तो धर्मास्तिकाय इति। (नन्दी. हरि. वृ. पृ. ५८)। १३. जीव-पुद्गलयोर्यत्स्याद् गत्युपग्रहकारणम्। धर्मद्रव्यं ××× ॥ (म. पु. २४–३३)। १४. सकृत्सकलगतिपरिणामिनां सांनिध्यधानाद् धर्मः। (त. श्लो. ५–१)। १५. गतिपरिणतौ धर्म उपकारकः। (त. भा. सिद्ध. वृ. ५–७)। १६. गतिपर्यायस्य बाह्यं गतिहेतुत्वसंज्ञितं गुणं धारयतीति धर्मः। (भ. आ. विजयो.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

३६)। १७. जीवाण पुग्गलाणं गइप्पवत्ताण कारणं धम्मो। (भावसं. दे. ३०६)। १८. क्रियापरिणतानां यः स्वयमेव क्रियावताम्। आदधाति सहायत्वं स धर्मः परिगीयते॥ जीवानां पुद्गलानां च कर्तव्ये गत्युपग्रहे। जलवन्मत्स्यगमने धर्मः साधारणाश्रयः॥ (त. सा. ३, ३३–३४)। १९. धम्ममधम्मं दव्वं गमण ट्ठाणाण कारणं कमसो। जीवाण पुग्गलाणं विण्णि वि लोगप्पमाणाणि। (कार्तिके. २१२। २०. विवादापन्नाः सकलजीव-पुद्गलाश्रयाः सकृद्गतयः साधारणबाह्यनिमित्तापेक्षाः, युगपद्भावित्वात् एकसरस्सलिलादिना अनेकमत्स्यादिगतिवत् ××× यत् साधारणं गतिनिमित्त स धर्मः। (न्यायकु. २७, पृ. ३४०)। २१. गदि-ठाणोग्गहकिरियासाधणभूदं खु होदि धम्मतियं। (गो. जी. ६०४)। २२. जलवन्मत्स्ययानस्य तत्र यो गतिकारणम्। जीवादीनां पदार्थानां स धर्मः परिवर्णितः॥ (चन्द्र. च. १८, ६९)। २३. गइपरिणयाण धम्मो पुग्गल-जीवाण गमणसहयारी। तोयं जह मच्छाणं अच्छंता णेव सो णेई॥ (द्रव्यसं. १७)। २४. निष्क्रियोऽमूर्तो निष्प्रेरकोऽपि धर्मास्तिकायः स्वकीयोपादानकारणेन गच्छतां जीव-पुद्गलानां गतेः सहकारिकारणम्। (बृ. द्रव्यसं. टी १७)। २५. स लोकगगनव्यापी धर्मः स्याद् गतिलक्षणः। (ज्ञाना. ६–३२, पृ. ९७)। २६. जीव-पुद्गलयोर्गतिहेतुलक्षणो धर्मः। (पंचा. का. जय. वृ. ३)। २७. जीव-पुद्गलजालस्य व्रजतः स्वेन हेतुना। धर्मो याननिमित्तं स्याज्जलं वा जलचारिणाम्॥ (आचा. सा. ३–३०)। २८. जीव-पुद्गलानां स्वाभाविके क्रियावत्त्वे सति गतिपरिणतानां तत्स्वभावधारणाद् धर्मः, स चास्तीनां प्रदेशानां सङ्घातात्मकत्वात् कायोऽस्तिकाय इति। ××× धर्मो हि जीव-पुद्गलानां गत्युपष्टम्भकारी। (स्थाना. अभय. वृ. ७, पृ. १५); धर्मः—धर्मास्तिकायो गत्युपष्टम्भगुणः। (स्थाना. अभय. वृ. २–५८, पृ. ४०)। २९. स्वभाव-विभावगतिक्रियापरिणतानां जीव-पुद्गलानां गतिहेतुः धर्मः। (नि. सा. वृ. ९); यथोदकः पाठीनानां कारणं तथा तेषां जीव-पुद्गलानां गमनकारणं स धर्मः। (नि. सा. वृ. ३०)। ३०. धर्मः स तात्त्विकैरुक्तो यो भवेद् गतिकारणम्। जीवादीनां पदार्थानां मत्स्यानामुदकं यथा॥ (धर्मश. २१–८३)। ३१. लोयपमाणममुत्तं अचेयणं गमणलक्खणं धम्मं। (द्रव्यस्व. १३४)। ३२. जीवानां पुद्गलानां च स्वभावत एव गतिपरिणामपरिणतानां तत्स्वभावधारणात्—तत्स्वभावपोषणाद् धर्मः, अस्तयश्चेह प्रदेशास्तेषां कायः संघातः, ××× अस्तिकायः प्रदेशसंघात इत्यर्थः। धर्मश्चासावस्तिकायश्च धर्मास्तिकायः। (प्रज्ञाप. मलय. वृ. १–३, पृ. ८; जीवाजी. मलय. वृ. ५, पृ. ६)। ३३. जीव-पुद्गलयोः साधारण्येन गतिनिमित्तं धर्मः। (भ. आ. मूला. ३६)। ३४. गतिहेतुर्भवेद् धर्मो जीव-पुद्गलयोर्द्वयोः। (भावसं. वाम. ३६३)। ३५. गतिक्रियावतोर्जीव-पुद्गलयोः तत्क्रियासाधनभूतं धर्मद्रव्यम्। (गो. जी. जी. प्र. टी. ६०५)। ३६. जीव-पुद्गलयोऽर्थः स्याद् गत्युपग्रहकारणम्। धर्मद्रव्यं ×××। (जम्बू. च. ३, ३४)। ३७. धर्मद्रव्यगुणो हि पुद्गल-चितोश्चिद्द्रव्ययोरात्मभा[त्मना] गच्छद्भाववतोर्निमित्तगतिहेतुत्वं तयोरेव यत्। मत्स्यानां हि जलादिवद् भवति चोदास्येन सर्वत्र च, प्रत्येकं सकृदेव शश्वदनयोर्गत्यात्मशक्तावपि॥ (अध्यात्मक. ३–३०, पृ. ७३)।

१ जो रूप, रस, गन्ध, स्पर्श और शब्द से रहित है; सर्व लोकाकाश में व्याप्त है; स्पृष्ट—अयुतसिद्ध प्रदेशों वाला—है, विस्तृत है, असंख्यातप्रदेशी है, प्रतिसमय होने वाली छह वृद्धियों व हानियों के आश्रय से अनन्त अविभागप्रतिच्छेदों से परिणत है तथा गमनक्रिया से युक्त जीव और पुद्गलों के गमन में सहकारी है; ऐसे द्रव्य को धर्मास्तिकाय कहते हैं।

धर्मास्तिकायदेश—तथा तस्यैव बुद्धिपरिकल्पितो द्व्यादिप्रदेशात्मको विभागो धर्मास्तिकायस्य देशः। (जीवाजी. मलय. वृ. ४, पृ. ६)।

धर्मद्रव्य के बुद्धि के द्वारा कल्पित दो आदि प्रदेशस्वरूप विभाग को धर्मास्तिकाय का देश कहते हैं।

धर्मास्तिकायप्रदेश—धर्मास्तिकायस्य प्रदेशाः—प्रकृष्टा देशाः प्रदेशाः, प्रदेशा निर्विभागा भागा इति। (जीवाजी. मलय. वृ ४, पृ. ६)।

धर्मास्तिकाय के निर्विभागी अंशों को धर्मास्तिकायप्रदेश कहते हैं।

धर्मास्तिकायानुभाग—जीव-पोग्गलाणं गमणागमणहेदुत्तं धम्मत्थियाणुभागो। (धव. पु. १३, पृ. ३४९)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जीव और पुद्गलों के गमन और आगमन में सहकारी होना, यह धर्मास्तिकाय का अनुभाग है।

धर्मी—१. प्रसिद्धो धर्मी। (परीक्षा. ३–२७)। २. कारणादिव्यपदेशं द्रव्यं धर्मी, स्वधर्मापेक्षया द्रव्यस्य धर्मिव्यपदेशः। (आ. मी. वसु. ७५)। ३. आनुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायस्तद्विशिष्टः प्रसिद्धो धर्मी। (प्र. न. त. ३, २०)। ४. धर्मो प्रमाणसिद्धः। बुद्धिसिद्धोऽपि। (प्रमाणमी. १, २, १६–१७)।

१ जो (साध्य धर्म से विशिष्ट पक्ष) प्रमाण से, विकल्प से अथवा दोनों से प्रसिद्ध होता है उसे अनुमान के प्रकरण में धर्मी कहा जाता है। २ कारण आदि नाम वाला द्रव्य अपने धर्म की अपेक्षा धर्मी कहलाता है।

धर्मोपदेश—१. धर्मकथाद्यनुष्ठानं धर्मोपदेशः। (स. सि. ९–२५; त. श्लो. ९–२५)। २. अर्थोपदेशो व्याख्यानमनुयोगवर्णनं धर्मोपदेश इत्यनर्थान्तरम्। (त. भा. ९–२५; योगशा. स्वो. विव. ४–९०)। ३. धर्मकथाद्यनुष्ठानं धर्मोपदेशः। दृष्टप्रयोजनपरित्यागादुन्मार्गनिवर्तनार्थं सन्देहव्यावर्तनापूर्वपदार्थप्रकाशनार्थं धर्मकथाद्यनुष्ठानं धर्मोपदेश इत्याख्यायते। (त. वा. ९, २५, ५)। ४. आक्षेपणी विक्षेपणी संवेजनी निर्वेदनीति चतस्रः कथाः, तासां कथनं कर्मोपदेशः। (भ. आ. विजयो. १०४)। ५. कथा धर्माद्यनुष्ठानं विज्ञेया धर्मदेशना। (त. सा. ७–१९)। ६. दृष्टप्रयोजनपरित्यागादुन्मार्गनिवर्तनार्थं सन्देहव्यावर्तनार्थमपूर्वपदार्थप्रकाशनार्थं धर्मकथाद्यनुष्ठानं धर्मोपदेशः। (चा. सा. पृ. ६७)। ७. द्वादशांगैकदेशोपदेशो धर्मोपदेशनम्। (आचा. सा. ४–९२)। ८. धर्मोपदेशः स्याद् धर्मकथा संस्तुतिमङ्गला। (अन. ध. ७–८७)। ९. दृष्टादृष्टप्रयोजनानपेक्षमुन्मार्गनिवर्तन-सन्देहच्छेदापूर्वार्थप्रकाशनाद्यर्थो धर्मकथानुष्ठानं धर्मोपदेशः। (भावप्रा. टी. ७८, पृ. २८५)। १०. दृष्टादृष्टप्रयोजनमनपेक्ष्य उन्मार्गविच्छेदनार्थं सन्देहच्छेदनार्थमपूर्वार्थप्रकाशनादिकृते केवलमात्मश्रेयोऽर्थं महापुराणादिधर्मकथाद्यनुकथनं धर्मोपदेशः। (त. वृत्ति श्रुत. ९–२५)। ११. दृष्टादृष्टप्रयोजनमनपेक्ष्य उन्मार्गविच्छेदनाय सन्देहच्छेदनार्थम् अपूर्वार्थप्रकाशनादिकृते केवलमात्मश्रेयोऽर्थं महापुराणादिधर्मकथाद्यनुकथनं स्तुति-देववन्दनादिकं च धर्मोपदेशः। (कार्तिके. टी. ४६६)।

१ धर्मकथा आदि के अनुष्ठान को धर्मोपदेश कहा जाता है। ३ दृष्ट प्रयोजन के परित्यागपूर्वक कुमार्ग से निवृत्त होने, सन्देह का विनाश करने और अपूर्व अर्थ के प्रकाशित करने के लिए जो धर्मकथा आदि का आचरण किया जाता है इसे धर्मोपदेश कहते हैं।

धर्म्यध्यान—देखो धर्मध्यान। १. धर्म्यमाज्ञादिपदार्थस्वरूपपर्यालोचनैकाग्रता। (समवा. अभय. वृ. ४, पृ. ९)। २. श्रुत-चरणधर्मादनपेतं धर्म्यम्। (स्थाना. अभय. वृ. ४, १, २४७)।

१ आज्ञा व अपाय आदि के स्वरूप का एकाग्रता से विचार करना, यह धर्म्यध्यान कहलाता है।

धात्रीदोष—देखो धात्रीपिण्ड। १. मज्जण-मंडण-धादी खेल्लावण खीर अंबधादी य। पंचविधधादिकम्मेणुप्पादो धादिदोसो दु॥ (मूला. ६–२८)। २. पंचविधानां धात्रीकर्मणां अन्यतमेनोत्पादिता वसतिः काचिद्दारकं स्नपयति भूषयति क्रीडयति आशयति स्वापयति वा वसत्यर्थमेवमुत्पादिता वसतिर्धात्रीदोषदुष्टा। (भ. आ. विजयो. २३०; कार्तिके. टी. ४४८–४९)। ३. पंचविधानां धात्रीणां क्रियया कर्मणा य आहारादिरुत्पद्यते स धात्री नामोत्पादनदोषः। (मूला. वृ. ६–२८)। ४. बाललालन-शिक्षादिधात्रीत्वं ××× । (आचा. सा. ८–३७; भावप्रा. टी. ९९)। ५. मार्जन-क्रीडन-स्तन्यपान-स्वापन-मण्डनम्। बाले प्रयोक्तुर्यत्प्रीतो दत्ते दोषः स धात्रिका। (अन. ध. ५–२०)। ६. दारकाणां स्नपनेनालंकरणेन क्रीडनेन भोजनेन स्वापेन वा धात्रीवत्कर्मणा संयतेनोत्पादिता वसतिः धात्रीदोषदुष्टा। (भ. आ. मूला. २३०)।

१ मज्जनधात्री, मण्डनधात्री, क्रीडनधात्री, क्षीरधात्री और अम्बधात्री; इन पांच धात्रियों के क्रमशः स्नान, अलंकरण, क्रीडन, दुग्धपान और सुलानेरूप कार्य से अथवा तद्विषयक उपदेश के द्वारा जो भोजन प्राप्त किया जाता है वह इस धात्रीदोष से दूषित होता है।

धात्रीपिण्ड—देखो धात्रीदोष। १. तत्राशनाद्यर्थं दातुरपत्योपकारे वर्तत इति धात्रीपिण्डः। (आचारा. सू. शी. वृ. २७३, पृ. ३२०)। २. बालस्य क्षीर मज्जन-मण्डन - क्रीडनाङ्कारोपणकर्मकारिण्यः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पञ्च धात्र्यः, एतासां कर्म भिक्षार्थं कुर्वतो मुनेर्धात्रीपिण्डः। (योगशा. स्वो. विव. १–३८)।

१ भोजन आदि के लिये दाता की सन्तान के उपकारार्थ पांच प्रकार के धात्रीकर्म में प्रवृत्त होने पर जो भोजन आदि प्राप्त होता है वह धात्रीपिण्ड नामक उत्पादन दोष से दूषित होता है।

धानुष्क—धानुष्को धनुषो योगात् × × × (पद्मपु. ६–२०८)।

धनुष धारण करनेवाले को उसके निमित्त से धानुष्क कहते हैं।

धान्य—धान्य व्रीह्यादि अष्टादशभेदसुसस्यम्। उक्तं च — गोधूम-शालि-यव-सर्षप-माष-मुद्गाः श्यामाक-कङ्गु-तिल-कोद्रव-राजमाषाः। कीनाशनालमथ वैणव-माढकी च सिंबा-कुलत्थ-चणकादिसुबीजधान्यम्॥ (कार्तिके. टी. ३४०)।

व्रीहि आदि अठारह प्रकार के अनाज को धान्य कहा जाता है।

धान्यमानप्रमाण—से किं तं धन्नमाणपमाणे? २ दो असईओ पसई दो पसईओ सेतिआ चत्तारि सेइआओ कुलओ चत्तारि कुलया पत्थो चत्तारि पत्थया आढगं चत्तारि आढगाइ दोणो सट्ठि आढयाइं जहन्नए कुंभे असीइ आढयाइं मज्झिमए कुंभे। आढयसयं उक्कोसए कुंभे अट्ठ य आढयसइए वाहे। एएणं धण्णमाणमाणेणं किं पओअणं? एएणं धण्णमाणपमाणेणं मुत्तोलीमुखइदुरअलिंदओचारसंसियाणं धण्णाणं धण्णमाणप्पमाणनिव्वत्तिलक्खणं भवइ, से तं धण्णमाणपमाणे। (अनुयो. सू. १३२, पृ. १५१)।

धान्य के मापने के बांटों को धान्यमानप्रमाण कहते हैं। जैसे—दो असतिकी एक प्रसृति, दो प्रसृतियों की एक सेतिका, चार सेतिकाओं का एक कुडव, चार कुडवों का एक प्रस्थ, चार प्रस्थों का आढक, चार आढकों का द्रोण, साठ आढकों का जघन्य कुम्भ, अस्सी आढकों का मध्यम कुम्भ, सौ आढकों का उत्कृष्ट कुम्भ और आठ सौ आढकों का वाह होता है। ये सब धान्य के मापविशेष हैं।

धारण—१. गृहीतस्याविस्मरणं धारणम्। (त. भा. सिद्ध. वृ. ७–६)। २. धारणमविस्मरणम्। (योगशा. स्वो. विव. १–५१)।

१ गृहीत (अनुभूत) बात को नहीं भूलना, इसका नाम धारण है।

धारणा—१. धरणी धारणा ठवणा कोट्ठा पदिट्ठा (एदे पंच धारणाए पज्जायसद्दा)। (षट्खं. ५, ५, ४०—पु. १३, पृ. २४३)। २. अवेतस्य कालान्तरेऽविस्मरणकारणं धारणा। (स. सि. १–१५)। ३. धारणा प्रतिपत्तिर्यथास्वं मत्यवस्थानमवधारणं च। धारणा प्रतिपत्तिरवधारणमवस्थानं निश्चयोऽवगमः अवबोध इत्यनर्थान्तरम्। (त. भा. १–१५)। ४. × × × धरणंमि य धारणं विंति॥ (आव. नि. ३)। ५. × × × धरणं पुण धारणं विंति। (विशेषा. भा. १७९); × × × अविच्चुई धारणा तस्स॥ (विशेषा. भा. १८०)। ६. तव्विसेसावगमस्स धरणं अविच्चुती, धारणा इत्यर्थः। (नन्दी. चू. पृ. २५)। ७. निर्ज्ञातार्थाऽविस्मृतिर्धारणा। भाषा-वयोरूपादिविशेषैर्यथात्म्येन निर्णीतस्य (अर्थस्य) पुरुषस्योत्तरकालं स एवायमित्यविस्मरणं यतो भवति सा धारणा। (त. वा. १, १५, ४)। ८. धारणा स्मृतिहेतुः × × ×। (लघीय. ६); स्मृतिहेतुर्धारणासंस्कारः। (लघीय. स्वो. वि. ६)। ९. अवगतार्थविशेषधरणं धारणा। × × × परिच्छिन्नस्य वस्तुनोऽविच्युति-स्मृति-वासनारूपं तद् धरणं पुनर्धारणां ब्रुवते। (आव. नि. हरि. वृ. ३)। १०. धारणा प्रतिपत्तिः, यथास्वं मत्यवस्थानमवधारणं च। (अने. ज. प., पृ. १८)। ११. तथा तदर्थविशेषधरणं धारणा, अविच्युति-स्मृति-वासनारूपा। (नन्दी. हरि. वृ. पृ. ६३); अपायानन्तरमवगतार्थमविच्युत्या जघन्योत्कृष्टमन्तर्मुहूर्तमात्रं कालं धारयतो धारणेति भण्यते, ततस्तमेवार्थं उपायोगाच्युतो जघन्येनान्तर्मुहूर्त्तादुत्कृष्टतोऽसंख्येयकालात् परतः स्मरतो धरणं धारणोच्यते। (नन्दी. हरि. वृ. पृ. ६६); धरणं संख्येयवर्षायुषां संख्येयमसंख्येयवर्षायुषामसंख्येयम्। (नन्दी. हरि. वृ. पृ. ६७)। १२. कालान्तरेऽप्यविस्मरणसंस्कारजनकं ज्ञानं धारणा। (धव. पु. १, पृ. ३५४); निर्णीतस्यार्थस्य कालान्तरे अविस्मृतिर्धारणा। जत्तो णाणादो कालंतरे वि अविस्सरणहेदुभूदो जीवे संसकारो उप्पज्जदि तण्णाणं धारणा णाम। (धव. पु. ६, पृ. १८); निर्णीतार्थाविस्मृतिर्यतस्सा धारणा। (धव. पु. ९, पृ. १४४); अवे-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्य कालान्तरे अविस्मरणकारणं ज्ञानं धारणा। (धव. पु. १३, पृ. २१८–१९); × × × अवेदवत्थु-लिंगग्गहणदुवारेण कालंतरे अविस्सरणहेदुसंकारजणणं विण्णाणं धारणेत्ति अब्भुवगमादो : (धव. पु. १३, पृ. २३३); धार्यते निर्णीतोऽर्थः अनया इति धारणा। (धव. पु. १३, पृ. २४३)। १३. कालंतरे संभरणणिमित्तसंसकारहेउणाणं धारणा। (जयध १, पृ. ३३२); जं कालंतरे अविस्सरणहेउसंसकारुप्पायं णाणं णिण्णयसरूवं सा धारणा। (जयध. १, पृ. ३३६)। १४. धारणा श्रुतिनिर्दिष्टबीजानामवधारणम्। (म. पु. २१–२७)। १५. × × × स्मृतिहेतुः सा धारणा। (त. श्लो. १, १५, ४)। १६. सावधारणज्ञानं कालान्ताराविस्मरणकारणं धारणाज्ञानम्। (प्रमाणप., पृ. ६८)। १७. यदा तु निश्चितं सन्तमविच्युतिरूपेण धारयति लब्धिरूपेण वा कालान्तरानुस्मरणे वा सा धारणा। (त. भा. सिद्ध. वृ. १–१५); तस्यैव स्पर्शादेरर्थस्य परिच्छिन्नस्योत्तरकालमविस्मृतिर्या सा धारणा। (त. भा. सिद्ध. वृ. १–१७)। १८. तह य अवायमदिस्स कुंजरसद्देत्ति णिच्छिदत्थस्स। कालंतरअविसरणं सा होदि य धारणा बुद्धी॥ (जं. दी. प. १३–६०)। १९. स्मृतेः अनुभूतवस्तुविषयायाः तच्छब्दपरामृष्टायाः प्रतीतेः हेतुः धारणा—भावना, संस्कार इति यावत्। (न्यायकु. ६, पृ. १७३)। २०. तस्यैव (अवायविषयस्यैव) कालान्तरस्मरणयोग्यतया ग्रहणं धारणा। (प्रमाणनि. पृ. २८)। २१. कालान्तरे वि णिण्णिदवत्थुसमरणस्स कारणं तुरियं। (गो. जी. ३०९)। २२. धारणमविस्मरणम्। (नीतिवा. ५-४९, पृ. ५९)। २३. निर्णीतस्यार्थस्य कालान्तरेष्वविस्मृतिर्धारणा यस्माज्ज्ञानात्कालान्तरेऽप्यविस्मरणहेतुभूतो जीवसंस्कार उत्पद्यते तज्ज्ञानं धारणा। (मूला. वृ. १२–१८७)। २४. कालान्तरे परिज्ञातवस्तुस्मरणकारकः। संस्कारो यस्तदुत्पत्तिकारणं धारणाह्वयम्॥ (आचा. सा. ४–१५)। २५. स एव दृढतमावस्थापन्नो धारणा। (प्र. न. त. २–१०)। २६. स इत्यवायो दृढतमावस्थापन्नो विवक्षितविषयावसाय एव सादरस्य प्रमातुरत्यन्तोपचितः कंचित् कालं तिष्ठन् धारणेत्यभिधीयते। दृढतमावस्थापन्नो ह्यवायः स्वोपढौकितात्मशक्तिविशेषरूपसंस्कारद्वारेण कालान्तरे स्मरणं कर्तुं पर्याप्नोतीति। (रत्नाकरा. २–१०, पृ. ६२)। २७. स्मृतिहेतुर्धारणा। (प्रमाणमी. १, १, ३०)। २८. धारणा अर्हद्गुणाविस्मरणरूपा। (योगशा. स्वो. विव. ३–१२४)। २९. अवायज्ञानानन्तरमन्तर्मुहूर्तं यावत्तदुपयोगादविच्यवनमविच्युतिः ततस्तदाहितो यः संस्कारः संख्येयमसंख्येयं वा कालं यावत् स वासनेत्युच्यते। पुनः कालान्तरे कुतश्चित्तादृशार्थदर्शनादिकात् कारणात् संस्कारस्य प्रबोधे सति यत् ज्ञानमुदयते तदेवेदं यत् प्रागुपलब्धमित्यादि तत् स्मृतिः। एतानि च त्रीण्यप्यविच्युत्यादीनि ज्ञानानि अविशेषेण धारणाशब्दवाच्यानि। यदाह—तदनंतरं तदत्थाविच्चवणं जो य वासणाजोगो। कालंतरेण जो पुण अणुसरणं धारणा सा उ॥ (धर्मसं. मलय. वृ. ४४); अवग्रहादिक्रमेण निश्चितार्थविषये तदुपयोगादभ्रंशोऽविच्युतिः, तज्जनितः संस्कारविशेषो वासना, तत्सामर्थ्यादुत्तरकालं पूर्वोपलब्धार्थविषयमिदं तदित्यादिज्ञानं स्मृतिः, अविच्युति-वासना-स्मृतयश्च धारणलक्षणसामान्यान्वर्थयोगाद् धारणेति व्यपदिश्यते। (धर्मसं. मलय. वृ. ८२३)। ३०. तस्यैवार्थस्य निर्णीतस्य धरणं धारणा। (आव. नि. मलय. वृ. २, पृ. २३)। ३१. धारणा स्मृतिः। (व्यव. भा. मलय. वृ. १०–२७६)। ३२. तथा निश्चितस्यैवाविच्युति-स्मृति-वासनारूपं धरणं धारणा। (प्रव. सारो. वृ. १२५३; कर्मस्त. गो. वृ. १०, पृ. १३)। ३३. ततः स एव अवायः पुनः पुनः प्रवृत्तिरूपाभ्यासजनितसंस्कारात्मकः सन् कालान्तरेऽपि निर्णीतवस्तुस्मरणकारणत्वेन तुर्यं धारणाख्यम्। (गो. जी. म. प्र. व जी. प्र. टी. ३०९)। ३४. कालान्ताराविस्मरणयोग्यतया तस्यैव ज्ञानं धारणा। (न्यायदी., पृ. ३७)। ३५. अवेतस्य सम्यक्यरिज्ञातस्य यत्कालान्तरे अविस्मरणकारणं ज्ञानं सा धारणेत्युच्यते। (त. वृत्ति श्रुत. १–१५); धारणा तु अवगृहीतार्थानामविस्मरणकारणमिति। (त. वृ. श्रुत. १–१६)।

१ धरणी, धारणा, स्थापना, कोष्ठा और प्रतिष्ठा ये धारणा के समानार्थक शब्द हैं। २ अवायसे जाने हुए पदार्थ के कालान्तर में नहीं भूलने का जो कारण है उसे धारणा कहते हैं। ३ विषय के अनुसार प्रतिप्रत्ति—गृहीत अर्थविषयक उपयोग के अविनाश, मति में अवस्थान— अन्यत्र उपयोग जाने

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पर लब्धिरूप में धारणारूप मति की विद्यमानता —और अवधारण को धारणा कहा जाता है।

धारणावरणीय—एतस्याः (धारणायाः) आवारकं कर्म धारणावरणीयम्। (धव. पु. १३, पृ. २१९)।

इस धारणा मतिज्ञान का आच्छादन करनेवाले कर्म को धारणावरणीय कहते हैं।

धारणाव्यवहार—धारणाववहारो संविग्गेण गीयत्थेणायरिएणं दव्व-खेत्त-काल-भाव-पुरिसपडिसेवणासु अवलोएऊण जम्मि जं अवराहे दिन्नं पच्छित्तं तं पासिऊण अन्नो वि तेसु चेव दव्वाइएसु तारिसावराहे तं चेव पच्छित्तं देइ, एस धारणाववहारो। अहवा वेयावच्चगरस्स गच्छोवग्गहकारिणो फड्डगपइणो वा संविग्गस्स देसदरिसणसहायस्स वा बहुसो पडितप्पियस्स अवसेससुयाणुओगस्स उचियपायच्छित्तट्ठाणदाणधारणं धारणाववहारो भन्नइ। (जीतक. चू. पृ. ४)।

द्रव्य, क्षेत्र, काल, भाव और पुरुषतिसेवना के विषय में देखकर संसार से भयभीत गीतार्थ—आगम के ज्ञाता—आचार्य के द्वारा जिस अपराध के होने पर जो प्रायश्चित्त दिया गया है उसका विचार करके अन्य आचार्य भी जो उक्त द्रव्यादि के आश्रित वैसे अपराध के होने पर वही प्रायश्चित्त देता है; इसका नाम धारणाव्यवहार है। अथवा वैयावृत्त्य करके गच्छ का उपकार करनेवाले, व गण के अवान्तर विभाग के स्वामी, संविग्न (मोक्षाभिलाषी); देशतः दर्शन की सहायता से युक्त, बहुत प्रकार से प्रतितर्पित तथा अवशेष श्रुत के उपयोग से सहित अन्य प्रायश्चित्तदाता आचार्य के प्रायश्चित्त के देने के धारण को व्यवहार कहा जाता है।

धाराचारण—अविराहिय तल्लीणे जीवे घणमुक्कवारिधाराणं। उवरिं जं जादि मुणी सा धाराचारणा रिद्धी॥ (ति. प. ४–१०४४)।

जिसके प्रभाव से साधु मेघों से छोड़ी हुई जलधारा का आश्रय करके ऊपर गमन करते हुए जलधारागत जीवों की विराधना नहीं करता है उसे धाराचारण ऋद्धि कहते हैं।

धार्मिक—धर्मे श्रुत-चारित्रात्मके भवः, स वा प्रयोजनमस्येति धार्मिकः। (स्थाना. ३, ३, १८८, पृ. १५४)।

श्रुत और चारित्र स्वरूप धर्म में होने वाला अथवा उक्त धर्म जिसका प्रयोजन है वह धार्मिक कहलाता है।

धार्मिक राजा (धम्मितो राया)—१. उभतो जोणीशुद्धो राया दसभागमेत्तसंतुट्ठो। लोए वेदे समए कयागमो धम्मितो राया॥ (व्यव. भा. ३)। २. यो राजा उभययोनिशुद्धो मातृ-पितृपक्षपरिशुद्धः, तथा प्रजाभ्यो दश (म) भागमात्रग्रहणसंतुष्टः तथा लोके लोकाचारे, वेदे समस्तदर्शनिनां सिद्धान्ते, समये नीतिशास्त्रे कृतागमः कृतपरिज्ञानो धार्मिको धर्मश्रद्धावान् स राजा। (व्यव. भा. मलय. वृ. ३, पृ. १२९)।

जिसका मातृपक्ष और पितृपक्ष शुद्ध हो, जो प्रजा से उसकी आय का दशम भाग लेने में ही सन्तुष्ट रहता हो; तथा जो लोकव्यवहार, वेद—सब दर्शनियों के सिद्धान्त और नीतिशास्त्र का ज्ञाता हो वह धार्मिक राजा कहलाता है।

धीर—१. धीरः सत्त्वसम्पन्नः। (आव. नि. हरि. वृ. ८७४, पृ. ३७२)। २. धीराः कर्मविदारणसहिष्णवो धीरा वा परीषहोपसर्गाक्षोभ्याः, धिया बुद्धया राजन्तीति वा धीरा ये केचनासन्नसिद्धिगमनाः। (सूत्रकृ. सू. शी. वृ. १, ९, ३३, पृ. १८५)।

२ जो धी अर्थात् बुद्धि से सुशोभित होते हैं वे धीर कहलाते हैं और वे परीषह व उपसर्ग से विचलित न होकर थोड़े ही समय में मुक्ति को प्राप्त करने वाले होते हैं।

धूमकेतु—१. उप्पादकाले चेव धूमलट्ठि व्व आगासे उवलब्भमाणा धूमकेदू णाम। (धव. पु. १४, पृ. ३५)। २. धूमकेतुर्गगने धूमाकाररेखाया दर्शनम्। (मूला. वृ. ५–७८)।

१ उत्पात के समय में ही आकाश में जो धूमाकार रेखा दिखाई पड़ती है उसे धूमकेतु कहते हैं।

धूमचारण—१. अध-उड्ढ-तिरियपसरं धूमं अवलंबिऊण जं देंति। जं पदखेवे अक्खलिआ सा रिद्धी धूमचारणा णाम॥ (ति. प. ४–१०४२)। २. धूमवर्ति तिरश्चीनामूर्ध्वगां वा आलम्ब्यास्खलितगमनास्कन्दिनो धूमचारणाः। (योगशा. स्वो. विव. १–९; प्रव. सारो. वृ. ६०१, पृ. १६८)।

१ जिसके प्रभाव से ऋषि जन नीचे, ऊपर और तिरछे फैलने वाले धुएँ का अवलम्बन करके

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अस्खलित पादक्षेप करते हुए गमन करते हैं उसे धूमचारण ऋद्धि कहते हैं।

धूमदोष—१. तं पुण होदि सधूमं जं आहारेदि णिंदिदो। (मूला. ६–५८)। २. शीतवातातपाद्युपद्रवसहिता वसतिरियमिति निन्दां कुर्वतो वसनं धूमदोषः। (भ. आ. विजयो. २३०; कार्तिके. टी. ४४८–४४९, पृ. ३३९)। ३. तथाऽन्त[न्य] प्रान्तादावाहारद्वेषाच्चारित्रस्याभिधूमनाद् धूम्रदोषः। (आचारा. सू. शी. वृ. २–१, २७३, पृ. ३२१)। ४. यस्मादाहरति निन्दन् जुगुप्समानो विरूपकमेतदनिष्टं मम एवं कृत्वा यदि भुंक्ते तदानीं धूमो नाम दोषः। (मूला. वृ. ६–५८)। ५. निन्दन् पुनश्चारित्रेन्धनं दहन् धूमकरणाद् धूमो दोषः। (योगशा. स्वो. विव. १–३८)। ६. धूमोऽनिष्टान्न-पानादौ यद् द्वेषेण निषेवनम्। (आचा. सा. ८–५७)। ७. ××× अश्नतो धूमो निन्दया ×××। (अन. ध. ५–३७)।

१. यह आहार मेरे लिए अनिष्टकर है, इस प्रकार निन्दा करते हुए उसे ग्रहण करने पर वह धूमदोष से दूषित होता है। ३ अन्त[अन्य] प्रान्त आदि में आहारविषयक द्वेष के वश चारित्र चूंकि धूमित (मलिन) होता है, अतएव इसे धूम या धूम्रदोष कहा जाता है।

धृति—१. निःश्रेयसधर्मभूमिकानिबन्धनभूता धृतिः। (ललितवि. पृ. ३८); धृतिः मनःप्रणिधानम्। (ललितवि. पृ. ८१)। २. धृतिः चित्तस्वास्थ्यम्। (समवा. अभय. वृ. १४१)। ३. धृतिः समाधिलक्षणा। (योगशा. स्वो. विव. ३–१२४)।

१. मोक्षप्रापक धर्म की भूमिका का जो कारण है उसे धृति (धैर्य) कहा जाता है, मन की एकाग्रता को धृति कहते हैं।

धृतिमान्—धृतिः संयमे रतिः, सा विद्यते येषां ते धृतिमन्तः। (सूत्रकृ. सू. शी. वृ. १, ९, ३३)। संयम में रति या अनुराग के करने वालों को धृतिमान् कहा जाता है।

धेनुमुद्रा— अन्योन्यग्रन्थिताङ्गुलीषु कनिष्ठिकानामिकयोर्मध्यमा-तर्जन्योश्च संयोजनेन गोस्तनाकारा धेनुमुद्रा। (निर्वाणक. १६, ३, २)।

दोनों हाथों की अंगुलियों को परस्पर में भिड़ाकर —ग्रंथित कर—कनिष्ठा-अनामिका और मध्यमा-तर्जनी के मिला देने पर जो गाय के स्तन के आकार वाली मुद्रा बन जाती है उसे धेनुमुद्रा कहते हैं।

ध्याता—१. णाहं होमि परेसिं ण मे परे संति णाणमहमेक्को। इदि जो झायदि झाणे सो अप्पाणं हवदि झादा॥ (प्रव. सा. २–९९); जो खविदमोहकलुसो विसयविरत्तो मणो णिरुंभित्ता। समवट्ठिदो सहावे सो अप्पाणं हवदि झादा॥ (प्रव. सा. २–१०४)। २. पुव्वकयब्भासो भावणाहि झाणस्स जोग्गयमुवेइ। ताओ य नाण-दंसण-चरित्त-वेरग्गजणियाओ॥ णाणे णिच्चब्भासो कुणइ मणोधारणं विसुद्धिं च। णाणगुणमुणियसारो तो झाइ सुणिच्चलमईओ॥ संकाइदोसरहिओ पसमत्थेज्जाइगुणगणोवेओ। होइ असंमूढमणो दंसणसुद्धीए झाणंमि॥ नवकम्माणायाणं पोराणविणिज्जरं सुभायाणं। चारित्तभावणाए ज्झाणमयत्तेण य समेइ॥ सुविदियजगस्सहावो णिस्संगो निब्भओ णिरासो य। वेरग्गभावियमणो ज्झाणंमि सुनिच्चलो होइ॥ (ध्यानश. ३०–३४; धव. पु. १३, पृ. ६८ उद्.)। ३. उत्तमसंघडणो ओघबलो ओघसूरो चोद्दसपुव्वहरो वा [दस-]णवपुव्वहारो वा ××× सम्माइट्ठी ××× चत्तासेसबज्झंतरगंथो ××× विवित्तपासुयगिरि-गुहा-कंदर-पब्भार-सुसाण-आरामुज्जाणादिदेसत्थो ××× जहासुहत्थो ××× अणियदकालो ××× सालंबणो ××× सुट्ठु तिरयणेसु भावियप्पा ××× विसएहिंतो दिट्ठिं णिरंभियूण ज्झेये णिरुद्धचित्तो ×××। एवं ज्झायंतस्स लक्खणं परूविदं। (धव. पु. १३, पृ. ६४–६९)। ४. ध्याताऽकषायकलुषितो गुप्तेन्द्रियश्च। (चा. सा. पृ. ७४)। ५. मुमुक्षुर्जन्मनिर्विण्णः शान्तचित्तो वशी स्थिरः। जिताक्षः संवृतो धीरो ध्याता शास्त्रे प्रशस्यते॥ (ज्ञाना. ४–६, पृ. ६९); विरज्य काम-भोगेषु विमुच्य वपुषि स्पृहाम्। यस्य चित्तं स्थिरीभूतं स हि ध्याता प्रशस्यते॥ (ज्ञाना. ५–३, पृ. ८३)। ६. अमुंचन् प्राणनाशेऽपि संयमैकधुरीणताम्। परमप्यात्मवत्पश्यन् स्वस्वरूपापरिच्युतः॥ उपतापमसंप्राप्तः शीतवातातपादिभिः। पिपासुरमरीकारि योगामृतरसायनम्॥ रागादिभिरनाक्रान्तं क्रोधादिभिरदूषितम्। आत्मारामं मनः कुर्वन् निर्लेपः सर्वकर्मसु॥ विरतः काम-भोगेभ्यः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वशरीरेऽपि निःस्पृहः । संवेगह्रदनिर्मग्नः सर्वत्र श्रमतां श्रयन् ।। नरेन्द्रे वा दरिद्रे वा तुल्यकल्याणकामनः । अमात्रकरुणापात्रं भवसौख्यपराङ्मुखः ।। सुमेरुरिव निष्कम्पः शशीवानन्ददायकः । समीर इव निःसंगः सुधीर्ध्याता प्रशस्यते ।। (योगशा. ७, २-७)। ७. स्वात्मसंवित्तिरसिको ध्याता××× । (इष्टो-प. टी. ३९) । ८. आहारासन निद्राणां विजयो यस्य जायते । पंचानामिन्द्रियाणां च परीषहसहिष्णुता ।। गिरीन्द्र इव निष्कम्पो गम्भीरस्तोयराशिवत् । अशेषशास्त्रविद् धीरो ध्याताऽसौ कथ्यते बुधैः ।। (भावसं. वाम. ६५७–५८) ।

१ मैं पर (अन्य) का नहीं हूं और पर मेरे नहीं हैं, मैं तो एक ज्ञानस्वरूप हूं; इस प्रकार से जो ध्यानमें आत्मचिन्तन करता है उसे ध्याता जानना चाहिए। जो कषायों की कलुषता से रहित व विषयों से विरक्त होता हुआ मन को रोक कर स्वभाव में स्थित होता है वह ध्याता कहलाता है।

ध्यान — १. उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तर्मुहूर्तात् । (त. सू. ९–२७) । २. चित्तविक्षेपत्यागो ध्यानम् । (स. सि. ९-२०)। ३. उत्तमसहननं वज्रर्षभनाराचं वज्रनाराचं नाराच अर्धनाराचं च, तद्युक्तस्यैकाग्रचिन्तानिरोधश्च ध्यानम् । (त. भा. ९–२७) । ४. तस्स (झाणस्स) य इमं लक्खणं । तं०—दढमज्झवसाणति । केई पुण आयरिया एवं भणंति—एगग्गस्स चिन्ताए निरोधो झाणं, एगग्गस्स किर चिन्ताए निरोधो तं झाणमिच्छंति, तं छउमत्थस्स जुज्जइ, केवलिणो न जुज्जइत्ति । (दशवै. चू. १, पृ. २९) । ५. जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं । तं होज्ज भावणा वा अणुपेहा वा अहव चिंता ।। (ध्यानश. २) । ६. ध्यानशब्दो भाव-कर्तृ-करणसाधनो विवक्षाशात् । अयं ध्यानशब्दः भाव-कर्तृ-करणसाधनो विवक्षाशाद् वेदितव्यः । तत्र ध्येयं प्रति अव्यापृतस्य भावमात्रेणाभिधाने ध्यातिर्ध्यानमिति भावसाधनो ध्यानशब्दः । ध्यायतीति ध्यानमिति बहुलापेक्षया कर्तृसाधनश्च युज्यते । करणप्रशंसापरायामभिधानप्रवृत्तौ समीक्षितायां यथा साध्वसिश्छत्तीति प्रयोक्तृ-निर्वर्त्ययोः सतोरप्युद्यमन-निपातनयोरविशेषतंत्रत्वाच्छेदनस्य कर्तृधर्माध्यारोपः क्रियते, तथा दिव्यासोरप्यात्मनः ज्ञानावरण-वीर्यान्तरायक्षयोपशमविशेषतंत्रत्वात् ध्यानपरिणामस्य युज्यते कर्तृत्वम् । करणत्वमपि चास्य पर्याय-पर्यायिणोर्भेदपरिकल्पनासद्भावात् युज्यते अग्नेर्दाह-पाक-स्वेदादिक्रियाप्रवृत्तस्यात्मभूतोष्ण्यकरणपरिकल्पनवत् । (त. वा. ९, २७, ८) । ७. यत् स्थिरमध्यवसानं तद् ध्यानम् । (ध्यानश. हरि. वृ. २) । ८. अन्तर्मुहूर्तकालं चित्तस्यैकाग्रता भवति ध्यानम् । (आव. नि. हरि. वृ. १४६३, पृ. ७७४) । ९. उत्तमसंहननस्य एकाग्रचिन्तानिरोधो ध्यानम् । एत्थ गाहा—जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं । तं होइ भावणा वा अणुपेहा वा अह व चिंता ।। (धव. पु. १३, पृ. ६४ उद्.); दंसमसय-सीह-वय-वग्घ-तरच्छच्छहल्लेहि खज्जंतो वि वासीए तच्छिज्जंतो [वि]करवत्तेहि फाडिज्जंतो वि दावानलसिहामुहेण कवलिज्जंतो वि सीद-वादादवेहि बाहिज्जंतो [वि] अच्छरसयकोडीहि लालिज्जंतओ वि जिस्से अवत्थाए ज्झेयादो ण चलदि सा जीवावत्था ज्झाणं णाम । (धव. पु. १३, पृ. ७४); अंतोमुहुत्तमेत्तं चिंतावत्थाणमेगवत्थुम्हि । छदुमत्थाणं ज्झाणं जोगणिरोहो जिणाणं तु ।। (ध्यानश. ३; धव. पु. १३, पृ. ७६ उद्.)। १०. ध्यानमेकाग्रचिन्ताया घनसंहननस्य हि । निरोधोऽन्तर्मुहूर्तं स्याच्चिन्ता स्यादस्थिरं मनः ।। (ह. पु. ५६–३) । ११. ऐकाग्र्येण निरोधो यश्चित्तस्यैकत्र वस्तुनि । तद् ध्यानं वज्रकं यस्य भवेदान्तर्मुहूर्ततः ।। स्थिरमध्यवसानं यत्तद् ध्यानं ××× ।। धीबलायत्तवृत्तित्वाद् ध्यानं तज्ज्ञैर्निरुच्यते । यथार्थमभिसन्धानाद् अपध्यानमतोऽन्यथा ।। (म. पु. २१, ८–९ व ११); प्रशस्तप्रणिधानं यत् स्थिरमेकत्र वस्तुनि । तद् ध्यानमुक्तं मुक्त्यङ्गं धर्म्यं शुक्लमिति द्विधा ।। (म. पु. २१–१३२) । १२. ततोऽयं ध्यानशब्दो भाव-कर्तृ-करणसाधनो विवक्षावशात् ध्येयं प्रति व्यावृत्तस्य भावमात्रत्वात् ध्यातिर्ध्यानमिति भवति । करणप्रशंसापरायां वृत्तौ कर्तृसाधनत्वं ध्यायतीति ध्यानम् । साधकतमत्वविवक्षायां कारणसाधनं ध्यायत्यनेन ज्ञानावरण-वीर्यान्तरायविरामविशेषोद्भूतशक्तिविशेषेणेति ध्यानमिति । (त. श्लो. ९–२७, पृ. ४९९) । १३. राग-द्वेष-मिथ्यात्वासंश्लिष्टं अर्थयाथात्म्यस्पर्शिप्रतिनिवृत्तविषयान्तरसंचारं ज्ञानं ध्यानम् । (भ. आ. विजयो. २१); ध्यानं एकाग्रचिन्तारोधः । (भ. आ. विजयो. ७०);

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वस्तुयाथात्म्यावबोधो निश्चलो यः स ध्यानम्। (भ. आ. विजयो. ७१)। १४. वाक्काय-चित्तानां आगमविधानेन निरोधो ध्यानम्। (त. भा. सिद्ध. वृ. ९-२०); अतो निश्चलं स्थिरमध्यवसानमेकालम्बनं छद्मस्थविषयं ध्यानम्। केवलिनां पुनर्वाक्काययोगनिरोध एव ध्यानम्, अभावान्मनसः। (त. भा. सिद्ध. वृ. ९-२७)। १५. एकाग्रचिन्तानिरोधो यः परिस्पन्देन वर्जितः। तद् ध्यानं निर्जराहेतुः संवरस्य च कारणम्॥ द्रव्य-पर्याययोर्मध्ये प्राधान्येन यदर्पितम्। तत्र चिन्तानिरोधो यस्तद् ध्यानं बभणुर्जिनाः॥ (तत्त्वानु. ५६ व ५८); निश्याद् व्यवहाराच्च ध्यानं द्विविधमागमे। स्वरूपालम्बनं पूर्वं परालम्बनमुत्तरम्॥ (तत्त्वानु. ९६)। १६. एकाग्रत्वेऽतिचिन्ताया निरोधो ध्यानमिष्यते। अन्तर्मुहूर्ततस्तच्च भवत्युत्तमसंहतेः॥ (त. सा. ७-३८)। १७. ततोऽनन्तशक्तिचिन्मात्रस्य परमस्यात्मनः एकाग्रसंचेतनलक्षणं ध्यानं स्यात्। (प्रव. सा. अमृत. वृ. २-१०२); तत्तु (स्वभावे समवस्थानं) स्वरूपप्रवृत्तानाकुलैकाग्रसंचेतनत्वात् ध्यानमित्युपगीयते। (प्रव. सा. अमृत. वृ. २-१०४)। १८. शुद्धस्वरूपेऽविचलितचैतन्यवृत्तिर्हि ध्यानम्। (पंचा. का. अमृत. वृ. १४६)। १९. एकाग्रचिन्तानिरोधो ध्यानम्, एकस्मिन् त्रियासाधनेऽग्रं मुखं यस्याश्चिन्ताया इत्येकाग्रचिन्ता, तस्या निरोधोऽन्यत्राऽसंचारस्तदेकाग्रचिन्तानिरोधो ध्यानम्। ××× ध्यानं चिन्ताप्रबन्धलक्षणम्। (चा. सा. पृ. ७४)। २०. चित्तस्यैकाग्रता ध्यानं ×××। (उपासका. ६१६)। २१. एकं चिन्तानिरोधात् पुनरिदमुभयं ध्यानमान्तर्मुहूर्तम्। (अध्यात्मत. १५)। २२. उत्कृष्टं कायबन्धस्य साधोरन्तर्मुहूर्ततः। ध्यानमाहुरथैकाग्रचिन्तारोधो बुधोत्तमाः॥ एकचिन्तानिरोधो यस्तद् ध्यानं ×××। (ज्ञाना. १५-१६, पृ. २५५-५६)। २३. जं किंचि वि चिंतंतो णिरीहवित्ती हवे जदा साहू। लद्धूण य एयत्तं तदाहु तं तस्स णिच्चयं झाणं॥ (द्रव्यसं. ५५)। २४. एकाग्रचिन्तानिरोधेन च पूर्वोक्तविविधध्येयवस्तुनि स्थिरत्वं निश्चलत्वं ध्यानलक्षणम्। (बृ. द्रव्यसं. टी. ५५)। २५. एकस्मिन् विषयेऽग्रमाननमभूदस्या मतेरित्यसावेकाग्रा विषयोपयोगनिरता चिन्तानिरोधो चला। वस्था स्यान्निजगोचराचलमनो ध्यानं तदन्तमुहूर्तावस्थानमतीव दुर्धरतया नाऽतः परं तिष्ठति। (आचा. सा. १०-१२)। २६. अन्तर्मुहूर्तं यावच्चित्तस्यैकाग्रता योगनिरोधश्च ध्यानम्। (समवा. अभय. वृ. ४, पृ. ९)। २७. ध्यानमेकाग्रचिन्तानिरोधः। (चारित्रभ. टी. ५; भ. आ. मूला. ७०)। २८. मुहूर्तान्तिमनस्थैर्यं ध्यानं छद्मस्थयोगिनाम्। धर्म्यं शुक्लं च तद् द्वेधा योगरोधस्त्वयोगिनाम्॥ (योगशा. ४-११५)। २९. ध्यातिर्ध्यानमेकाग्रचिन्तानिरोधः, एकवस्तुनिष्ठमात्मनो ज्ञानमित्यर्थः। ××× एकस्मिन् विवक्षितेऽग्रे मुखे व्यालम्बने चिन्ताया यथोक्तपरिस्पन्दवच्चैतन्याश्रिताया अन्तःकरणप्रवृत्तेर्निरोधोऽवरोधो नानार्थव्यावर्तनेन तत्रैवावस्थापनमेकाग्रचिन्तानिरोधो ध्यानस्याक्षूणं लक्षणमुपलक्षणीयम्। (भ. आ. मूला. टी. १६९९)। ३०. एकाग्रचिन्तनं ध्यानं चतुर्भेदविराजितम्। (भावसं. वाम. ६५९)। ३१. मनोविभ्रमपरिहरण ध्यानमुच्यते। (त. वृत्ति श्रुत. ९-२०); एकमग्रं मुखमवलम्बनं द्रव्यं पर्यायः तदुभयं स्थूलं सूक्ष्मं वा यस्य स एकाग्रः; एकाग्रस्य चिन्तानिरोधः आत्मार्थं परित्यज्यापरचिन्तानिषेध एकाग्रचिन्तानिरोधे ध्यानमुच्यते। (त. वृत्ति श्रुत. ९-२७)। ३२. कृत्स्नचिन्तानिरोधेन पुंसः शुद्धस्य चिन्तनम्। एकाग्रलक्षणं ध्यानं तदुक्तं परमं तपः॥ (लाटीसं. ७-८७)।

१. उत्तम संहनन वाले जीव के जो एक अग्र में—अनियमित भोजन-गमनादि रूप अनेक क्रियाओं में से किसी एक ही क्रिया के कर्ता रूप में—चिन्ता का जो निरोध होता है उसे ध्यान कहते हैं। वह अन्तर्मुहूर्त काल तक ही होता है। ५ स्थिर अध्यवसान—आत्मपरिणाम—का नाम ध्यान है।

ध्येय—१. जिणो वीयरायो केवलणाणेण अवगयतिकालगोयराणंतपज्जाओवचियछद्दव्वो णवकेवललद्धिप्पहुडिअणंतगुणेहि आरद्धदिव्वदेहधरो अजरो अमरो अजोणिसंभवो अदज्झो अछेज्जो अवत्तो णिरंजणो णिरामओ अणवज्जो सयलकिलेसुम्मुक्को तोसवज्जियो वि सेवयजणकप्परुक्खो, दोसवज्जिओ वि सगसमयपरम्मुहजीवाणं कयंतोवमो सिद्धसज्झो जियजेयो संसार-सायरुत्तिण्णो सुहामियसायरणिबुड्ढासेसकर-चरणो णिच्चओ णिरायुहभावेण जाणावियपडिवक्खाभावो सव्वलक्खणसंपुण्णदप्पणसंकंत-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माणुसछायागारो संतो वि सयलमाणुसपहावुत्तिण्णो अव्वओ अक्खओ ××× सगसरूवे दिण्णचित्त-जीवाणमसेसपावपणासओ जिणउवइट्ठणवपयत्था वा ज्झेयं होंति। ××× बारसअणुपेक्खाओ उव-समसेढि-खवगसेढिचढणविहाणं तेवीसवग्गणाओ पंच परियट्टाणि ट्ठिदि-अणुभाग-पयडि - पदेसादि सव्वं पि ज्झेयं होदि त्ति दट्ठव्वं। (धव. पु. १३, पृ. ६९, ७०)। २. अथवा पुरुषार्थस्य परां काष्ठामधिष्ठितः। परमेष्ठी जिनो ध्येयो निष्ठितार्थो निरञ्जनः॥ स हि कर्ममलापायाच्छुद्धिमात्यन्तिकीं श्रितः। सिद्धो निरामयो ध्येयो ध्यातृणां भावशुद्धये॥ (म. पु. २१, ११२-१३); ध्येयं स्यात् परमं तत्त्वमवाङ्-मानसगोचरम्॥ (म. पु. २१–२२८)। ३. ध्येयम-प्रशस्त-प्रशस्तपरिणामकारणम्। (चा. सा. पृ. ७४)। ४. यथावद्वस्तुनो रूपं ध्येयं स्यात् संयम[मे] सतां॥ (भावसं. वाम. ६५८)।

१ केवल ज्ञानादि रूप अनेक उत्तम गुणों से सम्पन्न वीतराग जिन व उनके द्वारा उपदिष्ट नौ पदार्थ ध्येय हैं—ध्यान करने योग्य हैं। इनके अतिरिक्त बारह अनुप्रेक्षायें, उपशम श्रेणि और क्षपक श्रेणि पर आरूढ होने की विधि, तेईस वर्गणायें, पांच परिवर्तन और प्रकृति-स्थिति आदि बन्धभेद भी ध्येय (चिन्तनीय) हैं।

ध्रुव-अचित्त-द्रव्यवर्गणा (जघन्य)—१. ध्रुवअ-चित्तदव्ववग्गणा जहण्णा णाम तहाविहपरिणामपरि-णएहिं अचित्तखंधेहिं सव्वकालं अविरहितो लोगो अण्णे उप्पज्जंति अण्णे विगच्छंति। (कर्मप्र. चू. ब. क. १९, पृ. ४२)। २. ध्रुवाचित्तद्रव्यवर्गणा नाम याः सर्वदैव लोके प्राप्यन्ते। तथा हि—एतासां मध्येऽन्या उत्पद्यन्तेऽन्या विनश्यन्ति, न पुनरेताभिः कदाचनापि विरहितो भवति, अचित्तत्वं चासां जीवेन कदाचनापि अग्रहणादवसेयम्। (कर्मप्र. मलय. वृ. ब. क. १९, पृ. ४६)।

२ जो अचित्तद्रव्यवर्गणायें लोक में सदा ही पायी जाती हैं वे ध्रुव अचित्त द्रव्यवर्गणायें कहलाती हैं। अभिप्राय यह है कि इन वर्गणाओं में अन्य उत्पन्न होती हैं और अन्य विनष्ट होती हैं, परन्तु इनसे लोक कभी रहित नहीं होता। अचित्त उन्हें इस लिए कहा जाता है कि जीव ने उन्हें कभी ग्रहण नहीं किया।

ध्रुवप्रत्यय—१. स एवायमहमेव स इति प्रत्ययो ध्रुवः। (धव. पु. ९, पृ. १५४)। २. स्यान्नित्य-त्वविशिष्टस्य स्तम्भादेर्ग्रहणं ध्रुवः। (आचा. सा. ४–२६)।

१ वही यह है, मैं ही वह हूं, इस प्रकार का जो प्रत्यय होता है वह ध्रुवप्रत्यय कहलाता है। २ नित्य-त्वविशिष्ट स्तम्भ आदि के ग्रहण करने को ध्रुव-प्रत्यय कहते हैं।

ध्रुवबन्धप्रकृति—जस्स पयडीए पच्चओ जत्थ कत्थ वि जीवे अणादिधुवभावेण लब्भइ सा धुवबंध-पयडी। (धव. पु. ८, पृ. १७)।

जिस कर्मप्रकृति का प्रत्यय जिस किसी भी जीव में अनादि व ध्रुवस्वरूप से पाया जाता है वह ध्रुव-बन्धप्रकृति कहलाती है।

ध्रुव-बाह्य-सचित्तनोआगमद्रव्यस्थान—जं तं धुवं तं सिद्धाणमोगाहणट्ठाणं। कुदो? तेसिमोगा-हणाए वड्ढि-हाणीणमभावेण थिरसरूवेण अवट्ठा-णादो। (धव. पु. १०, पृ. ४३४)।

ध्रुवबाह्यसचित्तनोआगमद्रव्यस्थान सिद्धों का अव-गाहनास्थान है, क्योंकि उनकी अवगाहना वृद्धि-हानि से रहित होकर स्थिर स्वरूप से अवस्थित है।

ध्रुवराहु—१. तत्थ णं जे से धुवराहू से णं बहु-लपक्खस्स पाडिवए पण्णरसइभागेणं भागं चंदस्स लेसं आवरेमाणे चिट्ठति तं पढमाए पढमं भागं जाव पन्नरसमं भागं चरमे समए चंदे रत्ते भवति, अवसेसे समए चंदे रत्ते य विरत्ते य भवइ, तमेव सुक्कपक्खे उवदंसेमाणे २ चिट्ठति, तं पढमाए पढमं भागं जाव[पण्णरसमं भागं, चरमे समए] चंदे विरत्ते भवइ, अवसेसे समए चंदे रत्ते विरत्ते य भवइ। (सूर्यप्र. २०–१०५, पृ. २८८)। २. तत्र यः सदैव चन्द्रविमानस्याधस्तात् सञ्चरति स ध्रुवराहुः। (सूर्यप्र. मलय. वृ. २०–१०५)।

ध्रुवराहु कृष्णपक्ष में प्रतिपदा के दिन चन्द्र के पन्द्रहवें भाग को आच्छादित करता है; इस क्रम से वह प्रतिदिन एक एक भाग को आच्छादित करता है। इस प्रकार अन्तिम समय (अमावस्या) में चन्द्र रक्त (पूर्णतया आच्छादित) रहता है, शेष दिनों में वह कुछ आच्छादित और कुछ प्रगट रहता है। यही क्रम शुक्ल पक्ष में उसके छोड़ने का समझना चाहिए। यही ध्रुवराहु कहलाता है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ध्रुवसत्ताक—ध्रुवं सत् सत्ता यासां ता ध्रुवसत्ताकाः। (पंचसं. मलय. वृ. सं. क. ५१, पृ. ५६)।

जिन प्रकृतियों की सत्ता सत्त्वव्युच्छित्ति के होने तक नियम से पाई जाती है उन्हें ध्रुवसत्ताक प्रकृतियां कहते हैं।

ध्रुवावग्रह—देखो ध्रुवप्रत्यय। सोऽयमित्यादि ध्रुवावग्रहः। (धव. पु. १, पृ. ३५७); णिच्चत्ताए गहणं धुवावग्गहो। (धव. पु. ६, पृ. २१)।

नित्यरूप से जो वस्तु का ग्रहण होता है वह ध्रुवावग्रह कहलाता है। जैसे—वह यही है, इत्यादि।

ध्रुवोदय—अव्वोच्छिण्णो उदओ जाणं पगईण ता धुवोदइया। (पंचसं. ३, १५६, पृ. ४८); जीवकर्मसम्बन्धादव्यवच्छिन्नो ऽनुसन्ततो यासामुदितकालं यावदुदयस्ता ध्रुवोदयाः, प्रतिनिवृत्तो न भवतीति भावः। (पंचसं. स्वो. वृ. ३, १५६, पृ. ४८)।

जिन प्रकृतियों का उदय उदित रहने के काल तक नष्ट नहीं होता है उन्हें ध्रुवोदयी प्रकृतियां कहते हैं।

ध्रौव्य—१. अनादिपारिणामिकस्वभावेन व्ययोदयाभावात् ध्रुवति स्थिरीभवतीति ध्रुवः, ध्रुवस्य भावः कर्म वा ध्रौव्यम्। (स. सि. ५–३०)। २. ध्रुवेः स्थैर्यकर्मणो ध्रुवतीति ध्रुवः। अनादिपारिणामिकस्वभावत्वेन व्ययोदयाभावात् ध्रुवति स्थिरीभवति इति ध्रुवः, ध्रुवस्य भावः कर्म वा ध्रौव्यम्, यथा पिण्ड-घटाद्यवस्थासु मृदाद्यन्वयात्। (त. वा. ५, ३०, ३)। ३. ध्रुवेः स्थैर्यकर्मणो ध्रुवतीति ध्रुवस्तस्य भावः कर्म वा ध्रौव्यम्। (त. श्लो. ५–३०)। ४. अनादिना स्वभावेन तद् ध्रौव्यं ब्रुवते जिनाः। (त. सा. ३–८)। ५. पूर्वोत्तरभावोच्छेदोत्पादयोरपि स्वजातेरपरित्यागो ध्रौव्यम्। (पंचा. का. अमृत. वृ. १०)। ६. कालत्रयानुयायित्वं यद्रूपं वस्तुनो भवेत्। तद् ध्रौव्यत्वमिति प्राहुर्वृषभाद्याः गणाधिपाः॥ (भावसं. वाम. ३७९)। ७. ध्रुवति स्थिरीसंपद्यते यः स ध्रुवः, तस्य भावः कर्म वा ध्रौव्यम्। (त. वृत्ति श्रुत. ५–३०)। ८. तद्भावाव्ययमिति वा ध्रौव्यं तत्रापि सम्यगयमर्थः। यः पूर्वं परिणामो भवति स पश्चात् स एव परिणामः॥ (पंचाध्या. १–२०४)। ९. वर्समानं ध्रुवं प्रोक्तं ×××। (मोक्षपं. १०)।

१ अनादि परिणामिक स्वभाव की अपेक्षा व्यय और उत्पाद सम्भव न होने से जो द्रव्य की स्थिरता है उसका नाम ध्रौव्य है।

ध्वजमुद्रा—संहतोर्ध्वाङ्गुलिवामहस्तमूले चाङ्गुष्ठं तिर्यग्विधाय तर्जनीचालनेन ध्वजमुद्रा। (निर्वाणक. १६, पृ. ३२।१)।

बायें हाथ की अंगुलियों को मिला कर और उसके मूल में अंगूठे को तिरछा रखकर तर्जनी के चलाने से ध्वजमुद्रा होती है।

नकर—नकरं अकरदायिलोकं ×××। (प्रश्नव्या. अभय. वृ. पृ. १७५)।

कर (टैक्स) नहीं देने वाले व्यक्ति को नकर कहते हैं।

नक्षत्रनाम—से किं तं णक्खत्तणामे ?, २ कित्तिआहि जाए कित्तिए कित्तिआदिण्णे कित्तिआधम्मे कित्तिआसम्मे कित्तिआदेवे कित्तिआदासे कित्तिआसेणे कित्तिआरक्खिए, रोहिणीहि जाए रोहिणिए रोहिणिदिन्ने रोहिणिधम्मे रोहिणिसम्मे रोहिणिदेवे रोहिणिदासे रोहिणिसेणे रोहिणिरक्खिए य, एवं सव्वनक्खत्तेसु नामा भाणिअव्वा। एत्थ संगहणिगाहाओ—कित्तिअ-रोहिणि मिगसिर-अद्दा य पुणव्वसू अ पुस्से अ। तत्तो अ अस्सिलेस्सा महा उ दो फग्गुणीओ अ॥ हत्थो चित्ता साती विसाहा तह य होइ अणुराहा। जेट्ठा मूला पुव्वासाढा तह उत्तरा चेव॥ अभिई सवण धणिट्ठा सतभिसदा दो अ होंति भद्दवया। रेवई अस्सिणि भरणी एसा नक्खत्तपरिवाडी॥ (अनुयो. सू. १३०, पृ. १४५)।

कृत्तिका आदि किसी नक्षत्र के आश्रय से किसी के नाम की जो स्थापना की जाती है उसे नक्षत्रनाम कहा जाता है। जैसे—कृत्तिका में उत्पन्न होने वाले मास को कार्तिक और कृत्तिका से दिये गये को कृत्तिकादत्त कहा जाता है, इसी प्रकार कृत्तिकाधर्म, कृत्तिकाशर्म, कृत्तिकादेव, कृत्तिकादास, कृत्तिकासेन और कृत्तिकारक्षित आदि कृत्तिकाश्रित अन्य नामों को तथा रोहिणी आदि शेष अन्य नक्षत्रों के आश्रित नामों को भी जानना चाहिए।

नक्षत्रमास—१. नक्खत्तो खलु मासो सत्तावीसं भवे अहोरत्ता। अंसा य एक्कवीसा सत्तट्ठिकएण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

छेएण ॥ (ज्योतिष्क. ३८)। २. नक्षत्रमासस्त्वयम्—सप्तविंशतिदिनान्येकविंशतिः सप्तषष्टिभागः (२७$\frac{२१}{६७}$)। (त. भा. सिद्ध. वृ. ४–१५)। ३. अत्र पुनरेकोनितनक्षत्रपर्याययोग एको नक्षत्रमासः सप्तविंशत्यहोरात्रा एकविंशतिश्च सप्तषष्टिभागा अहोरात्रस्य। (सूर्यप्र. मलय. वृ. १०, २०, ५५)। ४. तत्र नक्षत्रेषु भवो नाक्षत्रः। किमुक्तं भवति? चन्द्रश्चारं चरन् यावता कालेनाभिजित आरभ्योत्तराषाढानक्षत्रपर्यन्तं गच्छति तत्प्रमाणो नाक्षत्रो मासः। यदि वा चन्द्रस्य नक्षत्रमण्डले परिवर्तनतानिष्पन्न इत्युपचारतो मासोऽपि नक्षत्रम्। (जम्बूद्वी. शा. वृ. ७–१५१, पृ. ४८६; व्यव. मलय. वृ. २–१५, पृ. ६)।

१ सत्ताईस दिन-रात और एक दिन के सड़सठ भागों में से इक्कीस भाग प्रमाण (२७$\frac{२१}{६७}$) एक नक्षत्रमास होता है। ४ चन्द्रमा के अभिजित् नक्षत्र से लेकर उत्तराषाढा नक्षत्र तक संचार या परिभ्रमण करने में जितना काल लगता है उसे नक्षत्रमास कहते हैं। अथवा चन्द्र की नक्षत्रमण्डल में परिवर्तनता से उत्पन्न मास को भी उपचार से नक्षत्र कहा जाता है।

नक्षत्रसंवत्सर—१. ता णक्खत्तसंवच्छरे णं दुवालसविहे पण्णत्ते। तं सावणे भद्दवए जाव आसाढे जं वा वहस्सतीमहग्गहे दुवालसहिं संवच्छरेहिं सव्वं णक्खत्तमंडलं समाणेति। (सूर्यप्र. १०, २०, ५५); समगं णक्खत्ता जोयं जोएंति समगं उऊ परिणमंति। नच्चुण्हं नाइसीए बहुउदए होइ नक्खत्ते॥ (सूर्यप्र. १०, २०, ५८, गा. १, पृ. १७१)। २. नक्खत्तचंदजोगो बारसगुणिओ उ नक्खत्तो। (ज्योतिष्क. ३५)। ३. एवंविधद्वादशमासनिष्पन्नो नक्षत्रसंवत्सरः। स चायं त्रीणि शतान्यह्नां सप्तविंशत्युत्तराण्येकपञ्चाशच्च सप्तषष्टिभागाः (३२७$\frac{५१}{६७}$)। (त. भा. सिद्ध. वृ. ४–१५)। ४. स च द्वादशगुणो नक्षत्रसंवत्सरः। (जम्बूद्वी. शा. वृ. २५१, पृ. ४८६)। ५. यावता कालेनाष्टाविंशत्यापि नक्षत्रैः सह क्रमेण योगपरिसमाप्तिस्तावान् कालविशेषो द्वादशभिर्गुणितो नक्षत्रसंवत्सरः। उक्तं च—नक्खत्तचंदजोगो बारसगुणिओ य नक्खत्तो। अत्र पुनरेकोनितनक्षत्रपर्याययोग एको नक्षत्रमासः, सप्तविंसतिरहोरात्रा एकविंशतिश्च सप्तषष्टिभाग अहोरात्रस्य। एष राशिर्यदा द्वादशभिर्गुण्यते तदा त्रीण्यहोरात्रशतानि सप्तविंशत्यधिकानि एकपञ्चाशच्च सप्तषष्टिभागा अहोरात्रस्य एतावत्प्रमाणो नक्षत्रसंवत्सरः। ××× इह एकः समस्तनक्षत्रयोगपर्यायो द्वादशभिर्गुणितो नक्षत्रसंवत्सरः। ततो ये नक्षत्रसंवत्सरस्य पूरका द्वादश समस्तनक्षत्रयोगपर्यायाः श्रावण-भाद्रपदादिनामानस्तेऽप्यवयवे समुदायोपचारात् नक्षत्रसंवत्सरः। ततः श्रावणादिभेदात् द्वादशविधो नक्षत्रसंवत्सरः। ××× किमुक्तं भवति—यावता कालेन बृहस्पतिनामा महाग्रहो योगमधिकृत्याभिजिदादीन्यष्टाविंशतिमपि नक्षत्राणि परिसमापयति तावान् कालविशेषो द्वादशवर्षप्रमाणो नक्षत्रसंवत्सरः। (सूर्यप्र. मलय. वृ. १०, २०, ५४–५५); यस्मिन् संवत्सरे समकं समकमेव एककालमेव, ऋतुभिः सहेति गम्यते, नक्षत्राणि उत्तराषाढाप्रभृतीनि योगं युञ्जन्ति—चन्द्रेण सह योगं युञ्जन्ति चन्द्रेण सह योगं युञ्जन्ति सन्ति तां पौर्णमासीं परिसमापयन्ति तथा समकमेव एककालमेव तया तया परिसमाप्यमानया पौर्णमास्या सह ऋतवो निदाघाद्याः परिणमन्ति या परिसमाप्तिमुपयन्ति, इयमत्र भावना—यस्मिन् संवत्सरे नक्षत्रैर्मासिसदृशनामकैस्तस्य तस्य ऋतोः पर्यन्तवर्ती मासः परिसमाप्यते, तेषु च तां तां पौर्णमासीं परिसमापयत्सु तया तया पौर्णमास्या सह ऋतवोऽपि निदाघादिकाः परिसमाप्तिमुपयन्ति। यथा उत्तराषाढानक्षत्रं आषाढीं पौर्णमासीं परिसमापयति तया आषाढपौर्णमास्या सह निदाघोऽपि ऋतुः परिसमाप्तिमुपैति, स नक्षत्रसंवत्सरः, नक्षत्रानुरोधेन तस्य तथा तथा परिणममानत्वात्, एतेन च लक्षणद्वयमभिहितं द्रष्टव्यं, तथा न विद्यतेऽतिशयेन उष्णम् उष्णरूपः परितापो यस्मिन् स नात्युष्णः, तथा न विद्यतेऽतिशयेन शीतं यत्र स नातिशीतो बहु उदकं यत्र स बहूदकः एवंरूपैः पञ्चभिः समग्रैर्लक्षणैरुपेतो भवति नक्षत्रसंवत्सरः। (सूर्यप्र. मलय. वृ. १०, २०, ५७, पृ. १७२)।

१ श्रावण-भादों आदि बारह मासों का एक नक्षत्रसंवत्सर होता है। अथवा बृहस्पति महाग्रह बारह वर्षों में जो समस्त नक्षत्रमण्डल को समाप्त करता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

है उतने काल का नाम नक्षत्रसंवत्सर है। ३ बारह नक्षत्रमासों को अर्थात् तीन सौ सत्ताईस अहोरात्र और एक अहोरात्र के सड़सठ भागों में से इक्यावन भाग प्रमाण काल को (३२७$\frac{५१}{६७}$) नक्षत्रसंवत्सर कहते हैं।

नखसंस्कार—१. निर्वर्तन-विलेखन-घर्षण-रंजनादिको नखसंस्कारः। (भ. आ. विजयो. ९३)। २. लेखन-कर्तन-घर्षण-रंजनादिको नखसंस्कारः। (भ. आ. मूला. ९३)।

२ नखों के लिखने, काटने, घिसने और रंगने आदि को नखसंस्कार कहते हैं।

नगर—१. चतुर्गोपुरान्वितं नगरम्। (धव. पु. १३, पृ. ३३४)। २. चतुर्भिर्गोपुरैर्भासुरं नगरम्। (नि. सा. वृ. ५८)।

१ चार गोपुरों से युक्त पुर को नगर कहते हैं।

नग्न—यः सर्वसङ्गसंत्यक्तः स नग्नः परिकीर्तितः। (उपासका. ८६०)।

जो सर्व प्रकार के परिग्रह से रहित हो उसे नग्न (दिगम्बर मुनि) कहते हैं।

नन्दा—पूर्वपक्षीकृतपरदर्शनानि निराकृत्य स्वपक्षस्थापिका व्याख्या नन्दा। (धव. पु. ९, पृ. २५२)। अन्य दर्शनों को पूर्व पक्ष के रूप में उपस्थित करके उनका निराकरण करते हुए अपने पक्ष को स्थापित करने वाली व्याख्या को नन्दा कहते हैं।

नन्दिवर्धन—सुनाभिर्नन्दिवर्धनः। (निर्वाणक. ४, पृ. ८)।

जिस शंख की नाभि सुन्दर हो उसे नन्दिवर्धन कहते हैं। यह आठ शंखभेदों में चौथा है।

नन्दी—महाकुक्षीर्नन्दी। (निर्वाणक. ४, पृ. ८)। जिसका उदर या मध्य भाग बड़ा हो उस शंख को नन्दी कहते हैं। यह आठ शंखभेदों में तीसरा है।

नपुंसक— १. चारित्रमोहविकल्पनोकषायभेदस्य नपुंसकवेदस्याशुभनाम्नश्चोदयान्न स्त्रियो न पुमांस इति नपुंसकानि भवन्ति। (स. सि. २–५०); नपुंसकवेदोदयात्तदुभयशक्तिविकलं नपुंसकम्। (स. सि. २–५२); यदुदयान्नपुंसकान् भावानुपन्नजति स नपुंसकवेदः। (स. सि. ८–९; त. वृत्ति श्रुत. ८–९)। २. णेवित्थी ण य पुरिसो णउंसओ उहयलिंगवदिरित्तो। इट्ठावग्गिसमाणो वेदणगरुओ कलुसचित्तो॥ (प्रा. पंचसं. १–१०७; धव. पु. १, पृ. ३४२ उद्.; गो. जी. २७५)। ३. नपुंसकवेदाशुभवेदोदयान्नपुंसकानि। चारित्रमोहविकल्पनोकषायभेदस्य नपुंसकवेदस्याशुभनाम्नश्चोदयान्न स्त्रियो न पुमांस इति नपुंसकानि। (त. वा. २, ५०, ४); नपुंसकवेदोदयात् तदुभयशक्तिविकलं नपुंसकम्। (त. वा. २, ५२, १); यत्कर्मोदयात् नपुंसकान् भावानुपन्नजति स नपुंसकवेदः। (त. वा. ८, ९, ४)। ४. तदुभयात्यये नपुंसकम्। (लघीय. स्वो. विव. ४७)। ५. नपुंसकस्य तु नपुंसकवेदोदयादुभयाभिलाषः। (श्रा. प्र. टी. १८)। ६. न स्त्री न पुमान् नपुंसकमुभयाभिलाष इति। (धव. पु. १, पृ. ३४१); जेसिमुदएण इट्ठावागग्गिसारिच्छेण दोसु वि आकंखा उप्पज्जइ तेसिं णउंसयवेदो त्ति सण्णा। (धव. पु. ६, पृ. ४७); णपुंसयवेदोदएण णवुंसयवेदो होदि। (धव. पु. ७, पृ. ७९); जस्स कम्मस्स उदएण इत्थि-पुरिसेसु अहिलासो उप्पज्जदि तं कम्मं णपुंसयवेदो णाम। (धव. पु. १३, पृ. ३६१)। ७. न स्त्री न पुरुषः पापो द्वयरूपो नपुंसकः। (पंचसं. अमित. १९५, पृ. २६); सुष्ठु क्लिष्टमनोवृत्तिर्द्वयाकांक्षी नपुंसकः। नरप्रजावतीरूपो दुःसहाधिकवेदनः। (पंचसं. अमित. २०१, पृ. २६)। ८. तदुभयात्यये स्त्यान-प्रसवनोभयाभावे नपुंसकम्। (न्यायकु. २–४७, पृ. ६४८)। ९. इत्थी-पुरिसाणुवरिं जस्सिह उदएण राग उप्पज्जे। नगरमहादाहसमो सो उ विवागो अपुमवेए॥ (कर्मवि. ग. ५३)। १०. येषां च पुद्गलस्कन्धानामुदयेनेष्टकाग्निसदृशेन द्वयोराकांक्षा जायते तेषां नपुंसकवेद इति संज्ञा। (मूला. वृ. १२–१९२)। ११. नपुंसकवेदं नपुंसकभावप्राप्तिनिमित्तोदयकषायवेदनीयविशेषं क्षपयति। (भ. आ. मूला. २०९७)। १२. यदुदयेन पण्डकस्य स्त्री-पुंसयोरुभयोरभिलाषः पित्तश्लेष्मणोरुदयेन मर्जिकाभिलाषवत् स महानगरदाहाग्निसमानो नपुंसकवेदः। (कर्मस्त. गो. वृ. १०, पृ. ८४; धर्मसं. मलय. वृ. ६१५)। १३. उभयोरप्यभिलाषो नपुंसकभेदः। (जीवाजी. मलय. वृ. १३, पृ. १८)। १४. नपुंसकस्य वेदो नपुंसकवेदः। नपुंसकस्य स्त्रियं पुरुषं च प्रत्यभिलाष इत्यर्थः, तद्विपाकवेद्यं कर्मापि नपुंसकवेदः। (प्रज्ञाप. मलय. वृ. २३–२९३, पृ. ४९३)।

१ चारित्रमोह के विकल्परूप नोकषाय के भेदभूत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नपुंसकवेद और अशुभ नामकर्म के उदय से जो न स्त्री होते हैं और न पुरुष भी, वे नपुंसक कहे जाते हैं। ××× जिसके उदय से जीव नपुंसक के भावों को प्राप्त होता है उसे नपुंसकवेद (नोकषाय-भेद) कहते हैं। ९ जिसके उदय से स्त्री और पुरुष के ऊपर नगर के महादाह के समान राग उत्पन्न होता है उसे नपुंसकवेद जानना चाहिए।

नपुंसकवेद—देखो नपुंसक।

नभ—देखो आकाश। भायणं सव्वदव्वाणं नहं ओगाहलक्खणं ॥ (उत्तरा. २८–९)।

जो सब द्रव्यों का भाजन (आधार) है व जिसका अवकाश देना स्वभाव है उसे नभ (आकाश) कहते हैं।

नभोनिमित्त—रवि-ससि-गहपहुदीणं उदयत्थमणादिआइ दट्ठूणं। खीणत्तं दुक्ख-सुहं जं जाणइ तं हि णहणिमित्तं ॥ (ति. प. ४–१००३)।

सूर्य, चन्द्र और ग्रह आदि के उदय और अस्तमन आदि को देखकर क्षीणता और सुख-दुःखादि के जान लेने को नभोनिमित्त कहते हैं।

नभोयान—नभसि गगने हेममयाम्भोजोपरि यानं नभोयानम्। (आ. मी. वृ. १)।

आकाश में सुवर्णमय कमल के ऊपर गमन करने को नभोयान कहते हैं।

नम—नम इति नैपातिकं पदं द्रव्य-भावसंकोचार्थम्, आह च—नेवाइयं पयं दव्व-भावसंकोयणपयत्थो। नमः—कर-चरण-मस्तकसुप्रणिधानरूपो नमस्कारो भवत्वित्यर्थः। (जम्बूद्वी. शा. वृ. १, पृ. १०)।

'नम' यह निपात से निष्पन्न पद है, इसका अर्थ है द्रव्य और भाव का संकोच। अभिप्राय यह है कि हाथ, पैर और मस्तक की सावधानता को या उनके शुभ व्यापार को नम (नमस्कार) कहा जाता है।

नमस्कार—१. पंचहिं मुट्ठीहिं जिणिंदचलणे सुनिवदणं णमंसणं। (धव. पु. ८, पृ. ९२)। २. अर्हदादिगुणानुरागवतः आत्मनो वाक्कायक्रियास्तवनशिरोवनतिरूपो नमस्कारः। (भ. आ. विजयो. ७५३)।

१ पांच मुट्ठियों (अंगों) से जिनेन्द्र के चरणों में पड़ने का नाम नमंसन (नमस्यन) या नमस्कार है। २ अरहंत आदि के गुणों में अनुराग रखने वाला जीव जो स्तुति और सिर झुकाने रूप अपने वचन और काय की क्रिया को करता है, इसे नमस्कार कहा जाता है।

नमस्कृतिमुद्रा—संलग्नौ दक्षिणाङ्गुष्ठाक्रान्तवामाङ्गुष्ठपाणीति नमस्कृतिमुद्रा। (निर्वाणक. १६. ९, ७, पृ. ३३)।

दाहिने अंगूठे से आक्रान्त बायें अंगूठे से युक्त संलग्न दोनों हाथों की जो अवस्था होती है, इसे नमस्कृतिमुद्रा कहते हैं।

नमस्यन—देखो नमस्कार।

नमि—परीषहोपसर्गादिनामनाद् नमिः, तथा गर्भस्थे भगवति परचक्रनृपैरपि प्रणतिः कृतेति नमिः। (योगशा. हेम. पृ. ३–१४२)।

परीसह व उपसर्ग आदि के नमाने के कारण तथा शत्रु राजाओं के द्वारा भी नमस्कार किये जाने के कारण इक्कीसवें तीर्थंकर 'नमि' कहलाये।

नय—१. गुणोऽपरो मुख्यनियामहेतुर्नयः××× (स्वयम्भू. ५२); नयास्तव स्यात्पदसत्यलाञ्छिता रसोपविद्धा इव लोहधातवः। (स्वयम्भू. ६५)। २. सधर्मणैव साध्यस्य साधर्म्यादविरोधतः। स्याद्वादप्रविभक्तार्थविशेषव्यंजको नयः। (आ. मी. १०६)। ३. वस्तुन्यनेकान्तात्मनि अविरोधेन हेत्वर्पणात् साध्यविशेषस्य याथात्म्यप्रापणप्रवणप्रयोगो नयः। (स. सि. १–३३)। ४. नयाः प्रापकाः कारकाः साधका निर्वर्तका निर्भासका उपलम्भका व्यञ्जका इत्यनर्थान्तरम्। जीवादीन् पदार्थान् नयन्ति प्राप्नुवन्ति कारयन्ति साधयन्ति निर्वर्तयन्ति निर्भासयन्ति उपलम्भयन्ति व्यञ्जयन्तीति नयाः। (त. भा. १–३५, पृ. १२०–२१)। ५. नायम्मि गिण्हियव्वे अगिण्हिअव्वम्मि चेव अत्थम्मि। जइअव्वमेव इह जो उवएसो सो णओ नाम ॥ (आव. नि. १०६६; दशवै. नि. १४९)। ६. णीञ् प्रापणे, तस्य नय इति रूपम्, वक्तैव सूत्रार्थप्रापणे गम्ये परोपयोगान्नयति नयः, नीयते चानेन अस्मिन् वेति नयनं वा नयः, वस्तुनः पर्यायाणां संभवतोऽधिगमनमित्यर्थः। (उत्तरा. चू. पृ. ९); नयाः कारका दीपकाः व्यञ्जका भावकाः उपलम्भका इत्यर्थः, विविधैः प्रकारैरर्थविशेषान् स्वेन स्वेनाभिप्रायेण नयन्तीति नयाः। (उत्तरा. चू. पृ. ४७)। ७. एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः। (न्यायाव.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२९)। ८. ज्ञातृणामभिसन्धयः खलु नयाः ××× । (सिद्धवि. १०-१); ××× नयो ज्ञातुर्मतं मतः। (सिद्धवि. १०-२)। ९. भेदाभेदात्मके ज्ञेये भेदाभेदाभिसन्धयः। ये ते ऽपेक्षानपेक्षाभ्यां लक्ष्यन्ते नय-दुर्नयाः॥ (लघीय. ३०); नयो ज्ञातुरभिप्रायः। (लघीय. स्वो. वि. ३०); तदपेक्षो (षट्कारकापेक्षो) नयः। (लघीय. स्वो. वि. ४८); नयो ज्ञातुरभिप्रायो युक्तितोऽर्थपरिग्रहः। (लघीय. ५२; प्रमाणसं. ८७); ××× नयो विकलसंकथा। (लघीय. ६२); श्रुतभेदा नयाः सप्त नैगमादिप्रभेदतः। द्रव्य-पर्यायमूलास्ते द्रव्यमेकान्वयानुगम्॥ (लघीय. ६६); सापेक्षो नयः। (लघीय. स्वो. वि. ७१); तदर्थांशपरीक्षाप्रवणोऽभिसन्धिर्नयः (लघीय. स्वो. वि. ७४)। १०. अवयवविषया नयाः। (त. वा. १, ६, ३); सम्यगेकान्तो नयः। (त. वा. १, ६, ७); प्रमाणप्रकाशितार्थविशेषप्ररूपको नयः। (त. वा. १, ३३, १)। ११. तस्य (अर्थतत्त्वस्य) विशेषो नित्यत्वादिः पृथक् पृथक्, तस्य प्रतिपादको नयः। तथा चोक्तम्—अर्थस्यानेकरूपस्य धीः प्रमाणं तदंशधीः। नयो धर्मान्तरापेक्षी ××× ॥ (अष्टश. १०६); उक्तलक्षणो (स्याद्वादप्रविभक्तार्थव्यञ्जको) द्रव्य-पर्यायस्थानः संग्रहादिर्नयः। (अष्टश. १०७)। १२. नयनं नीयते वा ऽनेनादस्मादस्मिन्निति वा नयः, वस्तुनः पर्यायाणां संभवतोऽधिगम इत्यर्थः। (आव. नि. हरि. वृ. ७९, पृ. ५४); नयन्तीति नयाः, वस्त्ववबोधगोचरं प्रापयन्त्यनेकधर्मात्मकज्ञेयाध्यवसायान्तरहेतवः इत्यर्थः। (आव. नि. हरि. वृ. ७५४, पृ. २८२)। १३. नयनं नयः, नीयते ऽनेनास्मिन्नस्मादिति वा नयः अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छेद इत्यर्थः। (अनुयो. हरि. वृ. पृ. २७); नीतयो नयाः अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छित्तयः। (अनुयो. हरि वृ. पृ. ९९) वस्तुनोऽनेकधर्मिणः एकेन धर्मेण नयनं नयः। (अनुयो. हरि. वृ. पृ. १०५)। १४. प्रमाणपरिगृहीतार्थैकदेशे वस्त्वध्यवसायो नयः। (धव. पु. १, पृ. ८३; पु. ९, पृ. १६३; जयध. १, पृ. ९९ व १९९); ज्ञातुरभिप्रायो नयः। अभिप्राय इत्यस्य कोऽर्थः। प्रमाणपरिगृहीतार्थैकदेशवस्त्वध्यवसाय अभिप्रायः। युक्तितः प्रमाणात् अर्थपरिग्रहः द्रव्य-पर्याययोरन्यतरस्य अर्थ इति परिग्रहो वा नयः, प्रमाणेन परिच्छिन्नस्य वस्तुनः द्रव्ये पर्याये वा वस्त्वध्यवसायो नय इति यावत्। (धव. पु. ९, पृ. १६२-६३); प्रमाणपरिच्छिन्नवस्तुनः एकदेशे वस्तुत्वार्पणा नयः। (धव. पु. ९, पृ. १६४)। प्रमाणपरिगृहीतवस्तुनि यो व्यवहार एकान्तरूपः स नयनिबन्धनः ××× तथा पूज्यपादभट्टारकैरप्यभाणि सामान्यनयलक्षणमिदमेव। तद्यथा—प्रमाणप्रकाशितार्थविशेषप्ररूपको नयः इति। ××× तथा प्रभाचन्द्रभट्टारकैरप्यभाणि—प्रमाणव्यपाश्रयतत्परिणामविकल्पवशीकृतार्थविशेषप्ररूपणप्रवणः प्रणधिर्यः स नय इति। ××× सारसंग्रहेऽप्युक्तं पूज्यपादैः—अनन्तपर्यायात्मकस्य वस्तुनोऽन्यतमपर्यायाधिगमे कर्तव्ये जात्यहेत्वपेक्षो निरवद्यप्रयोगो नय इति। (धव. पु. ९, पृ. १६५-६७); आत्रिकामुत्रिकफलप्राप्त्युपायो नयः। (धव. पु. १३, पृ. २८७)। १५. अनन्तपर्यायात्मकस्य वस्तुनोऽन्यतमपर्यायाधिगमे कर्तव्ये जात्ययुक्त्यपेक्षो निरवद्यप्रयोगो नयः इति। अयं वाक्यनयः सारसंग्रहीयः। प्रमाणप्रकाशितार्थविशेषप्ररूपको नयः। अयं वाक्यनयः तत्त्वार्थभाष्यगतः। ××× प्रमाणव्यपाश्रयपरिणामविकल्पवशीकृतार्थविशेषप्ररूपणप्रवणः प्रणिधिर्यः स नय इति। अयं वाक्यनयः प्रभाचन्द्रीयः। जयध. १, पृ. २१०)। १६. नयो ऽनेकात्मनि द्रव्ये नियतैकात्मसंग्रहः। (ह. पु. ५८-३९)। १७. स्वार्थनिश्चायकत्वेन प्रमाणं नय इत्यसत्। स्वार्थैकदेशनिर्णीतिलक्षणो हि नयः स्मृतः। (त. श्लो. १, ६, ४); ××× सामान्यादेशतस्तावदेक एव नयः स्थितः। स्याद्वादप्रविभक्तार्थविशेषव्यंजनात्मकः॥ (त. श्लो. १, ३३, २); नीयते गम्यते येन श्रुतार्थांशो नयो हि सः। (त. श्लो. १, ३३, ६)। १८. अनन्तधर्मात्मकस्य वस्तुनोऽन्यतमधर्मपरिच्छेदस्तदविनाभाविधर्मबलप्रसूतो नयः। (भ. आ. विजयो. ५)। १९. नयन्तीति नयाः कारकाः व्यञ्जका इति ××× ये ह्यनेकधर्मात्मकं वस्त्वेकेन धर्मेण निरूपयन्ति एतावदेवेदं नित्यमनित्यं वेत्यादिविकल्पयुक्तं ते नयाः नैगमादयः। ××× नयास्तु एकांशावलम्बिनः, यत्तु ज्ञानमनेकधर्मात्मकं सद्वस्तु एकधर्मावधारणेनावच्छिनत्त्येवमात्मकमेवैतदिति तन्नया इति कथ्यन्ते। (त. भा. सिद्ध. वृ. १-६)। २०. लोयाणं ववहारं धम्मविवक्खाइ जो पसाहेदि। सुयणाणस्स वियप्पो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सो वि णओ लिंगसंभूदो ॥ (कार्तिके. २६३)। २१. जं णाणीण वियप्पं सुयभेयं वत्थुयंससंगहणं। तं इह णयं पउत्तं णाणी पुण तेहि णाणेहिं ॥ (नयच. २; द्रव्यस्व. १७४)। २२. प्रमाणेन वस्तुसंगृहीतार्थैकांशो नयः, नानास्वभावेभ्यो व्यावर्त्य एकस्मिन् स्वभावे वस्तु नयति प्रापयतीति वा नयः। (आलाप. पृ. १४५)। २३. वस्तुनो ऽनन्तधर्मस्य प्रमाणव्यञ्जितात्मनः। एकदेशस्य नेता यः स नयोऽनेकधा मतः ॥ (त. सा. १-३७)। २४. नय इति प्रमाणगृहीतैकदेशाव्य[ध्य]वसायाभिप्रायः। (सिद्धि. वि. वृ. १०-३)। २५. नयस्तु विकलसंकथा—वस्त्वेकदेशकथनम्। (न्यायकु. ६२, पृ. ६८८)। २६. तत्राऽनिराकृतप्रतिपक्षो वस्त्वंशग्राही ज्ञातुरभिप्रायो नयः। (प्र. क. मा. ६-७४)। २७. स्याद्वादप्रविवेचितार्थैकदेशप्रतिपत्त्रभिप्रायो नयः। (न्यायवि. वृ. ३-९१)। २८. नयनं—अनन्तधर्मात्मकस्य वस्तुनो नियतैकधर्मावलम्बनेन प्रतीतौ प्रापणं नयः। ××× नयनं नयः। अनन्तधर्मणोऽर्थस्यैकांशेनेति निरुक्तयः ॥ (उत्तरा. नि. शा. वृ. २८, पृ. ११); नयति—अनेकांशात्मकं वस्त्वेकांशावलम्बनेन प्रतीतिपथमारोपयति, नीयते वा तेन तस्मिंस्ततो वा, नयनं वा नयः, प्रमाणप्रवृत्त्युत्तरकालभावी परामर्श इत्यर्थः। उक्तं च—स नयइ तेण तहिं वा ततोऽहवा वत्थुणो व जं णयणं। बहुहा पज्जायाणं संभवओ सो णतो णामं ॥ (उत्तरा. सू. शा. वृ. ४८, पृ. ६७,। २९. नयनं नयः, नीयतेऽनेनास्मिन्नस्मादिति वा नयः—अनन्तधर्मात्मकस्य वस्तुनः एकांशपरिच्छेद इत्यर्थः। (स्थाना. सू. अभय. वृ. १, पृ. ४); नयन्ति परिच्छिन्दन्त्यनेकधर्मात्मकं सद्वस्तु सा(अन)वधारणतयैकेन धर्मेणेति नयाः। (स्थाना. सू. अभय. वृ. ३, ३, १८६, पृ. १५२)। ३०. नीयते येन श्रुताख्यप्रमाणविषयीकृतस्यार्थस्यांशस्तदितरांशौदासीन्यतः स प्रतिपत्तुरभिप्रायविशेषो नयः। (प्र. न. त. ७-१)। ३१. नीयते गम्यते श्रुतपरिच्छिन्नार्थैकदेशोऽनेनेति नयः। (स्या. र. १-१, पृ. ८)। ३२. नयनं नयो नीयते परिच्छिद्यते अनेनास्मिन्नस्मादिति वा नयः, सर्वत्रानन्तधर्माध्यासिते वस्त्वेकांशग्राहको बोध इत्यर्थः। (अनुयो. मल. हेम. वृ. ५९, पृ. ४५); अनन्तधर्मणो वस्तुन एकांशेन नयनं नयः। (अनुयो. हेम. वृ. १४५, पृ. २२३)। ३३. नयः प्रमाणपरिगृहीतार्थैकदेशे वस्त्वध्यवसायः। (आ. मी. वसु. वृ. २३); जातियुक्तिनिबन्धनो वितर्को नयः। (आ. मी. वसु. वृ. १०१); एकधर्मप्रतिपत्तिर्नयः। (आ. मी. वसु. वृ. १०६)। ३४. श्रुतनिरूपितैकदेशाध्यवसायो नयः। (मूला. वृ. ९-६७)। ३५. अत्रैकवचनमतन्त्रम्, तेनांशावंशा वा येन परामर्शविशेषेण श्रुतप्रमाणप्रतिपन्नवस्तुनो विषयीक्रियन्ते तदितरांशौदासीन्यापेक्षया स नयो ऽभिधीयते। (रत्नाकरा. ७-१, पृ. १)। ३६. नयो नाम प्रतिनियतैकवस्त्वंशविषयो ऽभिप्रायविशेषः। यदाहुः समन्तभद्रादयः—नयो ज्ञातुरभिप्राय इति। (सूर्यप्र. मलय. वृ. १-७, पृ. ३६)। ३७. नयनं नीयते वा अनेनेति नयः—वस्तुनो वाच्यस्य पर्यायाणां सम्भवतोऽधिगमः। (आव. नि. मलय. वृ. ७९, पृ. ९०); अनेकधर्मकं वस्त्ववधारणपूर्वकमेकेन नित्यत्वाद्यन्यतमेन धर्मेण प्रतिपाद्यस्य बुद्धिं नीयते प्राप्यते येनाभिप्रायविशेषेण स ज्ञातुरभिप्रायविशेषो नयः। आह च—एगेण वत्थुणोऽणेगधम्मुणो जमवधारणेण (इट्ठेण)। नयणं धम्मेण नओ होइ तओ सत्तहा सो य ॥ (आव. नि. मलय. वृ. ७५४, पृ. ३६९; प्रव. सारो. वृ. ८४७); ज्ञेये प्रमाणपरिच्छेद्ये वस्तुनि ये भेदाभेदाभिसन्धयः सामान्य-विशेषविषयाः पुरुषाभिप्रायाः अपेक्षानपेक्षाभ्यां लक्ष्यन्ते ते यथासंख्यं नय-दुर्नया ज्ञातव्याः। किमुक्तं भवति ? विशेषाकांक्षः सामान्यग्राहको वा अभिप्रायः सामान्यसापेक्षो विशेषग्राहको वा नयः। [लघीयस्त्रयस्य ३०तमायाः कारिकाया इयं व्याख्या]। (आव. नि. मलय. वृ. ७५४, पृ. ३७०)। ३८. अनन्तधर्मात्मकस्य वस्तुनो अन्यतमधर्मपरिच्छेदस्तदविनाभाविधर्मपरिच्छेदबलप्रसूतो नयः। (भ. आ. मूला. ५)। ३९. नयनं वस्तुनो विवक्षितधर्मप्रापणं नयः। (लघीय. अभय. वृ. ६२, पृ. ८४)। ४०. प्रमाणगृहीतार्थैकदेशग्राही प्रमातुरभिप्रायविशेषो नयः। (न्यायदी. पृ. १२५)। ४१. जीवादौ अनेकान्तात्मनि अनेकरूपिणि वस्तुनि अविरोधेन प्रतीत्यऽनतिक्रमेण हेत्वर्पणात् द्रव्य-पर्यायार्पणात् साध्यविशेषयाथात्म्यप्रापणप्रवणप्रयोगो नयः उच्यते। अस्यायमर्थः—साध्यविशेषस्य नित्यत्वानित्यत्वादेः याथात्म्यप्रापणप्रवणप्रयोगो यथावस्थितस्वरूपेण प्रदर्शनसमर्थव्यापारो नयः। (त.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वृत्ति श्रुत. १–३३)। ४२. इत्युक्तलक्षणोऽस्मिन् विरुद्धधर्मद्वयात्मके तत्त्वे। तत्राप्यन्यतरस्य स्यादिह धर्मस्य वाचकश्च यः॥ (पंचाध्या. १–५०४)। ४३. नयनं नीयते ऽनेनास्मिन्नस्मादिति वा नयः— अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छेदः एकेनैव धर्मेण पुरस्कृतेन वस्त्वङ्गीकार इत्यर्थः। (जम्बूद्वी. शा. वृ. पृ. ५)।

२ सधर्मा दृष्टान्त के साथ ही साधर्म्य होने से जो विना किसी प्रकार के विरोध के स्याद्वाद रूप परमागम में विभक्त अर्थ (साध्य) विशेष का व्यंजक (गमक) होता है उसे नय कहते हैं। 'नीयते साध्यते गम्यार्थोऽनेनेति नयो हेतुः' इस निरुक्ति के अनुसार प्रकृत नय शब्द यहां हेतु का नामान्तर है। ३ अनेक धर्मात्मक वस्तु के विषय में विरोध के विना हेतु की मुख्यता से साध्यविशेष की यथार्थता के प्राप्त कराने में समर्थ जो प्रयोग होता है उसे नय कहा जाता है। ४ नय प्रापक, कारक, साधक, निर्वर्तक, निर्भासक, उपलम्भक और व्यंजक ये सब समानार्थक शब्द हैं। तदनुसार जो जीवादि पदार्थों को प्राप्त कराते हैं, कराते हैं, साधते हैं अथवा प्रकाशित करते हैं उन्हें नय समझना चाहिए। ८ ज्ञाता जनों के जो अभिप्राय हुआ करते हैं उनका नाम नय है। १४ प्रमाण से परिगृहीत वस्तु के एक देश में जो वस्तु का निश्चय होता है वह नय कहलाता है।

नयगति—से किं तं णयगती? २ जण्णं णेगम-संगह-ववहार-उज्जुसुय-सद्द-समभिरूढ-एवंभूयाणं जा गती अहवा सव्वणया वि जं इच्छंति से तं नयगती। (प्रज्ञाप. १६–२०५, पृ. ३२७)।

नैगमादि नयों की गति को नयगति कहते हैं। अथवा सभी नय जो स्वीकार करते हैं, इसका नाम नयगति है।

नयनक्रिया—स्वयं नयनक्रिया अन्यैर्वाऽऽनायनं स्वच्छन्दन्तो नयनक्रिया। (त. भा. सिद्ध. वृ. ६–६)।

स्वयं ले जाना या स्वच्छन्दतापूर्वक दूसरों से मंगवाना; यह नयनक्रिया कहलाती है।

नयप्रमाण—नीतयो नयाः अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छित्तयः तद्विषया वा ते एव वा प्रमाणं नयप्रमाणम्, नयसमुदायात्मकत्वाद्धि स्याद्वादस्य समुदाय-समुदायिनोः कथंचिदभेदेन नया एव प्रमाणं नयप्रमाणम्। (अनुयो. हरि. वृ. पृ. ९९)।

अनन्त धर्मस्वरूप वस्तु के एक अंश के ग्रहण करने वाले ज्ञानों, उनके विषयों अथवा उन नयों को ही नयप्रमाण कहा जाता है। कारण यह कि प्रमाण-भूत स्याद्वाद नयों के समुदाय रूप है, अतः समुदाय और समुदायी में कथंचित् अभेद होने से नयों को प्रमाण कहना विरुद्ध नहीं है।

नयवाद—स (नयः) उच्यते कथ्यते अनेनेति नयवादः सिद्धान्तः। (धव. पु. १३, पृ. २८७)।

नय के प्ररूपक सिद्धान्त को नयवाद कहा जाता है।

नयविधि—नया नैगमादयः, ते विधीयन्ते निरूप्यन्ते सदसदादिरूपेणास्मिन्निति नयविधिः। अथवा नैगमादिनयैः विधीयन्ते जीवादयः पदार्था अस्मिन्निति नयविधिः। (धव. पु. १३, पृ. २८४)।

सत् असत् आदि रूप से जहां नैगमादि नयों का निरूपण किया जाता है उसे नयविधि कहते हैं, अथवा जहां नैगमादि नयों के आश्रय से जीवादि पदार्थों का विधान किया जाता है वह नयविधि कहलाती है।

नयसप्तभङ्गी—विकलादेशस्वभावा हि नयसप्तभङ्गी वस्त्वंशमात्रप्ररूपकत्वात्। (प्र. क. मा. ६, ७४, पृ. ६८२)।

विकलादेश स्वभाववाली सप्तभंगी वस्तु के केवल एक अंश की प्ररूपणा करने के कारण नयसप्तभंगी कहलाती है।

नयान्तरविधि—नयान्तराणि नैगमादिसप्तशतनयभेदाः। ते विधीयन्ते निरूप्यन्ते विषयसाङ्कर्यनिराकरणद्वारेण अस्मिन्निति नयान्तरविधिः श्रुतज्ञानम्। (धव. पु. १३, पृ. २८४)।

विषयसांकर्य का निराकरण करते हुए जहां सात सौ नयभेदों की प्ररूपणा की जाती है उसे नयान्तरविधि कहा जाता है।

नयाभास—१. पुनर्नैगमादयो निरपेक्षा परस्परेण ते नयाभासाः इति। (त. भा. सिद्ध. वृ. १–७)। २. निराकृतप्रतिपक्षस्तु नयाभासः। (प्र. क. मा. ६–७४, पृ. ६७६)। ३. स्वाभिप्रेतादंशादितरांशापलापी पुनर्नयाभासः। (प्र. न. त. ७–२)। ४. नयाभासो नयप्रतिबिम्बात्मा, दुर्नय इत्यर्थः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथा तीर्थिकानां नित्यानित्याद्येकान्तप्रदर्शकं सकलं वाक्यम्। (रत्नाकरा. ७-२, पृ. ५)।

१ परस्पर की अपेक्षा से रहित नैगमादि नयों को नयाभास कहा जाता हैं। २ प्रतिपक्ष का निराकरण करने वाले नय को नयाभास कहते हैं।

नयुत—चतुरशीतिनयुताङ्गशतसहस्राणि एकं नयुतम्। (जीवाजी. मलय. वृ. १७८, पृ. ३४५)।

चौरासी लाख नयुतांगों का एक नयुत होता है।

नयुताङ्ग—चतुरशीतिः प्रयुतशतसहस्राणि एकं नयुताङ्गम्। (जीवाजी. मलय. वृ. १७८, पृ. ३४५)।

चौरासी लाख प्रयुतों का एक नयुतांग होता है।

नर— १. धर्मार्थ-काम-मोक्षकार्यकरणान्नरः। धर्मार्थ-काम-मोक्षलक्षणानि कार्याणि नृणन्ति नयन्तीति नराः। (त. वा. २, ५०, १)। २. 'नृ नये' नृणन्ति तथाविधद्रव्य-क्षेत्रादिसामग्रीमवाप्य स्वर्गापवर्गादिहेतुसम्यग्नय-विनयपरा भवन्तीत्यचि नरा मनुष्याः। (संग्रहणी. दे. वृ. १, पृ. ३)।

१ जो धर्म, अर्थ, काम और मोक्षरूप कार्यों को ले जाते हैं—उनकी आराधना करते हैं—वे नर कहलाते हैं। २ उस प्रकार की द्रव्य-क्षेत्रादिरूप सामग्री को पाकर जो स्वर्ग-मोक्ष आदि के कारणों में समुद्यत होते हैं उन्हें नर या मनुष्य कहते हैं।

नरक—१. नरान् कायन्तीति नरकाणि। शीतोष्णासद्वेद्योदयापादितवेदनया नरान् कायन्ति शब्दायन्त इति नरकाणि, नृणन्तीति वा। अथवा पापकृतः प्राणिनः आत्यन्तिकं दुःखं नृणन्ति नयन्तीति नरकाणि। (त. वा. २, ५०, २-३)। २. नरान् प्राणिनः कायति पातयति खलीकरोति इति नरकः कर्म। (धव. पु. १, पृ. २०१)। ३. को नरकः? परवशता। (रत्नमा. १३)।

१ असातावेदनीय कर्म के उदय से प्राप्त हुई शीत व उष्ण आदि की वेदना से जो नरों को—जीवों को—शब्द कराते हैं—रुलाते हैं वे नरक कहलाते हैं। अथवा जो पाप करने वाले प्राणियों को अतिशय दुःख को प्राप्त कराते हैं उन्हें नरक कहा जाता है।

नरकगति नामकर्म—१. यन्निमित्त आत्मनो नारको भावस्तन्नरकगतिनाम। (स. सि. ८-११; त. वा. ८, ११, १)। २. यस्या उदयः सकलाशुभकर्मणामुदयस्य सहकारिकारणं भवति सा नरकगतिः। (धव. पु. १, पृ. २०१; जस्स कम्मस्स उदएण णिरयभावो जीवाणं होदि तं कम्मं णिरयगदि त्ति उच्चदि। (धव. पु. ६, पृ. ६७); जं णिरय-तिरिक्ख-मणुस्स-देवाणं णिव्वत्तयं कम्मं तं गदिणामं (जं णिरयभावणिव्वत्तयं कम्मं तं णिरयगदिणामं)। (धव. पु. १३, पृ. ३६३)। ३. जीए उदएण जीवो णेरइयो होइ नरयपुढवीए। सा भणिया नरयगई सेसगईओवि एमेव॥ (कर्मवि. ग. ८५)। ४. नारकशब्दव्यपदेश्यपर्यायनिबन्धनं नरकगतिनाम। (कर्मस्त. गो. वृ. १०, पृ. १७)। ५. नरकस्य गतिर्नरकगतिरात्मनो नारकभावनिमित्तं नामकर्मविशेषः। (भ. आ. मूला. २०९५)। ६. यन्निमित्तमात्मनो नारकपर्यायः तन्नरकगतिनाम। (गो. क. जी. प्र. ३३)। ७. यदुदयाज्जीवो नारकशरीरनिष्पत्तिको भवति तन्नरकगतिनाम। (त. वृत्ति श्रुत. ८-११)।

१ जिस कर्म के निमित्त से जीव के नारकभाव—नारक पर्याय—प्राप्त होती है उसे नरकगति नामकर्म कहते हैं।

नरकगतिप्रायोग्यानुपूर्व्यनाम—१. यदा छिन्नायुर्मनुष्यस्तिर्यग्वा पूर्वेण शरीरेण वियुज्यते तदैव नरकभवं प्रत्यभिमुखस्य तस्य पूर्वशरीरसंस्थानानिवृत्तिकारणं विग्रहगतावुदेति तन्नरकगतिप्रायोग्यानुपूर्व्यनाम। (त. वा. ८, ११, ११)। २. जस्स कम्मस्स उदएण णिरयगइं गयस्स जीवस्स विग्गहगईए वट्टमाणस्स णिरयगइपाओग्गसंठाणं होदि तं णिरयगइपाओग्गाणुपुव्वीणाम। (धव. पु. ६, पृ. ७६)। ३. नरयाउअस्स उदए नरए वक्केण गच्छमाणस्स। नरयाणुपुव्वियाए तहिं उदओ अन्नहिं नत्थि॥ (कर्मवि. ग. १२२)। ४. यस्य कर्मस्कन्धस्योदयेन नरकगतिं गतस्य जीवस्य विग्रहगतौ वर्तमानस्य नरकगतिप्रायोग्यसंस्थानं भवति तन्नरकगतिप्रायोग्यानुपूर्व्यं नाम। (मूला. वृ. १२-१९४)। ५. यद्यत्पूर्वशरीराकारम् अविनाश्य जीवेन सह नरकादि यावदेव बोलापकवद् गच्छति तत् (आनुपूर्वाख्यं नाम) नरकादिगतिप्रायोग्यानुपूर्व्यादिभेदाच्चतुर्विधम्। (भ. आ. मूला. २०९५)।

१ जो मनुष्य अथवा तिर्यंच आयु के क्षीण हो जाने से पूर्व शरीर को छोड़कर नारक पर्याय के अभिमुख होता है उसके पूर्व शरीर के आकार के बने

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रहने का कारणभूत जो कर्म विग्रहगति में उदय को प्राप्त होता है उसे नरकगतिप्रायोग्यानुपूर्व्यनामकर्म कहते हैं। ३ नारक आयु का उदय होने पर मोड़ लेकर नरक में जाते हुए जीव के वहां (मोड़ वाली विग्रहगति में) नरकानुपूर्वी का उदय होता है, अन्यत्र (ऋजुगति में) उसका उदय नहीं होता।

नरकायु—जं नेरइयं नारयभवम्मि तहिं धरइ उव्वियंतंपि। जाणसु तं निरयाउं हडिसरिसो तस्स उ विवागो ॥ (कर्मवि. ग. ६४)।

जो कर्म नारकी जीव को उद्विग्न होने पर भी नारक पर्याय में धारण करता है—उसे वहां रोककर रखता है—उसे नरकायु कहते हैं। उसका विपाक काठ की बेड़ी से समान है।

नरत—देखो नारक। द्रव्य-क्षेत्र-काल-भावेष्वन्योन्येषु च निरताः नरताः। ××× उक्तं च—ण रमंति जदो णिच्चं दव्वे खेत्ते य काल-भावे य। अण्णोण्णेहिं जम्हा तम्हा ते णारया भणिया ॥ (धव. पु. १, पृ. २०२)।

जो द्रव्य, क्षेत्र, काल और भाव तथा परस्पर में भी रत (प्रीतियुक्त) नहीं होते हैं वे नरत (नारकी) कहे जाते हैं।

नरतगति—देखो नारकगति। तेषां (नरतानां) गतिर्नरतगतिः। (धव. पु. १. पृ. २०२)।

नरतों (नारकियों) की गति को नरतगति कहते हैं।

नरदेव—से केणट्ठेणं भंते एवं वुच्चइ नरदेवा? गोयमा जे इमे रायाणो चाउरंतचक्कवट्टी उप्पण्णसम्मत्ता चक्करयणपहाणा णवणिहिपइणो समिद्धकोसा बत्तीसंरायवरसहस्साणुयातमग्गा सागरवरमेहलाहिपतिणो मणुस्सिंदा, से तेणट्ठेणं जाव नरदेवा। (व्याख्याप्र. १२, ९, २, पृ. १७६४–६५)।

जो चातुरन्त चक्रवर्ती होकर सम्यक्त्व से सहित, चक्ररत्न के स्वामी, नौ निधियों के अधिपति, वृद्धिगत कोश (खजाना) से सहित, बत्तीस हजार राजाओं से अनुगत और समुद्र पर्यन्त पृथिवी के पति होते हैं; उन मनुष्यश्रेष्ठों को नरदेव कहा जाता है।

नर्तक—गीताङ्गपटप्रावरणेन नृत्यवृत्त्याजीवी नर्तको नाटकाभिनयरङ्गनर्तको वा। (नीतिवा. १४–१२३, पृ. १७३)।

गीत के योग्य शरीर की वेषभूषा के साथ जो नृत्यवृत्ति से आजीविका चलाता है, अथवा नाटक की रंगभूमि में नृत्य करता है उसे नर्तक कहते हैं।

नलिन—१. ××× तं पि गुणिदव्वं। चउसीदिलक्खवासे णलिणं णामं वियाणाहि ॥ (ति. प. ४–२९७)। २. पूर्वं चतुरशीतिघ्नं पर्वाङ्गं परिभाष्यते। पूर्वाङ्गताडितं तत्तु पर्वाङ्गं पर्वमिष्यते ॥ गुणाकारविधिः सोऽयं योजनीयो यथाक्रमम्। उत्तरेष्वपि संख्यानविकल्पेषु निराकुलम् ॥ ××× नलिनाङ्गमतोऽपि च ॥ नलिनं कमलाङ्गं च ×××। (म. पु. ३, ३१९–२४)। ३. चतुरशीतिनलिनाङ्गशतसहस्राणि एकं नलिनम्। (जीवाजी. मलय. वृ. ३, २, १७८; ज्योतिष्क. मलय. वृ. ६६)।

१ चौरासी लाख वर्षों से गुणित नलिनांग प्रमाण एक नलिन होता है। ३ चौरासी लाख नलिनांगों का एक नलिन होता है।

नलिनाङ्ग—१. पउमं चउसीदिहदं णलिणंगं होदि ×××॥ (ति. प. ४–२९७)। २. तत्तो महालयाणं चुलसीइ चेव सयसहस्साणि। णलिणंगं नाम भवे ××× ॥ (ज्योतिष्क ६५)। ३. चतुरशीतिः पद्मशतसहस्राणि एकं नलिनाङ्गम्। (जीवाजी. मलय. वृ. ३, २, १७८)। ४. महालतारूपसंख्यास्थानादूर्ध्वं महालतानां चतुरशीतिशतसहस्राणि नलिनाङ्गं नाम संख्यास्थानं भवति। (ज्योतिष्क. मलय. वृ. ६५)।

१ चौरासी से गुणित पद्म प्रमाण एक नलिनांग होता है। २ चौरासी लाख महालता प्रमाण एक नलिनाङ्ग होता है।

नवमी प्रतिमा—नवमासान् प्रेष्यैरप्यारम्भं न कारयतीति नवमी। (योगशा. स्वो. विव. ३-१४८, पृ. २७२)।

नौवीं प्रतिमा का धारक वह श्रावक होता है जो स्वयं तो आरम्भ करता ही नहीं, पर साथ ही सेवकों से भी नौ महीने आरम्भ नहीं कराता है।

नागकुमार—१. शिरोमुखेष्वधिकप्रतिरूपाः कृष्णाः श्यामा मृदुललितगतयः शिरस्सु फणिचिह्ना नागकुमाराः। (त. भा. ४–११)। २. फणोपलक्षिताः नागाः। (धव. पु. १३, पृ. ३९१)। ३. नागकुमारा भूषणनियुक्तनागस्फटारूपचिह्नधराः। (जीवा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी. मलय. वृ. ३, १, ११७)। ४. नागकुमाराः शिरोमुखेष्वधिकरूपशोभाः श्वेतरुचयो ललितगतयः। (संग्रहणी दे. वृ. १७)। ५. नगेषु पर्वतेषु चन्दनादिषु वृक्षेषु वा भवा नागाः ××× ते च ते कुमारा नागकुमाराः। (त. वृ. श्रुत. ४–१०)।

१ जो देव शिर व मुख में अधिक सुन्दर, वर्ण से कृष्ण, श्याम, कोमल व शोभायमान गति से सहित और शिर में सर्प के चिह्न से युक्त होते हैं वे नागकुमार कहलाते हैं। ५ जो नगों (पर्वतों) या चन्दनादि वृक्षों पर होते हैं उन्हें नागकुमार कहा जाता है।

नाग्न्यपरीषहजय — देखो अचेलपरीषहजय। १. जातरूपवन्निष्कलंकजातरूपधारणमशक्यप्रार्थनीयं याचन रक्षण-हिंसनादिदोषविनिर्मुक्तं निष्परिग्रहत्वान्निर्वाणप्राप्ति प्रत्येकं साधनमनन्यबाधनं नाग्न्यं बिभ्रतो मनोविक्रियाविप्लुतिविरहात् स्त्रीरूपाण्यत्यन्ताशुचिकुणपरूपेण भावयतो रात्रिंदिवं ब्रह्मचर्यमखण्डमातिष्ठमानस्याचेलव्रतधारणमनवद्यमवगन्तव्यम्। (स. सि. ९–९)। २. जातरूपधारणं नाग्न्यम्। गुप्ति-समित्यविरोधिपरिग्रहनिवृत्ति-परिपूर्णब्रह्मचर्यमप्रार्थिकमोक्षसाधनचारित्रानुष्ठानं यथाजातरूपम् असंस्कृतमविकारं मिथ्यादर्शनाविष्टविद्विष्टं परममांगल्यं नाग्न्यमभ्युपगतस्य स्त्रीरूपाणि नित्याशुचि-बीभत्स-कुणपभावेन पश्यतो वैराग्यभावनावरुद्धमनोविक्रियस्याऽसंभावितमनुष्यत्वस्य नाग्न्यदोषासंस्पर्शनात् परिषहजयसिद्धिरिति जातरूपधारणमुत्तमं श्रेयःप्राप्तिकारणमित्युच्यते। (त. वा. ९, ९, १०)। ३. वासोऽशुभं न वा मेऽस्ति नेच्छेत् तत्साध्वसाधु वा। लाभालाभविचित्रत्वं जानन्नाग्न्येन विप्लुतः॥ (आव. नि. हरि. पृ. ९१८, पृ. ४०३)। ४. जातरूपधारणं नाग्न्यसहनम्। (त. श्लो. ९–९; चा. सा. पृ. ५१)। ५. नाग्न्यपरीषहस्तु न निरुपकरणतैव दिगम्बरभोतादिवत्। किं तर्हि? प्रवचनोक्तविधानेन नाग्न्यम्। प्रवचने तु ××× (त. भा. सिद्ध. वृ. ९-९)। ७. भूषावेषविकारशस्त्रनिचयत्यागात् प्रशस्ताकृतेर्बालस्येव मनोजजातविकृतिश्चित्तस्य लज्जेति ताम्। हित्वा मातृसमानमेव सकलं कान्ताजनं पश्यतः पूज्यो नाग्न्यपरीषहस्य विजयस्तत्त्वज्ञतापोदयः॥ (आचा. सा. ७-२०)। ६. निर्ग्रन्थनिर्भूषणविश्वपूज्यनाग्न्यव्रतो दोषयितुं प्रवृत्ते। चित्तं निमित्ते प्रबलेऽपि यो न स्पृश्येत दोषैर्जितनाग्न्यरुक् सः॥ (अन. ध. ६–९४)। ८. नाग्न्यं नाम जात्यसुवर्णवदकलङ्कम्, परं विषयिभिरशक्तकैः शेफविकारवद्भिश्च धर्तुं न शक्यते। तद्धरतां परप्रार्थनं न भवति। नाग्न्यं हि नाम याचनावन-जन्तुघातादिदोषरहितमपरिग्रहत्वात् मुक्तिप्राणाद्वितीयकारणं परेषां बाधाया अकारकम्। यो मुनिस्तन्नाग्न्यं बिभर्ति तस्य मनसि विकृतिर्नोत्पद्यते, स्त्रीरूपमतीवापवित्रकं मृतकरूपसमानमहर्निशं भावयति। ब्रह्मचर्यमक्षुण्णं तस्य भवति। एवमचेलव्रतधारणं नाग्न्यं निष्पापं ज्ञातव्यम्। (त. वृत्ति श्रुत. ९–९)।

१ नग्नता (निर्वस्त्रता) का धारण करना उत्पन्न हुए बालक की नग्नता के समान निर्दोष, अशक्यप्रार्थनीय—वस्त्रादि की याचना से रहित; याचना, रक्षण और हिंसा आदि दोषों से रहित; परिग्रह से रहित होने के कारण निर्वाणप्राप्ति का प्रमुख हेतु तथा अन्य बाधाओं से रहित है। इस नग्नता का धारक साधु मानसिक विकार से रहित होता हुआ स्त्रियों के रूपों को निर्जीव शरीर (शव) के समान अपवित्र देखता है। इस प्रकार से वह रात-दिन अखण्ड ब्रह्मचर्य का परिपालन करता हुआ निर्दोष अचेलव्रत को धारण करता है—नाग्न्यपरीषह को जीतता है।

नान्तरीयक—न अन्तरा भवतीति नान्तरीयकम्, अविनाभावीत्यर्थः। (सिद्धिवि. पृ. ४३, टि. १०)। जो जिसके विना नहीं होता है वह उसका नान्तरीयक कहलाता है। जैसे—अग्नि के विना न होने वाला धुआं उसका नान्तरीयक या अविनाभावी है।

नाभ्यधोनिर्गम—१. नाभ्यधो निर्गमनं नाभेरधो मस्तकं कृत्वा यदि निर्गमनं भवेत्। (मूला. वृ. ६–७७)। २. ××× निर्गमो नाभ्यधः शिरः॥ नाभ्यधोनिर्गमः ×××। (अन. ध. ५–४७, ४८)।

१ नाभि के नीचे मस्तक को करके यदि कहीं निकलना पड़ता है तो यह नाभ्यधोनिर्गम नाम का भोजन का अन्तराय माना जाता है।

नाम—१. नमयत्यात्मानं नम्यतेऽनेनेति वा नाम। (स. सि. ८–४)। २. गति-जात्यादीन् नमयति—अभिमुखीकरोति संसारिणः प्रापयतीति नामोच्यते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(त. भा. हरि. वृ. ८–१२)। ३. तथा गत्यादिशुभाशुभनमनान्नामयतीति नाम। (श्रा. प्र. टी. ११)। ४. तांस्तानात्मभावान् नामयतीति नाम कर्मपुद्गलद्रव्यम्। (अनुयो. हरि. वृ. पृ. ६३)। ५. नाना मिनोति निर्वर्त्तयतीति नाम। जे पोग्गला शरीर-संठाण-संघडण-वण्ण-गंधादिकज्जकारया जीवणिविट्ठा ते णामसण्णिदा होंति त्ति उत्तं होदि। (धव. पु. ६, पृ. १३); णाणा मिणोदि त्ति णामं। (धव. पु. १३, पृ. २०९)। ६. नम्यतेऽनेन वाऽऽत्मानं नमयत्यपि नाम तत्॥ (ह. पु. ५८, २१७)। ७. नामयतीति नाम प्रह्वयत्यात्मानं गत्याद्यभिमुखमिति, नम्यते वा प्रह्वीक्रियतेऽनेनेति नाम। (त. भा. सिद्ध. वृ. ८–५); नमयति प्रापयति नारकादिभावान्तराणि जीवमिति नाम। अथवा जीवप्रदेशसम्बन्धिपुद्गलद्रव्यविपाकसामर्थ्याद् यथार्थसंज्ञा। नमयति प्रह्वयतीति नाम, यथा शुक्लादिगुणोपेतद्रव्येषु चित्रपटादिव्यपदेशप्रवृत्तिर्नियतसंज्ञाहेतुरिति। (त. भा. सिद्ध. वृ. ८–१२)। ८. ××× छट्ठं कम्मं तु भण्णए नामं। तं चित्तगरसमाणं जह होइ तहा निसामेइ॥ जह चित्तयरो निउणो अणेगरूवाइं कुणइ रूवाइं। सोहणमसोहणाइं चोक्खाचोक्खेहिं वण्णेहिं॥ तह नामंपि य कम्मं अणेगरूवाइं कुणइ जीवस्स। सोहणमसोहणाइं इट्ठाणिट्ठाइं लोयस्स॥ गइयाइएसु जीवं नामइ भेएसु जं तओ नामं॥ (कर्मवि. ग. ६६–६९)। ९. नामयत्यधम-मध्योत्तमासु गतिषु प्राणिनं प्रह्वीकरोतीति नाम। (पंचसं. चं. स्वो. ३-१, पृ. ३३)। १०. तथा नामयति परिणमयत्यात्मानं तैस्तैर्गत्यादिभिः पर्यायैरिति नाम। (कर्मस्त. गो. वृ. १०, पृ. १७)। ११. तथा नामयति गत्यादिपर्यायानुभवनं प्रति प्रवणयति जीवमिति नाम। (प्रज्ञाप. मलय. वृ. २३–२८८, पृ. ४५४; धर्मसं. मलय. वृ. ६०८; प्रव. सारो. वृ. १२५०)। १२. गति-जात्यादिवैचित्र्यकारि चित्रकरोपमम्। नामकर्मविपाकोऽस्य शरीरेषु शरीरिणाम्। (त्रि. श. पु. च. २, ३, ४७३)।

१ जो जीव को नमाता है—गति आदि के प्रति नम्रीभूत करता है—उसे नामकर्म कहा जाता है। २ जो संसारी प्राणियों को गति-जाति आदि के अभिमुख करता है—उन्हें प्राप्त कराता है—वह नामकर्म कहलाता है।

नामकरण—१. तत्र च नामकरणं करणमिति नामैव, नाम्नो वा करणं नामकरणम्—प्रियङ्करशुभङ्कराद्यभिधानधानम्। यदि वा नामतःकरणं नामकरणं यत् पूज्यनामापेक्षया पूजादिविधानम्। (उत्तरा. नि. शा. वृ. १८३, पृ. १९४); इह नामकरणं करणमित्यभिधानमात्रम्। (उत्तरा. नि. शा. वृ. १८४)। २. नामकरणमिहाभिधानमात्रं 'करणम्' इत्यक्षरत्रयात्मकं परिगृह्यते, ××× यद्वा तदर्थविकले वस्तुनि सङ्केतमात्रतः करणमिति नाम क्रियते तन्नामकरणम्। (आव. भा. मलय. वृ. १५३, पृ. ५५८)।

१ 'करण' इस नाम मात्र को नामकरण कहा जाता है। अथवा प्रियंकर व शुभंकर आदि नामों के करने को नामकरण जानना चाहिए। पूज्य नाम की अपेक्षा पूजादि के विधान को भी नामकरण कहा जाता है।

नामकायोत्सर्ग—खर-परुषादिसावद्यनामकरणद्वारेणागतातीचारशोधनाय कायोत्सर्गो नाममात्रकायोत्सर्गो वा नामकायोत्सर्गः। (मूला. वृ. ७–१५१)। खर व परुष आदि सावद्य नाम करने के द्वारा लगे हुए दोषों के शोधन के लिए जो कायोत्सर्ग किया जाता है उसे अथवा नाममात्र कायोत्सर्ग को नामकायोत्सर्ग कहा जाता है।

नामकृति—जा सा णामकदी णाम सा जीवस्स वा अजीवस्स वा जीवाणं वा अजीवाणं वा जीवस्स च अजीवस्स च जीवस्स च अजीवाणं च जीवाणं च अजीवस्स च जीवाणं च अजीवाणं च जस्स णामं कीरदि कदित्ति सा णामकदी णाम। (ष. खं. ४, १, ५१—पु. ९, पृ. २४६)।

एक जीव, एक अजीव, बहुत जीव, बहुत अजीव, एक जीव एक अजीव, एक जीव बहुत अजीव, बहुत जीव एक अजीव तथा बहुत जीव बहुत अजीव; इन आठ में जिसका 'कृति' यह नाम किया जाता है उस सबको नामकृति कहा जाता है।

नामक्षेत्र—जीवाजीवुभयकारणनिरवेक्खो अप्पाणम्हि पयट्टो खेत्तसद्दो णामखेत्तं। (धव. पु. ४, पृ. ३)।

जीव, अजीव व उभय कारणों से निरपेक्ष अपने

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आप में प्रवृत्त 'क्षेत्र' शब्द को नामक्षेत्र कहा जाता है।

नामचतुर्विंशति—तत्र नामचतुर्विंशतिः जीवस्य अजीवस्य वा यस्य चतुर्विंशतिरिति नाम क्रियते, चतुर्विंशत्यक्षरावली वा। (आव. नि. मलय. वृ. १०६८)।

जिस किसी चेतन या अचेतन पदार्थ का 'चतुर्विंशति' ऐसा नाम किया जाता है उसे अथवा 'चतुर्विंशति' इन अक्षरों की पंक्ति को नामचतुर्विंशति कहते हैं।

नामच्छेदना—सचित्त-अचित्तदव्वाणि अण्णेहिंतो पुध काऊण सण्णा जाणावेदि त्ति णामच्छेदणा। (धव. पु. १४, पृ. ४३५)।

सचित्त अचित्त द्रव्यों को दूसरों से अलग करके चूंकि संज्ञा जतलाती है, अतः उसे नामच्छेदना कहते हैं।

नामजिन—१. णामजिणा जिणणामा। (चैत्यवन्दनक भा. ५१)। २. जिणसद्दो णामजिणो। (धव. पु. ९, पृ. ६)।

१ जिन के नामों को नामजिन कहते हैं। २ 'जिन' शब्द को नामजिन कहा जाता है।

नामजीव—१. जीवनगुणमनपेक्ष्य यस्य कस्यचिन्नाम क्रियमाणं नामजीवः। (स. सि. १–५)। २. नाम संज्ञाकर्म इत्यनर्थान्तरम्। चेतनावतोऽचेतनस्य वा द्रव्यस्य जीव इति नाम क्रियते स नामजीवः। (त. भा. १–५)। ३. नाम्नैव जीवः, जीवशब्द इत्यर्थः। ××× तत्र यो जीव इति शब्दः प्रवर्तते स नामजीवः। ××× जीव इत्ययं ध्वनिः तच्चेद्वाच्योऽर्थो नामतया नियुज्यते स नामजीव इति। 'सः' इत्यनेन तत्र चेतनावत्यचेतने वा यदृच्छया यो जीवशब्दो नियुक्तस्तं व्यपदिशति स शब्दो नामजीव इत्युच्यते। न तद्वस्तूपाधिक इति। (त. भा. हरि. वृ. १–५)। ४. नामैव जीवो नामजीवः योऽयं जीव इति ध्वनिः, अयं च यस्य कस्यचिद् वस्तुनो वाचकः स नामजीवोऽभिधीयते। ××× स इत्यनेन चेतनावत्यचेतने वा यदृच्छया यो जीवशब्दो नियुक्तस्तं व्यपदिशति स शब्दो नामजीव इति। एतदुक्तं भवति— स एव शब्दो जीव इत्युच्यते तद्वस्तूपाधिक इति, अर्थाभिधान-प्रत्ययास्तुल्यनामधेया इति न्यायात्। (त. भा. सिद्ध. वृ. १–५, पृ. ४५–४६)। ५. जीवनगुणं विनापि यस्य कस्यचिज्जीवसंज्ञा विधीयते स नामजीवः। (त. वृत्ति श्रुत. १–५)।

१ जीवन गुण की अपेक्षा न करके जिस किसी पदार्थ का 'जीव' ऐसा नाम रखने को नामजीव कहते हैं। २ नाम और संज्ञाकर्म ये समानार्थक शब्द हैं। चेतन अथवा अचेतन द्रव्य का 'जीव' ऐसा जो नाम किया जाता है उसे नामजीव कहा जाता है।

नामदिक्—तत्र सचित्तादेर्द्रव्यस्य दिगित्यभिधानं नामदिक्। (आचारा. नि. शी. वृ. ४०, पृ. १२)।

सचित्त या अचित्त द्रव्य का 'दिक्' ऐसा नाम रखने को नामदिक् कहते हैं।

नामद्रव्य—१. यस्य जीवस्याजीवस्य वा नाम क्रियते द्रव्यमिति तन्नामद्रव्यम्। (त. भा. १–५)। २. नामद्रव्यं यस्य चेतनावतोऽचेतनस्य वा द्रव्यमिति नाम क्रियते। (त. भा. सिद्ध. वृ. १–५)।

१ जिस जीव या अजीव का 'द्रव्य' ऐसा नाम किया जाता है उसे नामद्रव्य कहते हैं।

नामधर्म—जीवस्साजीवस्स व अन्नत्थविवज्जियस्स जस्सेह। धम्मो णामं कीरइ स नामधम्मो तदक्खा वा॥ (धर्मसं. हरि. २८)।

धर्म के अन्वर्थ से रहित जिस किसी जीव या अजीव पदार्थ का 'धर्म' ऐसा नाम किया जाता है उसे नामधर्म कहते हैं। अथवा धर्म की संज्ञा (नाम) को ही नामधर्म जानना चाहिए।

नामनमस्कार—नामनमस्कारो यस्य कस्यचिन्नमस्कार इति कृता संज्ञा। (भ. आ. विजयो. ७५३)।

जिस किसी का 'नमस्कार' ऐसा जो नाम किया जाता है वह नामनमस्कार कहलाता है।

नामनिक्षेप—१. अतद्गुणे वस्तुनि संव्यवहारार्थं पुरुषाकारान्नियुज्यमानं संज्ञाकर्म नाम। (स. सि. १–५)। २. नाम संज्ञाकर्म इत्यनर्थान्तरम्। (त. भा. १–५)। ३. पज्जायाणभिधेयं ठिअमण्णत्थे तयत्थनिरवेक्खं। जाइच्छिअं च नामं जावदव्वं च पाएणं॥ (विशेषा. २५)। ४. यद्वस्तुनोऽभिधानं जाति-रूपादिपर्यायप्रभेदानुसरणस्वभावं तन्नाम, नमनं प्रह्वित्वमिति, वस्तु नमनात्—प्रतिवस्तु नमनात् भवनादित्यर्थः। (उत्तरा. चू. पृ. १०)। ५. नीयते गम्यतेऽनेनार्थः, नमति वाऽर्थमभिमुखी-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

करोतीति नाम। ××× निमित्तान्तरानपेक्षं संज्ञाकर्म नाम। निमित्तादन्यन्निमित्तं निमित्तान्तरम्, तदनपेक्ष्य क्रियमाणा संज्ञा नाम इत्युच्यते। यथा परमैश्वर्यलक्षणेन्दनक्रियानिमित्तान्तरानपेक्षं कस्यचित् 'इन्द्र' इति नाम। (त. वा. १, ५, १)। ६. तत्र निमित्तान्तरानपेक्षं संज्ञाकर्म नाम। (लघीय. स्वो. वि. ७४)। ७. यस्य कस्यचित् अनिर्दिष्टविशेषस्य निमित्तान्तरानपेक्षं संज्ञाकर्म नाम। (सिद्धिवि. स्वो. वि. १२-२)। ८. यद्वस्तुनोऽभिधानं स्थितमन्यार्थे तदर्थनिरपेक्षम्। पर्यायानभिधेयं (च) नाम यादृच्छिकं च तथा॥ (आव. हरि. वृ. पृ. ४ उद्.; अनुयो. हरि. वृ. पृ. ६ उद्.; आव. मलय. वृ. पृ. ५ उद्.)। ९. जातावेव तु यत्संज्ञाकर्म तन्नाम मन्यते। तस्यामपरजात्यादिनिमित्तानामभावतः॥ गुणे कर्मणि वा नाम संज्ञाकर्म तथेष्यते। गुणकर्मान्तराभावाज्जातेरप्यनपेक्षणात्॥ (त. श्लो. १, ५, ४-५, पृ. ९९); तेनेच्छामात्रतंत्रं यत्संज्ञाकर्म तदिष्यते। नामाचार्यैर्न जात्यादिनिमित्तापन्नविग्रहम्॥ सिद्धे हि जात्यादिनिमित्तान्तरे विवक्षात्मनः शब्दस्य निमित्तात् संव्यवहारिणां निमित्तान्तरानपेक्षं संज्ञाकर्म नाम इत्याहुराचार्याः। (त. श्लो. १, ५, ५३, पृ. १११)। १०. संज्ञायाः क्रिया संज्ञाक्रिया संज्ञाकर्म, नामकरणम् इत्यर्थः, अनेन ध्वनिना वस्त्विदं प्रतिपाद्यत इति यावत्। (त. भा. सिद्ध. वृ. १-५)। ११. या निमित्तान्तरं किञ्चिदनपेक्ष्य विधीयते। द्रव्यस्य कस्यचित् संज्ञा तन्नाम परिकीर्तितम्॥ (त. सा. १-१०)। १२. तदनपेक्षं (निमित्तान्तरानपेक्षं) यत् संज्ञाकर्म संज्ञाकरणमिच्छावशात्तन्नाम। (न्यायकु. ७४, पृ. ८७४)। १३. अतद्गुणेषु भावेषु व्यवहारप्रसिद्धये। यत्संज्ञाकर्म तन्नाम नरेच्छावशवर्तनात्॥ (उपासका. ८२५)। १४. यस्य कस्यचिद् वस्तुनो व्यवहारार्थमभिधानं निमित्तसव्यपेक्षं अनपेक्षं वा यत् संकेत्यते तन्नाम। (सन्मति. अभय. वृ. ६, पृ. ३७९)। १५. जीवाजीवोभयेष्टार्थजातिद्रव्य-गुणक्रिया। नामोत्पत्तिनिमित्तानपेक्षं यन्नाम तन्मतम्॥ (आचा. सा. ९-५)। १६. अतद्गुणे वस्तुनि संव्यवहारप्रवर्तननिमित्तं पुरुषाकारात् हटान्नियुज्यमानं संज्ञाकर्म नाम। (त. वृत्ति श्रुत. १, ५)। १७. अतद्गुणे वस्तुनि संज्ञाकरणं नाम। (परमा. त. १-९)। १८. वस्तुन्यतद्गुणे खलु संज्ञाकरणं जिनो यथा नाम। (पंचाध्या. १, ७४२)।

परिग्रहानन्दी रौद्रध्यान—१. सद्दाइविसयसाहण-धणसारक्खणपरायणमणिट्ठं। सव्वाभिसंकणपरोव-घायकलुसाउलं चित्तं॥ (ध्यानश. २२)। २. वह्वा-रम्भ-परिग्रहेषु नियतं रक्षार्थमभ्युद्यते, यत्संकल्पपर-म्परां वितनुते प्राणीह रौद्राशयः। यच्चालम्ब्य महत्त्व-मुन्नतमना राजेत्यहं मन्यते, तत्तुर्यं प्रवदन्ति निर्मल-धियो रौद्रं भवाशंसिनाम्॥ (ज्ञाना. २६–२९, पृ. २६७)। ३. षड्विधे जीवमारणारम्भे कृताभिप्राय-श्चतुर्थं रौद्रम्। (मूला. वृ. ५–१९९)। ४. ××× स्वं संरक्ष्य विपक्षदूरमुदिता तोषोग्रता या तु सं—रक्षानन्दमपि स्ववस्तुनिखिलं निर्वैरि कुर्वे इति॥ (आचा. सा. १०–२१)।

१ शब्दादि विषयों के साधनभूत धन के संरक्षण में तत्पर रहने से जो कलुषित चित्त होता है वह विषयसंरक्षणानुबन्धी रौद्रध्यान कहलाता है। इसे परिग्रहानन्दी रौद्रध्यान भी कहा जाता है। इस ध्यान में 'कौन कब क्या करेगा' इस प्रकार की आशंका सभी के प्रति बनी रहती है, जिससे वह सभी के घात में व्याकुलचित्त रहता है। ३ छह प्रकार के जीवघातविषयक आरम्भ के अभिप्राय को चौथा रौद्रध्यान कहते हैं।

परिचित—यत्र यत्र प्रश्नः क्रियते तत्र तत्र आशु-तमवृत्तिः परिचितम्, क्रमेणोत्क्रमेणानुभयेन च भा-वागमाम्भोधौ मत्स्यवच्चटुलतमवृत्तिर्जीवो भावागम-श्च परिचितम्। (धव. पु. ९, पृ. २५२)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जिस जिस विषय में प्रश्न किया जाता है उस उस विषय से सम्बद्ध भावागमरूप समुद्र में मछली के समान जिसकी चंचलतापूर्ण प्रवृत्ति शीघ्रतापूर्वक क्रम से, अक्रम से या अनुभयरूप से हुआ करती है उस जीव को और भावागम को भी परिचित कहा जाता है। यह आगम के नौ अर्थाधिकारों में तीसरा है।

परिचितसूत्रता—परिचितसूत्रता उत्क्रम-क्रमवाचनादिभिः स्थिरसूत्रता। (उत्तरा. नि. शा. वृ. ५८, पृ. ३९)।

अक्रम या क्रम से प्रवृत्त वाचना आदि से सूत्र में स्थिरता का रहना, इसका नाम स्थिरसूत्रता है। यह चार प्रकार की श्रुत-सम्पत् में से एक है।

परिजित—देखो परिचित। अइतुरियाए गईए पडिक्खलणेण विणा आइद्धकुलालचक्कं व सगविसए परिब्भमणक्खमो कदिअणियोगो परिजिदं णाम। (धव. पु. ९, पृ. २६८)।

अतिशय शीघ्रगति से स्खलन के विना जो कुम्हार के द्वारा प्रेरित चाक के समान अपने विषय में शीघ्र परिभ्रमण में समर्थ कृतिअनुयोग (विवक्षित अनुयोग) है उसका नाम परिजित है।

परिज्ञा—परिः समन्ताज्ज्ञानं पापपरित्यागेन परिज्ञासामायिकमिति। (आव. हरि. वृ. पृ. ८३४)।

परि अर्थात् सब ओर से पाप के परित्याग स्वरूप से जो ज्ञान होता है उसका नाम परिज्ञासामायिक है।

परिज्ञातकर्म मुनि—जस्सेते लोगंसि कम्म-समारम्भा परिण्णाया भवंति से हु मुणी परिन्नायकम्मेत्ति वेमि। (आचारा. सू. १, १, १, १३, पृ. २५)।

जिस मुमुक्षु मुनि के कर्मसमारम्भ—क्रियाविशेष अथवा ज्ञानावरणादि आठ प्रकार के कर्म के उपादानहेतु—बन्ध के हेतुरूप से ज्ञात है वह परिज्ञातकर्मा मुनि कहलाता है। मुनि का निरुक्तार्थ है जगत् की त्रैकालिक अवस्था का जानने वाला।

परिणाम—१. तद्भावः परिणामः। (त. सू. ५, ४१)। २. द्रव्यात्मलाभमात्रहेतुकः परिणामः। (स. सि. २–१); धर्मादीनि द्रव्याणि येनात्मना भवन्ति स तद्भावस्तत्त्वं परिणाम इति आख्यायते। (स. सि. ५–४२)। ३. धर्मादीनां द्रव्याणां यथोक्तानां च गुणानां स्वभावः स्वतत्त्वं परिणामः। (त. भा. ५–४१)। ४. द्रव्यात्मलाभमात्रहेतुकः परिणामः। यस्य भावस्य द्रव्यात्मलाभमात्रमेव हेतुर्भवति नान्यन्निमित्तमस्ति स परिणाम इति परिभाष्यते। (त. वा. २, १, ५); द्रव्यस्य स्वजात्यपरित्यागेन प्रयोगविस्रसालक्षणो विकारः परिणामः। द्रव्यस्य चेतनस्येतरस्य वा द्रव्यार्थिकनयस्य अविवक्षातो न्यग्भूतां स्वां द्रव्यजातिमजहतः पर्यायार्थिकनयार्पणात् प्राधान्यं बिभ्रता केनचित् पर्यायेण प्रादुर्भावः पूर्वपर्यायनिवृत्तिपूर्वको विकारः प्रयोग-विस्रसालक्षणः परिणाम इति प्रतिपत्तव्यः। (त. वा. ५, २२, १०); धर्मादीनां येनात्मना भवनं स तद्भावः परिणामः। धर्मादीनि द्रव्याणि येनात्मना भवन्ति स तद्भावः, तत्त्वं परिणाम इत्याख्यायते। (त. वा. ५, ४२, १)। ५. परिणामः अध्यवसायविशेषः। (आव. नि. हरि. वृ. ८२३); परिः समन्तान्नमनं परिणामः सुदीर्घकालपूर्वापरार्थविलोकनादिजन्य आत्मधर्म इत्यर्थः। (आव. नि. हरि. वृ. ९३८)। ६. परिणमनं परिणामः अपरित्यक्तपूर्वावस्थस्यैव तद्भावगमनमिति भावार्थः। उक्तं च—परिणामो ह्यर्थान्तरगमनं न तु सर्वथा व्यवस्थानम्। न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः॥ (अनुयो. हरि. वृ. उद्. पृ. ६४)। ७. को परिणामो? मिच्छत्तासंजम-कसायादी। (धव. पु. १५, पृ. १७२)। ८. द्रव्यस्य स्वजात्यपरित्यागेन परिस्पन्देतरप्रयोगजपर्यायस्वभावः परिणामः। तद्यथा—अङ्कुरावस्थस्य वनस्पतेर्मूल-काण्ड-त्वक्-पत्र-स्कन्ध-शाखा-विटप-पुष्प-फलसद्भावलक्षणः परिणामः। (त. भा. सिद्ध. वृ. ५–२२); अथवा कैश्चित् परिणामलक्षणमुक्तम्—अवस्थितस्य द्रव्यस्य धर्मान्तरनिवृत्तिर्धर्मान्तरप्रादुर्भावश्च परिणामः। (त. भा. सिद्ध. वृ. ५–४१)। ९. स्वजातेरविरोधेन विकारो यो हि वस्तुनः। परिणामः स निर्दिष्टोऽपरिस्पन्दात्मको जिनैः॥ (त. सा. ३, ४६)। १०. द्रव्यात्मलाभहेतुकः परिणामः। (पंचा. का. अमृत. वृ. ५६)। ११. परीति सर्वप्रकारं नमनं जीवानामजीवानां च जीवत्वादिस्वरूपानुभवनं प्रति प्रह्वीभवनं परिणामः। (उत्तरा. नि. शा. वृ. ४८, पृ. ३३; षडशी. दे. स्वो. वृ. ६४)। १२. परिणामः अवस्थातोऽवस्थान्तरगमनम्। (स्थाना. अभय. वृ. ४, १, २६५)। १३. परिणामः-अवस्थातोऽवस्थान्तरगमनानि। (समवा. अभय. वृ. १४०)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१४. परिणामः कारणस्यान्यथाभावः वाग्गोचरातीतः। (आ. मी. वसु. वृ. ७१)। १५. परि समन्तान्नमनं यथावस्थितवस्त्वनुसारितया गमनं परिणामः। (आव. नि. मलय. वृ. ९३८, पृ. ५१६); परिणमनं परिणामः—कथञ्चित् पुर्वरूपापरित्यागेनोत्तररूपापत्तिः। उक्तं च—नार्थान्तरगमो यस्मात् सर्वथैव न चागमः। परिणामः प्रमासिद्धः इष्टश्च खलु पण्डितैः॥ (आव. नि. मलय. वृ. १०४०, पृ. ५७६); द्रव्यपरिणतिस्वभावः सर्वः परिणामः। (आव. भा. मलय. वृ. १८९, पृ. ५७८)। १६. परिणमनं परिणामः, कथञ्चिदवस्थितस्य वस्तुनः पूर्वावस्थापरित्यागेनोत्तरावस्थागमनम्। (पञ्चसं. मलय. वृ. २–३, पृ. ४५)। १७. परिणामः स्वकार्यपर्यालोचनम्। (अन. ध. स्वो. टी. ८–९८; भ. आ. मूला. ६५)। १८. परिणामो द्रव्यस्य स्वजात्यपरित्यागेन परिस्पन्देतरप्रयोगजपर्यायस्वभावः परिणामः। (षड्द. स. वृ. ४९, पृ. १६४)। १९. द्रव्याणां या परिणतिः प्रयोग-विस्रसादिजा। नवत्व-जीर्णताद्या च परिणामः स कीर्तितः॥ (लोकप्र. २८–८)। २०. द्रव्यस्य स्वभावान्तरनिवृत्तिः स्वभावान्तरोत्पत्तिश्च अपरिस्पन्दात्मकः पर्यायः परिणामः। (त. वृत्ति श्रुत. ५–२२)। २१. परिणामस्तु सत एव प्रदेशपरिणामादिनाऽन्यथाभावः। (अष्टस. यशो. वृ. पृ. १५७)।

२ जिसका कारण द्रव्य का आत्मलाभ मात्र है उसे परिणाम कहते हैं। धर्म आदि द्रव्य जिस स्वरूप से हैं उसका नाम तद्भाव है, यही तद्भाव परिणाम का लक्षण है। ३ धर्म आदि द्रव्यों और गुणों का जो स्वभाव या निज तत्त्व है उसे परिणाम कहा जाता है। ५ अध्यवसायविशेष का नाम परिणाम है। १७ अपने कार्य का जो पर्यालोचन किया जाता है उसे परिणाम जानना चाहिए (यह भक्तप्रत्याख्यान मरण को स्वीकार करनेवाले क्षपक के अर्हादि लिंगों में से एक है)।

परिणामक साधु—जो दव्व-खेत्तकय-काल-भावओ जं जहा जिणक्खायं। तं तह सद्दहमाणं जाणसु परिणामयं साधुं॥ (बृहत्क. ७९३)।

द्रव्य, क्षेत्र, काल और भाव की अपेक्षा जिनेन्द्र देव के द्वारा साधु के लिये जो कल्प्य-अकल्प्य (योग्य-अयोग्य) का कथन किया गया है उसका या उसी प्रकार से—उत्सर्ग-अपवाद के अनुसार—जो श्रद्धान करता है उसे परिणामक साधु जानना चाहिए।

परिणामतः आत्त पुद्गल—मिच्छत्तादिपरिणामेहि जे अप्पणो कदा ते परिणामदो अत्ता पोग्गला। (धव. पु. १६, पृ. ५१५)।

मिथ्यात्वादि परिणामों के द्वारा जो पुद्गल अपने किये गये हैं—जिन्हें ग्रहण किया गया है—वे परिणामतः आत्त पुद्गल कहलाते हैं।

परिणामयोगस्थान—१. पज्जत्तपढमसमयप्पहुडि उवरि सव्वत्थ परिणामजोगो चेव। (धव. पु. १०, पृ. ४२१)। २. परिणामजोगठाणा सरीरपज्जत्तगा दु चरिमो त्ति। (गो. क. २२०)।

१ पर्याप्त होने के प्रथम समय से लेकर आगे सर्वत्र परिणामयोग ही हुआ करता है।

परिणामविशुद्धप्रत्याख्यान—१. रागेण व दोसेण व सगपरिणामेण दूसिदं जं तु। तं पुण पच्चक्खाणं भावविशुद्धं तु णादव्वं॥ (मूला. ७–१४६)। २. रागपरिणामेन द्वेषपरिणामेन च न दूषितं न प्रतिहतं विपरिणामेन यत्प्रत्याख्यानं तत्पुनः प्रत्याख्यानं भावविशुद्धं तु ज्ञातव्यं। सम्यग्दर्शनादियुक्तस्य निःकांक्षस्य वीतरागस्य समभावयुक्तस्याहिंसादिव्रतसहितशुद्धभावस्य प्रत्याख्यानं परिणामशुद्धं भवेदिति। (मूला. वृ. ७–१४६)।

जो प्रत्याख्यान राग और द्वेषरूप चित्तवृत्ति से दूषित न हो उसे भावविशुद्ध या परिणामविशुद्ध प्रत्याख्यान जानना चाहिए।

परिणामानित्यता—तत्र परिणामानित्यता नाम मृत्पिण्डो हि विस्रसा-प्रयोगाभ्यामनुभयमवस्थान्तरं प्रागवस्थाप्रच्युत्या समश्नुते। (त. भा. सिद्ध. वृ. ५–४)।

स्वभाव अथवा प्रयोग के वश मिट्टी का पिण्ड जो प्रत्येक समय में पूर्व पूर्व अवस्था को छोड़कर अन्य अन्य अवस्था को प्राप्त होता है, यही परिणामअनित्यता है।

परितापन—१. संतावजणणं परिदावणं णाम। (धव. पु. १३, पृ. ४६)। २. प्राणिनः सन्तापकरणं परितापनं व्याह्रियते। (भावप्रा. टी. ९९)।

१ प्राणि के लिए सन्ताप पहुंचाने का नाम परितापन है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परितापनिकी—परितापनं परितापः, पीडाकरणमित्यर्थः, तस्मिन् भवा तेन वा निर्वृत्ता, परितापनमेव वा परितापनिकी। (प्रज्ञाप. मलय. वृ. २७९, पृ. ४३५); परितापनिकी नाम खड्गादिघातेन पीडाकरणम्। (प्रज्ञाप. मलय. वृ. २८१, पृ. ४४०)।

खड्ग आदि के घातसे दूसरों के लिए पीडा पहुंचाना, यह परितापनिकी क्रिया कहलाती है।

परित्यजन दोष—देखो छोटितदोष। १. बहुपरिसाडणमुज्झिअ आहारो परिगलंत दिज्जंतं। छंडिय भुंजणमहवा छंडियदोषो हवे णेओ॥ (मूला. ६, ५६)। २. छोडिदं परित्यजनं भुंजानस्यास्थिरपाणिपात्रेणाहारस्य परिशतनं गलनं परित्यजनं यत्क्रियते तत्परित्यजननामाशनदोषः। (मूला. वृ. ६-४३)।

१ बहुत अन्न गिराकर भोजन करना, अथवा देते समय गिरते हुए को छोड़कर भोजन करना; यह परित्यजन नाम का दोष माना जाता है। इसे छोटित और त्यक्त दोष भी कहा जाता है।

परिदेवन—१. संक्लेशपरिणामावलम्बनं गुणस्मरणानुकीर्तनपूर्वकं स्व-परानुग्रहाभिलाषविषयमनुकम्पाप्रचुरं रोदनं परिदेवनम्। (स. सि. ६-११)। २. संक्लेशप्रवणं स्वपरानुग्रहाभिलाषविषयमनुकम्पाप्रायं परिदेवनम्। संक्लेशपरिणामालम्बनं स्व-परानुग्रहविषयम् अनुकम्पाप्रचुरं परिदेवनमिति परिभाष्यते। (त. वा. ६, ११, ६)। ३. परिदेवनं मुहुर्मुहुर्नष्टचित्ततयैव समन्ताद्विलपनम्। (त. भा. हरि. वृ. ६-१३)। ४. संक्लेशश्र[प्र]वणं स्व-परानुग्रहणं हा नाथेत्यनुकम्पाप्रायं परिदेवनम्, तच्चासद्वेद्योदये मोहोदये च सति बोद्धव्यम्। (त. श्लो. ६-११)। ५. संक्लेशप्रवणः स्व-परानुग्रहनाथनमनुकम्पाप्रायं परिदेवनम्। (त. भा. सिद्ध. वृ. ६-१३)। ६. परिदेव्यते परिदेवनं संक्लेशपरिणामविहितावलम्बनं स्व-परोपकारकांक्षालिंगं अनुकम्पाभूयिष्ठं रोदनमित्यर्थः। (त. वृत्ति श्रुत. ६-११)।

१ संक्लेश परिणाम के आश्रय से अपने व दूसरे के अनुग्रह से सम्बद्ध जो गुणों का स्मरण करते हुए रुदन किया जाता है, जिसे देखकर सुनने वाले का चित्त दयार्द्र हो उठता है, उसे परिदेवन कहते हैं।

परिधि—१. समवट्टवासवग्गे दहगुणिदे करणिपरिधओ होदि। (ति. प. १-११७)। २. विक्खंभवग्गदहगुणकरणी वट्टस्स परिट्ठि[र]ओ होदि। (धव. पु. ४, पृ. २०९ उद्.; त्रि. सा. ९६); व्यासं षोडशगुणितं षोडशसहितं त्रि-रूप-रूपैर्भक्तम्। व्यासत्रिगुणितसहितं सूक्ष्मादपि तद् भवेत् सूक्ष्मम्॥ (धव. पु. ४, पृ. ४२ उद्.)। ३. वासो तिगुणो परिही ××× । (त्रि. सा. १७)।

१ समान गोल क्षेत्र के विस्तार का वर्ग करके उसे दस से गुणित करने पर जो प्राप्त हो उसका वर्गमूल निकालने पर परिधि का प्रमाण प्राप्त होता है। २ विस्तार को सोलह से गुणा करके उसमें सोलह जोड़ दे, तत्पश्चात् उसे तीन, एक और एक (११३) अर्थात् एक सौ तेरह से भाजित करके लब्ध में तिगुने विस्तार के जोड़ देने पर सूक्ष्म से भी सूक्ष्म परिधि का प्रमाण प्राप्त होता है।

परिनिर्वाप्यवाचना—परीति सर्वप्रकारं निर्वापयतो निरो निर्दग्धादिषु भृशार्थस्यापि दर्शनात् भृशं गमयतः—पूर्वदत्तालापकादि सर्वात्मना स्वात्मनि परिणमयतः शिष्यस्य सूत्रगताशेषविशेषग्रहणकालं प्रतीक्ष्य शक्त्यनुरूपप्रदानेन प्रयोजकत्वमनुभूय परिनिर्वाप्य वाचना—सूत्रप्रदानं परिनिर्वाप्यवाचना। (उत्तरा. नि. शा. वृ. ५८, पृ. ३९)।

पूर्व में प्रदान किये गये आलाप आदि को जो सब प्रकार से अपने में परिणत कर रहा है—उसे पूर्णतया हृदयंगम करता है—ऐसे शिष्य को सूत्रगत समस्त विशेषताओं के ग्रहण योग्य काल की प्रतीक्षा करके शक्ति के अनुरूप सूत्र के प्रदान करने को परिनिर्वाप्यवाचना कहा जाता है।

परिनिर्वृत—परिनिर्वृतः कर्मकृतविकारविरहात् स्वस्थीभूतः। (स्थाना. अभय. वृ. १-५३)।

कर्मकृत रागादि विकारों (दोषों) को दूर कर जो सर्वथा स्वस्थ हो चुका है—केवलज्ञानादिरूप आत्मस्वरूप में स्थित होता हुआ सिद्धि को प्राप्त कर चुका है—वह परिनिर्वृत (सिद्ध) कहलाता है।

परिनिर्वृति (परं निर्वाण)— भवबन्धनमुक्तस्य या ऽवस्था परमात्मनः। परिनिर्वृतिरिष्टा सा परं निर्वाणमिष्यते॥ (म. पु. ३९-२०६)।

संसाररूप बन्धन से मुक्त हुए जीव की जो उत्कृष्ट

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवस्था होती है उसे परिनिर्वृति कहते हैं। इसे परंनिर्वाण भी कहा जाता है।

परिपिण्डित—देखो परिपीडित। १. यत्र संपिण्डितान् एकत्र मिलितानाचार्यादीनेकवन्दनकेनैव वन्दते, न पृथक् पृथक्, तत्परिपिण्डितं वन्दनकमुच्यते। अथवा वचनानि सूत्रोच्चारणगर्भाणि, करणानि कर-चरणादीनि, संपिण्डितानि अव्यवच्छिन्नानि, वचनकरणानि यस्य स तथा। उर्वोरुपरि हस्तौ व्यवस्थाप्य संपिण्डितकर-चरणौ अव्यक्तसूत्रोच्चारणपुरस्सरं यत्र वन्दते तद्वा परिपिण्डितमिति भावः। (आव. ह. वृ. मल. हेम. टि. पृ. ८८; प्रव. सारो. वृ. १५७)। २. संपिंडिए व वंदइ परिपिंडियवयणकरणओ वावि। (प्रव. सारो. १५७)। ३. परिपिण्डितं प्रभूतानां युगपद्वन्दनम्, यद्वा कुक्षेरुपरि हस्तौ व्यवस्थाप्य परिपिण्डितकर-चरणस्याऽव्यक्तसूत्रोच्चारणपुरस्सरं वन्दनम्। (योगशा. स्वो. विव. ३–१३०)।

१ एक स्थान पर सम्मिलित हुए अनेक आचार्यादिकों की पृथक्-पृथक् वन्दना न करके एक ही वन्दना के रूप से वन्दना करने को परिपिण्डितवन्दनक कहते हैं। अथवा जांघों के ऊपर दोनों हाथ रख करके हाथ-पैरों को संकुचित कर अव्यक्त सूत्रोच्चारणपूर्वक वन्दना करने को परिपिण्डितवन्दनक कहते हैं। यह वन्दना के ३२ दोषों में चौथा है।

परिपीडित दोष—१. परिपीडितं कर-जानुप्रदेशैः परिपीड्य संस्पर्श्य यः करोति वन्दनां तस्य परिपीडितदोषः। (मूला. वृ. ७–१०६)। २. हस्ताभ्यां जानुनो स्वस्य संस्पर्शः परिपीडितम्। (अन. ध. स्वो. टी. ८–९९)।

२ दोनों हाथों से अपने जानु (घुटने) का स्पर्श करते हुए वन्दना करने को परिपीडित दोष कहते हैं। यह कृतिकर्म के ३२ दोषों में चौथा है।

परिपूणक समान शिष्य—१. परिपूणगम्मि य गुणा गलंति दोसा य चिट्ठंति ॥ (विशेषा. १४६३; नन्दी. हरि. वृ. पृ. २२, ११ उद्.)। २. परिपूणको नाम सुघरीचिटिकाविरचितो नीडविशेषः, तेन च किल घृतं गाल्यते, ततस्तत्र कचवरमवतिष्ठते, घृतं तु गलित्वाऽधः पतति, एवं परिपूणकसदृशः शिष्योऽप्युपचारात् परिपूणकः। तत्र हि श्रुतसम्बन्धिनो गुणा सर्वेऽपि घृतवद् गलन्ति, दोषास्तु घृतगतकचवरवदवतिष्ठन्ते, श्रुतस्य दोषानेव गृह्णाति, गुणांस्तु सर्वथा परिहरति असौ, अतोऽयोग्य इति भावः। (नन्दी. हरि. वृ. पृ. १०५)। ३. परिपूणको नाम घृत-क्षीरगालनं सुगृहाभिधचटकाकुलायो वा, तेन ह्याभीर्यो घृतं गालयन्ति, ततो यथा स परिपूणकः कचवरं धारयति घृतमुज्झति तथा शिष्योऽपि यो व्याख्या-वाचनादो दोषानभिगृह्णाति गुणांस्तु मुञ्चति स परिपूणकसमानः। ××× । आह च चूर्णिकृत्—वक्खाणाइसु दोसं हिययंमि ठवेइ मुयइ गुणजालं। सो सीसो अ अजोग्गो भणितो परिपूणगसमानो ॥१॥ (आव. नि. मलय. वृ. १३६, पृ. १४३)।

३ परिपूणक का अर्थ घी की छननी अथवा लुघरी नामक पक्षी का घोंसला होता है। जिस प्रकार ग्वालिनियां परिपूणक से जब घी को छानती हैं तब घी निकल जाता है और कचरा उसके भीतर रह जाता है, उसी प्रकार जो शिष्य परिपूणक के समान व्याख्या व वाचना आदि में दोषों को ग्रहण करता है और गुणों को छोड़ देता है उसे परिपूणक समान शिष्य कहा जाता है।

परिपूर्णेन्द्रियता—परिपूर्णेन्द्रियता अनुपहतचक्षुरादिकरणता। (उत्तरा. नि. शा. वृ. ५८)।

चक्षु आदि इन्द्रियों की अविनाशिता—उनके विषयग्रहणसामर्थ्य—को परिपूर्णेन्द्रियता कहते हैं।

परिभाषा—१. परिभाषणं परिभाषा—कोपाविष्करणेन मा यास्यसीत्यपराधिनोऽभिधानम्। (आव. भा. हरि. वृ. ३, पृ. ११४)। २. इयमत्र भावना—कोपाविष्करणे नरे इतः स्थानान्मा यासीरित्येयं यत् परिभाषणम्। (आव. नि. मलय. वृ. १६६)।

१ क्रोध को प्रगट करके नहीं जाओगे, अर्थात् अब आगे क्रोध नहीं करना, इस प्रकार अपराधी से कहना, यह भरत की चार दण्डनीतियों में प्रथम परिभाषा नाम की दण्डनीति रही है।

परिभोग—देखो उपभोग। १. आच्छादन-प्रावरणालंकार-शयनाशन-गृह-यान-वाहनादिः। (स. सि. ७–२१)। २. परित्यज्य भुज्यत इति परिभोगः। सकृद् भुक्त्वा परित्यज्य पुनरपि भुज्यते इति परिभोग इत्युच्यते—आच्छादन-प्रावरणालङ्कार-शयनासन-गृह-यान-वाहनादिः। (त. वा. ७, २१, १०)। ३. परिभुज्यत इति परिभोगो वस्त्रादि, पुनः पुनः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भुज्यत इति भावः। परिशब्दस्याभ्यावृत्त्यर्थत्वात्। ××× बहिर्भोगो वा परिभोगः, परिशब्दस्य बहिर्वाचकत्वात्। (श्रा. प्र. टी. २८४)। ४. पुनः पुनः परिभुज्यत इति परिभोगः स्त्री-वस्त्राभरणादिः। (धव. पु. ६, पृ. ७८)। ५. अशन-पान-गन्ध-माल्यादि सकृद् भुक्त्वा पुनरपि भुज्यत इति परिभोगः। (चा. सा. पृ. १२)। ६. भूषादिः परिभोगः स्यात् पौनःपुन्येन सेवनात्। (उपासका. ७५९)। ७. मुहुर्यो भुज्यते लोके परिभोगः स उच्यते। (धर्मसं. ७–१७)। ८. आच्छादन-प्रावरण-भूषण-शय्यासन-गृह-यान-वाहन-वनितादिकः परिभोग उच्यते। (त. वृत्ति श्रुत. ७–२१)। ९. परिभोगः समाख्यातो भुज्यते यत्पुनः पुनः। यथा योषिदलंकार-वस्त्रागार-गजादिकम्॥ (लाटीसं. ६–१४७)।

२ जिसे एक बार भोगकर छोड़ दिया जाता है तथा फिर से भी भोगा जाता है वह परिभोग कहलाता है—जैसे आच्छादन, वस्त्र, आभूषण, शयन, आसन, घर, सवारी और वाहन आदि।

परिभोगान्तराय—जस्स कम्मस्स उदएण परिभोगस्स विग्घं होदि तं परिभोगंतराइयं॥ (धव. पु. ६, पृ. ७८)।

जिस कर्म के उदय से परिभोग में विघ्न होता है वह परिभोगान्तराय कहलाता है।

परिमर्शन—१. समस्तशरीरस्य हस्तेन स्पर्शनं परिमर्शनम्। (भ. आ. विजयो. ६४९)। २. परिमर्शनं सर्वगात्रस्पर्शनम्। (भ. आ. मूला. ६४९)।

१ हाथ से समस्त शरीर के स्पर्श करने को परिमर्शन कहते हैं।

परिमितकाल सामायिक—स्वाध्यायादौ सामायिकग्रहणं परिमितकालम्। (त. वृत्ति श्रुत. ९, १८)।

स्वाध्याय आदि में जो सामायिक ग्रहण की जाती है वह परिमितकाल सामायिक कहलाती है।

परिवर्तदोष—देखो परिवर्तित। १. मदीये वेश्मनि तिष्ठन्तु भवान्, युष्मदीयं तावद् गृहं यतिभ्यः प्रयच्छेति गृहीतं परियट्टमित्युच्यते। (भ. आ. विजयो. २३०; कार्तिके. टी. ४४८–४९)। २. व्रीहिकूरादिभिः शालिकूरादेः परिवर्तनम्। यद्दास्यामीति यतये परिवर्तः प्रकीर्तितः॥ (आचा. सा. ८–३१)। ३. व्रीह्यन्नाद्येन शाल्यन्नाद्युपात्तं परिवर्तितम्। (अन. ध. ५–१४)। ४. मद्गृहे तिष्ठतु भवान्, स्वगृहं यतिभ्यः प्रयच्छेति गृहीतं परियट्टम्। (भ. आ. मूला. २३०)। ५. कस्यचिद् गृहस्थस्य व्रीहीन् दत्त्वा शालयो गृह्यन्ते, अथवा निजं कूरं दत्त्वा परकूरो गृह्यते, निजाभ्यूषान् दत्त्वा परेषामभ्यूषा गृह्यन्ते, एवं यत् परिवर्त्यते यतिभ्यो दीयते दास्यते वा स परिवर्तः कथ्यते। (भावप्रा. टी. ९९, पृ. २५०)।

१ आप मेरे घर में रहें और अपना घर साधुओं के रहने के लिए देदें। इस प्रकार कह कर साधु के लिए जो निवासस्थान ग्रहण किया जाता है वह परिवर्त नामक दोष से दूषित होता है। २ व्रीहि आदि से शालि धान के भात आदि को बदल कर साधु के लिये देना, यह परिवर्त नामक एक उत्पादन दोष है।

परिवर्तन—१. परियट्टणं णाम परियट्टणंति वा अब्भसणंति वा गुणणंति वा एगट्ठा। (दशवै. चू. पृ. २८)। २. अविस्सरणट्ठं पुणो पुणो भावागम-परिमलणं परियट्टणं णाम। (धव. पु. ९, पृ. २६२); अवगयत्थस्स हियएण पुणो पुणो परिमलणं परियट्टणं णाम। (धव. पु. १४, पृ. ९)। ३. पूर्वाधीतस्य सूत्रादेरविस्मरणहेतवे। निर्जरार्थं च योऽभ्यासः स भवेत् परिवर्तना॥ (लोकप्र. ३०–६८)।

१ परिवर्तन, अभ्यसन और गुणन ये समानार्थक शब्द हैं। २ पठित भावागम का विस्मरण न हो, इसके लिये जो उसका बार बार परिशीलन किया जाता है इसे परिवर्तन कहते हैं।

परिवर्तना—देखो परिवर्तन।

परिवर्तमान परिणाम—जत्थ पुण ट्ठाइदूण परिणामंतरं गंतूण एग-दोआदिसमएहि आगमणं संभवदि ते परिणामा परियत्तमाणा णाम। (धव. पु. १२, पृ. २७)।

जिस परिणाम पर स्थित होकर दूसरे परिणाम को प्राप्त होते हुए एक-दो आदि समयों में पुनः उसी परिणाम को प्राप्त होना संभव है, ऐसे परिणामों को परिवर्तमान परिणाम कहते हैं।

परिवर्तित—देखो परिवर्त। १. यच्छाल्योदनादि कोद्रवादिना प्रातिवेशिकगृहे परिवर्त्य ददाति तत्परिवर्तितम्। (आचारा. सू. शी. वृ. २, १, २६६, पृ. ३१७)। २. स्वद्रव्यमर्पयित्वा परद्रव्यं तत्सदृशं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गृहीत्वा यद्दीयते तत्परिवर्तितम्। (योगशा. स्वो. विव. १-३८)।

१ शालि धान के भात आदि को पड़ोसी के घर में कोदों (एक क्षुद्र धान्य) आदि से बदल कर देने पर परिवर्तित दोष होता है।

परिवाद—परिवादो मिथ्योपदेशोऽभ्युदय-निःश्रेयसार्थेषु क्रियाविशेषेष्वन्यस्यान्यथा प्रवर्तनम्। (रत्नक. टी. ३-१०)।

स्वर्ग-मोक्ष की साधनभूत विशेष क्रियाओं के विषय में मिथ्या उपदेश देकर दूसरे को विपरीत प्रवर्ताना, इसका नाम परिवाद है। यह सत्याणुव्रत का एक अतीचार है।

परिव्राजक—परि समन्तात् पापवर्जनेन व्रजति गच्छतीति परिव्राजकः। (दशवै. हरि. वृ. पृ. ८४)।

जो 'परि' अर्थात् सब ओर पापों के परित्याग के साथ 'व्रजति' अर्थात् जाता है—प्रवृत्ति करता है—उसे परिव्राजक कहते हैं। यह परिव्राजक की सार्थक संज्ञा है।

परिशातनाकृति—तेसिं चेव अप्पिदसरीरपोग्गलक्खंधाणं संचएण विणा जा णिज्जरा सा परिसादणा कदी णाम। (धव. पु. ९, पृ. ३२७)।

विवक्षित औदारिकादि शरीररूप पुद्गलस्कन्धों की संचय के विना जो निर्जरा होती है उसे परिशातना कृति कहते हैं।

परिषह, परीषह—१. त एते बाह्याभ्यन्तरद्रव्यपरिणामाः शारीर-मानसप्रकृष्टपीडाहेतवः क्षुधादयो द्वाविंशतिः परीषहाः प्रत्येतव्याः। (त. वा. ९, ९, १)। २. परीति समन्तात् स्वहेतुभिरुदीरिता मार्गाच्यवननिर्जरार्थं साध्वादिभिः सह्यन्त इति परीषहाः। (उत्तरा. शा. वृ. २, पृ. ७२ उत्थानिका)। ३. परीषहाः क्षुत्तृट्शीतोष्णादयः। (मूला. वृ. ५, १९८)। ४. शारीर-मानसोत्कृष्टबाधाहेतून् क्षुदादिकान्। प्राहुरन्तर्बहिर्द्रव्यपरिणामान् परीषहान्॥ (अन. ध. ६-८४)। ५. एते(क्षुदादयः) सर्वे वेदनाविशेषाः द्वाविंशतिपरीषहाः मुमुक्षुणा सहनीयाः। (त. वृत्ति श्रुत. ९-९)।

१ शारीरिक एवं मानसिक उत्कृष्ट पीडा की हेतुभूत जो बाह्य व अभ्यन्तर परिणाम स्वरूप क्षुधादि हैं उन्हें परीषह कहा जाता है। ये संख्या में बा'स हैं।

परिष्ठापनासंयम—भक्त-पानादिकमनेषणीयं वस्त्रपात्रादिकं चानुपकारकं संसक्तं वा निर्जन्तुके स्थण्डिले परिष्ठापयतः परिष्ठापनासंयमः। (योगशा. स्वो. विव. ४-९३)।

नहीं ग्रहण करने के योग्य अन्न-पानादि को एवं शरीर के लिए अनुपयोगी अथवा सम्बद्ध ऐसे वस्त्र-पात्रादि को जन्तु रहित शुद्ध भूमि पर रखना, इसे परिष्ठापनासंयम कहते हैं।

परिहरण—वंतुच्चारसरिच्छं कम्मं सोउमवि कोविओ भीओ। परिहरइ सावि य दुहा विहिअविहीए य परिहरणा॥ (पिण्डनि. १९७)।

जो आधाकर्म वान्ति या विष्ठा के समान है उसे सुनकर विद्वान् भयभीत होता हुआ जो विधि या अविधि के साथ उसका परित्याग करता है, यह उक्त आधाकर्म का परिहरण है।

परिहार—देखो पिच्छ। १. पक्ष-मासादिविभागेन दूरतः परिवर्जनं परिहारः। (स. सि. ९-२२; त. श्लो. ९-२२; मूला. वृ. ११-१६)। २. परिहारो मासिकादिः। (त. भा. ९-२२)। ३. पक्ष-मासादिविभागेन दूरतः परिवर्जनं परिहारः। पक्ष-मासादिविभागेन संसर्गमन्तरेण दूरतः परिवर्जनं परिहार इत्यवध्रियते। (त. वा. ९, २२, ९)। ४. परिह्रियते अस्मिन् सति वन्दनालापान्नपानप्रदानादिक्रियया साधुभिरिति परिहारः। स च मासादिकः षण्मासान्तः। (त. भा. सिद्ध. वृ. ९-२२)। ५. परिहारस्तु मासादिविभागेन विवर्जनम्। (त. सा. ७-२६)। ६. विधिवद् दूरात्त्यजनं परिहारो निजगणानुपस्थानम्। सपरगणोपस्थानं पारञ्चिकमित्ययं त्रिविधः॥ (अन. ध. ७-५६)। ७. पक्षमासादिभेदेन दूरतः परिवर्जनम्। (प्रायश्चित्तस. टी. ७-२१)। ८. दिवसादिविभागेनैव दूरतः परिवर्जनं परिहारः। (भावप्रा. टी. ७८)। ९. दिवस-पक्ष-मासादिविभागेन दूरतः परिवर्जनं परिहारो नाम प्रायश्चित्तम्। (त. वृत्ति श्रुत. ९-२२)।

१ अपराधी साधु को पक्ष-मास आदि के लिए संघ से दूर करने—उससे कुछ सम्बन्ध न रखने—को परिहार प्रायश्चित्त कहते हैं। ४ जिस प्रायश्चित्त में साधु जन अपराधी साधु का वन्दना, सम्भाषण और अन्न-पानप्रदानादि क्रिया से परिहार कर देते हैं—उससे वन्दना व सम्भाषण आदि नहीं किया करते हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वह परिहार प्रायश्चित्त कहलाता है। वह कम से कम एक मास और अधिक से अधिक छह मास तक होता है।

परिहारविशुद्धि—१. परिहरणं परिहारः प्राणिवधान्निवृत्तिः, तेन विशिष्टा शुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्रम्। (स. सि. ९–१८)। २. पंचसमिदो तिगुत्तो परिहरइ सदा वि जो हु सावज्जं। पंचजमेयजमो वा परिहारयसंजदो साहू। (प्रा. पंचसं. १–१३१; धव. पु. १, पृ. ३७२ उद्.; गो. जी. ४७२)। ३. परिहरतु विसुद्धं तु पंचजामं अणुत्तरं धम्मं। तिविहेण फासयंतो परिहारियसंजतो स खलु॥ (व्याख्याप्र. २५, ७, ३, पृ. २८४८)। ४. परिहारेण विशिष्टा शुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्रम्। परिहरणं परिहारः प्राणिवधान्निवृत्तिः, तेन विशिष्टा शुद्धिर्यस्मिंस्तत् परिहारविशुद्धिचारित्रं प्रत्येतव्यम्। (त. वा. ९, १८, ८)। ५. परिहारः तपोविशेषः, तेन विशुद्धं परिहारविशुद्धम्, परिहारो वा विशेषेण शुद्धो यत्र तत्परिहारविशुद्धम्। (अनुयो. हरि. वृ. पृ. १०४)। ६. परिहरणं परिहारः तपोविशेषः, तेन विशुद्धिर्यस्मिंस्तत्परिहारविशुद्धिकम्। (आव. नि. हरि. व मलय. वृ. ११४)। ७. परिहारप्रधानः शुद्धिसंयतः-परिहारविशुद्धिसंयतः। त्रिंशद् वर्षाणि यथेच्छया भोगमनुभूय सामान्यरूपेण विशेषरूपेण वा संयममादाय द्रव्यक्षेत्र-काल-भावगतपरिमितापरिमितप्रत्याख्यानप्रतिपादकप्रत्याख्यानपूर्वमहार्णवं सम्यगधिगम्य व्यपगतसकलसंशयस्तपोविशेषात् समुत्पन्नपरिहारर्द्धिस्तीर्थकरपादमूले परिहारशुद्धिसंयममादत्ते। एवमादाय स्थान-गमन-चङ्क्रमणाशन-पानासनादिषु व्यापारेष्वशेषप्राणिपरिहरणदक्षः परिहारशुद्धिसंयतो नाम। (धव. पु. १, पृ. ३७०–३७१); सव्वसुही होदूण तीसं वस्साणि गमिय तदो वासपुधत्तेण तित्थयरपादमूले पच्चक्खाणणामधेयपुव्वं पढिदूण पुणो पच्छा परिहारसुद्धिसंजमं पडिवज्जिय ××× । (धव. पु. ७, पृ. १६७)। ८. परिहारस्तपोविशेषस्तेन विशुद्धं परिहारविशुद्धिकम्। (त. भा. सिद्ध. वृ. ९–१८)। ९. विशिष्टपरिहारेण प्राणिघातस्य यत्र हि। शुद्धिर्भवति चारित्रं परिहारविशुद्धि तत्॥ (त. सा. ६–४७)। १०. प्राणिवधान्निवृत्तिः परिहारस्तेन विशुद्धिर्यस्मिन् तत्परिहारविशुद्धिचारित्रम्। (चा. सा. पृ. ३७)। ११. सावद्यपरिहारेण प्राप्यते यः समाहितैः। व्रत-गुप्ति-समित्याढ्यैः स परीहारसंयमः॥ (पंचसं. अमित. १–२४१)। १२. मिथ्यात्व-रागादिविकल्पमलानां प्रत्याख्यानेन परिहारेण विशेषेण स्वात्मनः शुद्धिर्निर्मल्यं परिहारविशुद्धिश्चारित्रम्। (बृ. द्रव्यसं. टी. ३५)। १३. परिहारेण दोषाणां शुद्धिर्यस्मिन् स संयमः। परिहारविशुद्धिः स्याद् ऋद्धिरीदृग्विधस्य सा॥ (आचा. सा. ५–१४२)। १४. परिहारः प्राणिवधान्निवृत्तिः, तेन विशिष्टा शुद्धिर्यत्र तत्परिहारविशुद्धिसंयमं चारित्रम्। (प्रा. चारित्रभ. टी. ३, पृ. १९४)। १५. परिहरणं परिहारः—विशिष्टतपोरूपस्तेन विशुद्धिरस्मिन्निति परिहारविशुद्धिकम्। (उत्तरा. ने. वृ. २८–३२; षडशी. मलय. वृ. १५; पंचसं. मलय. वृ. १–८, पृ. ११; भगवती. दा. वृ. ८–२, पृ. १२०)। १६. परिहरणं परिहारः प्राणिवधान्निवृत्तिः, तेन विशिष्टा शुद्धिर्यस्मिन् स परिहारविशुद्धिः। (गो. जी. जी. प्र. ४७३)। १७. परिहरइ जो विशुद्धं पंचज्जामं अणुत्तरं धम्मं। तिविहेणं फासंतो परिहारियसंजओ स खलु॥ (गु. गु. षट्. स्वो. वृ. ३, पृ.१३ उद्.)। १८. परिहरणं परिहारः प्राणिवधनिवृत्तिरित्यर्थः, परिहारेण विशिष्टा शुद्धिः कर्ममलकलंकप्रक्षालनं यस्मिन् चारित्रे तत्परिहारविशुद्धिचारित्रम्। (त. वृत्ति श्रुत. ९, १८)।

१ प्राणिघात के परिहार से जो विशिष्ट शुद्धियुक्त संयम होता है उसे परिहारविशुद्धिसंयम कहते हैं। २ जो साधु पांच समितियों व तीन गुप्तियों से युक्त होता हुआ सदा पाप का परित्याग करता है तथा पांच यमरूप भेद संयम अथवा एक ही सामायिकरूप अभेदसंयम से विभूषित होता है उसे परिहारविशुद्धिसंयत कहा जाता है। ३ जो परिहारपूर्वक अनुपम पांच यमरूप धर्म का मन-वचन-काय से स्पर्श करता है—परिपालन करता है—वह पारिहारिकसंयत कहलाता है।

परिहारिक संयत, परिहारियसंयत— देखो परिहारविशुद्धि।

परीक्षण—परीक्षणं परीक्षा गण-परिचारकादिगोचरा। (अन. ध. स्वो. टी. ७–९८)।

परीक्षण से परीक्षा का अभिप्राय है। यह भक्त-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रत्याख्यान के अन्तर्गत अर्हादि लिंगों में से एक है।

परीक्षा—१. उद्दिष्टस्य लक्षितस्य च यथावल्लक्षणमुपपद्यते न वा इति प्रमाणतोऽर्थावधारणं परीक्षा। (न्यायकु. १–३, पृ. २१)। २. प्रमाणबलात्तल्लक्षणविप्रतिपत्तिपक्षनिरासः परीक्षा। (लघीय. अभय. वृ. पृ. ६)। ३. विरुद्धनानायुक्तिप्राबल्य-दौर्बल्यावधारणाय प्रवर्तमानो विचारः परीक्षा। (न्यायदी. पृ. ८)।

१ उद्दिष्ट और लक्ष्यभूत वस्तु का लक्षण यथार्थ में घटित होता है या नहीं; इस प्रकार प्रमाण से उसकी यथार्थता का विचार करना, इसका नाम परीक्षा है।

परीतसंसार (संसारपरीत)—१. जिणवयणे अणुरत्ता गुरुवयणं जे करंति भावेण। असबलअसंकिलिट्ठा ते होंति परित्तसंसारा॥ (मूला. २, ७२)। २. संसारपरित्तेणं, पुच्छा। गोयमा! जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं अणंतं कालं जाव अवड्ढं पोग्गलपरियट्टं देसूणं। (प्रज्ञाप. १८, २४७)। ३. यस्तु सम्यक्त्वादिना कृतपरिमितसंसारः स संसारपरीतः। ××× संसारपरीतो जघन्यतोऽन्तर्मुहूर्तम्, तत ऊर्ध्वमन्तकृत्केवलित्वयोगेन मुक्तिभावात्। उत्कर्षतो अनन्तकालम्। तमेव निरूपयति—'अणंताओ' इत्यादि प्राग्वत्, तत ऊर्ध्वमवश्यं मुक्तिगमनात्। (प्रज्ञाप. मलय. वृ. १८–२४७)। ४. परीतीकृतसंसारा नाम स्तोकावशेषसंसाराः। (आव. नि. मलय. वृ. १५, पृ. ४२)। ५. परीतः परिमितः संसारो यस्यासौ परीतसंसारिकः। (बृहत्क. क्षे. वृ. ७१४)।

१ जो जिनेन्द्रदेव के वचनों में अनुरक्त होकर भक्तिपूर्वक गुरु की आज्ञा का पालन करते हैं तथा जो मिथ्यात्व से विरहित होते हुए संक्लेशपरिणाम से भी रहित हैं वे परीतसंसारी परिमितसंसार वाले—होते हैं। ३ जिसने सम्यक्त्व आदि के द्वारा अपने संसार को परिमित कर दिया है, वह संसारपरीत या परीतसंसारी हो जाता है। वह जघन्य से अन्तर्मुहूर्त काल और उत्कर्ष से अनन्त काल—कुछ कम अपार्ध पुद्गलपरिवर्तकाल—तक ही संसार में रहता है—तत्पश्चात् नियम से मुक्त हो जाता है।

परीतसंसारिक—देखो परीतसंसार।

परीतानन्त—जं तं परित्ताणंतयं तं तिविहं—जहण्णपरित्ताणंतयं अजहण्णमणुक्कसपरित्ताणंतयं उक्कस्सपरित्ताणंतयं चेदि। ××× जं तं जहण्णपरित्ताणंतयं तं विरलेदूण एक्केक्कस्स रूवस्स जहण्णपरित्ताणंतयं दादूण अण्णोण्णब्भत्थे कदे उक्कस्सपरित्ताणंतयं अदिच्छिदूण जहण्णजुत्ताणंतयं गंतूण पडिदं। एवदिओ अभवसिद्धियरासी। तदो एगरूवे अवणीदे जादं उक्कस्सपरित्ताणंतयं। (ति. प. ४, पृ. १८२–८३)।

परीतानन्त जघन्य, अजघन्य-अनुत्कृष्ट और उत्कृष्ट के भेद से तीन प्रकार का है। जघन्य परीतानन्त का विरलन कर एक एक अंक के प्रति जघन्य परीतानन्त को देकर परस्पर गुणा करने पर जघन्य युक्तानन्त होता है। उसमें एक अंक कम कर देने पर उत्कृष्ट परीतानन्त होता है। अभव्य जीवराशि जघन्य युक्तानन्त प्रमाण है।

परीवर्त—परीवर्तः आम्नायः परिपाटिगणस्वाध्यायः। (प्रायश्चित्तस. टी. ७–२३)।

उच्चारण की शुद्धिपूर्वक आचार्य-परम्परागत परिपाटी के अनुसार स्वाध्याय करने को परीवर्त या आम्नाय नामक स्वाध्याय कहते हैं।

परीषहजय—तेषां क्षुधादिवेदनानां तीव्रोदयेऽपि सुख-दुःख-जीवित-मरण-लाभालाभ-निन्दा-प्रशंसादिसमतारूपपरमसामायिकेन नवतरशुभाशुभकर्मसंवरणचिरन्तनशुभाशुभकर्मनिर्जरणसमर्थेनायं निजपरमात्मभावनासंजातनिर्विकारनित्यानन्दलक्षणसुखामृतसंवित्तेरचलनं स परीषहजयः। (बृ. द्रव्यसं. टी. ३५)।

भूख प्यास आदि की तीव्र वेदना के उदित होने पर भी सुख-दुःख, जीवन-मरण, लाभ-अलाभ और निन्दा-प्रशंसा आदि में अतिशय समभावी बनकर नवीन कर्मों का संवर और पुरातन कर्मों की निर्जरा करते हुए निजात्मस्वरूप की भावनाजनित निर्विकार नित्यानन्दस्वरूप स्वानुभूति से चलायमान नहीं होने को परीषहजय कहते हैं।

परुष—परुषं रूक्षं स्नेहरहितं (निष्ठुरं) परपीडाकारि। (त. भा. सिद्ध. वृ. ९–६, पृ. १९६)।

जो वचन रूखा व स्नेह से रहित (निष्ठुर) होता हुआ दूसरे जीवों को कष्ट पहुंचाने वाला हो उसे परुष वचन कहा जाता है।

परुषदोष—खड्ढे थेरे सेहे असंवुडे दट्ठु कुणइ वा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परुसं। ममकारेण भणेज्जो भणिज्ज वा तेहिं परुसेण। (भ. आ. ३८८)।

स्वगण में रहते हुए आचार्य के द्वारा क्षुद्र, स्थविर (वृद्ध), मार्ग से अनभिज्ञ और संयम से हीन साधुओं को देखकर ममत्वबुद्धि से कठोर वचन बोला जा सकता है तथा वे भी कठोर वचन का व्यवहार कर सकते हैं। इस प्रकार अपने संघ में रहते हुए आचार्य के समाधि का विरोधी यह परुषदोष सम्भव है, इसलिए आचार्य आराधना के लिए स्वगण को छोड़कर परगण में जाना ठीक समझते हैं।

परोक्ष—१. जं परदो विण्णाणं तं तु परोक्खं ति भणिदमट्ठेसु। (प्रव. सा. १-५८)। २. आद्ये परोक्षम्। (त. सू. १-११)। ३. कुतोऽस्य परोक्षत्वम्? परायत्तत्वात्। ××× अतः पराणि इन्द्रियाणि मनश्च प्रकाशोपदेशादि च बाह्यनिमित्तं प्रतीत्य तदावरणकर्मक्षयोपशमापेक्षस्यात्मनो मतिश्रुतम् उत्पद्यमानं परोक्षमित्याख्यायते। (स. सि. १-११)। ४. परतो पुण अक्खस्सा वट्टंतं होइ पारुक्खं॥ (बृहत्क. २५); जं परतो आयत्तं तं परोक्खं हवइ सव्वं॥ (बृहत्क. २९)। ५. अक्खस्स पोग्गलकया जं दव्विन्दिय-मणा परा तेणं। तेहिंतो जं नाणं परोक्खमिह तमणुमाणं वा॥ (विशेषा. ९०)। ६. अक्खा इंदिय-मणा परा, तेसु जं णाणं तं परोक्खं, मति-श्रुते परोक्षमात्मनः परनिमित्तत्वात् अनुमानवत्। (नन्दी. चू. पृ. २२-२३)। ७. उपात्तानुपात्तपरप्राधान्यादवगमः परोक्षम्। उपत्तानुपात्तानीन्द्रियाणि मनश्च, अनुपात्तं प्रकाशोपदेशादि परः (धव. 'परः' नास्ति), तत्प्राधान्यादवगमः परोक्षम्। यथा गतिशक्त्युपेतस्यापि स्वयमेव गन्तुमसमर्थस्य यष्ट्याद्यालम्बनप्राधान्यं गमनं तथा मति-श्रुतावरणक्षयोपशमे सति ज्ञस्वभावस्यात्मनः स्वयमेवार्थानुपलब्धुमसमर्थस्य पूर्वोक्तप्रत्ययप्रधानं ज्ञानं परायत्तत्वात्तदुभयं (धव. 'तदुभयं' नास्ति) परोक्षमित्युच्यते। (त. वा. १, ११, ६; धव. पु. ९, पृ. १४३-४४)। ८. परोक्षं शेषविज्ञानम् ××× ॥ (लघीय. ३); इतरस्य (अविशदनिर्भासिनः) ज्ञानस्य परोक्षता। (लघीय. स्वो. विवृ. ३)। ९. परोक्षं प्रत्यभिज्ञादि ××× ॥ (प्रमाणसं. २); व्यपेक्षातः तद्विधिकरणादि परापेक्षं परोक्षम्। (प्रमाणसं. स्वो. विव. ८७)। १०. परोक्षं पुद्गलमयेभ्य इन्द्रिय-मनोभ्यो यज्ज्ञानं रूपादिपदार्थपरिच्छेदनम्। (विशेषा. बृ. ९०, पृ. ४१)। ११. परैः इन्द्रियैरूक्षा—सम्बन्धनं यस्य ज्ञानस्य तत्परोक्षम् इन्द्रियादिनिमित्तमत्यादिः। (त. भा. हरि. वृ. १-१०); इन्द्रिय-मनोनिमित्तं विज्ञानं परोक्षम्। (त. भा. हरि. वृ. १-११)। १२. अक्षस्य आत्मनः द्रव्येन्द्रियाणि द्रव्यमनश्च पुद्गलमयत्वात् पराणि वर्तन्ते, पृथगित्यर्थः, तेभ्योऽक्षस्य यत् ज्ञानमुत्पद्यते तत्परोक्षम्, परनिमित्तत्वाद् धूमादिज्ञानवत्, अथवा परैरूक्षा—सम्बन्धनं विषयविषयीभावलक्षणमस्येति परोक्षम्। (नन्दी. हरि. वृ. पृ. २७)। १३. ××× इतरज्ज्ञेयं परोक्षं ग्रहणेक्षया॥ (षड्दस. ५६, पृ. २२३)। १४. ××× पराणीन्द्रियाणि आलोकादिश्च, परेषामायत्तं ज्ञानं परोक्षम्। (धव. पु. १३, पृ. २१२)। १५. अक्षेभ्यो हि परावृत्तं परोक्षं श्रुतमिष्यते। (त. श्लो. १, ११, ७)। १६. परोक्षस्यावैशद्यं स्वरूपम्। (अष्टस. १५, पृ. १३२)। १७. परोक्षमविशदज्ञानात्मकम्। (प्रमाणप. पृ. ६९)। १८. पराणि च निर्माणाङ्गोपाङ्गोदयनिवृत्त्युपकरणरूपाणीन्द्रियाणि, मनश्च मनोवर्गणापरिणतिरूपं द्रव्येन्द्रियं परम्, तेभ्यो यदुपजायते ज्ञानं तन्निमित्तजं तत्परोक्षमुच्यते धूमादग्निज्ञानवत्। (त. भा. सिद्ध. वृ. १-६)। १९. समुपात्तानुपात्तस्य प्राधान्येन परस्य यत्। पदार्थानां परिज्ञानं तत् परोक्षमुदाहृतम्। (त. सा. १-१६)। २०. यत्तु खलु परद्रव्यभूतादन्तःकरणादिन्द्रियात् परोपदेशादुपलब्धेः संस्कारादालोकादेर्वा निमित्ततामुपगतात् स्वविषयमुपगतस्यार्थस्य परिच्छेदनं तत् परतः प्रादुर्भवत् परोक्षमित्यालक्ष्यते। (प्रव. सा, अमृत. १-५८)। २१. तस्मादन्तरङ्गमलविश्लेषविशेषोदयनिबन्धनः कश्चिदस्पष्टत्वापरनामा स्वानुभववेद्यः प्रतिभासविशेष एव, तस्य परोक्षत्वम्। (प्रमाणनि. पृ. ३३)। २२. प्रतिपादितविशदस्वरूपविज्ञानाद्यदन्यदविशदस्वरूपं विज्ञानं तत्परोक्षम्। (प्र. क. मा. ३-१)। २३. अविशदमविसंवादि ज्ञानं परोक्षम्। (सन्मति. अभय. वृ. २-१, पृ. ५९५; षड्द. स. वृ. ५५, पृ. २०९)। २४. परेभ्यः—अक्षापेक्षया पुद्गलमयत्वेन द्रव्येन्द्रिय-मनोभ्योऽक्षस्य जीवस्य यत्तत्परोक्षं निरुक्तवशादिति। आह च—अक्खस्स पोग्गलकया जं दव्विदिय-मणा परा तेण। तेहिंतो जं नाणं परोक्खमिह तमणुमाणं व॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(स्थाना. अभय. वृ. २, १, ७१)। २५. अस्पष्टं परोक्षम् ×××। (प्र. न. त. ३-१)। २६. इन्द्रिय-मनःपरोपदेशावलोकादिबहिरङ्गनिमित्तमूतात्तथैव च ज्ञानावरणीयक्षयोपशमजनितार्थग्रहणशक्तिरूपाया उपलब्धेरर्थावधारणरूपसंस्काराच्चान्तरंगकारणभूतात् सकाशादुत्पद्यते यद्विज्ञानं तत्पराधीनत्वात्परोक्षमित्युच्यते। (प्रव. सा. जय. वृ. १-५८)। २७. अक्षेभ्यः परतो वर्तते इति परेणेन्द्रियादिना चोक्ष्यत इति परोक्षम्। (प्रमाणमी. स्वो. वृ, १, १, १०); अविशदः परोक्षम्। (प्रमाणमी. १, २, १)। २८. द्रव्येन्द्रिय-मनांसि पुद्गलमयत्वात्पराणि, तेभ्यः पुनरक्षस्य वर्तमानं ज्ञानं भवति परोक्षम्। किमुक्तं भवति? यदिन्द्रियद्वारेण मनोद्वारेण वा ऽऽत्मनो ज्ञानमुपजायने तत्परोक्षम्। ××× यदि वा परैर्द्रव्येन्द्रिय-मनोभिरक्षसम्बन्धो यस्मिंस्तत्परोक्षमिति व्युत्पत्तिः। (बृहत्क. मलय. वृ. २५)। २९. 'अशूङ् व्याप्तौ' अश्नुते—ज्ञानात्मना सर्वानर्थान् व्याप्नोतीत्यक्षः, यदि वा 'अशू भोजने' अश्नाति—सर्वानर्थान् यथायोगं भुङ्क्ते पालयति वेत्यक्षो जीवः, उभयत्रापि 'मावावद्यमिकमिहनिकष्यशी' त्यादिना उणादिकसप्रत्ययः, अक्षस्य—आत्मनो द्रव्येन्द्रियाणि द्रव्यमनश्च पुद्गलमयत्वात् पराणि वर्तन्ते, पृथग्वर्तन्त इति भावः, तेभ्यो यदक्षस्य ज्ञानमुदयते तत्परोक्षम्, 'पृषोदरादयः' इति रूपनिष्पत्तिः, अथवा परैः इन्द्रियादिभिः सह उक्षा सम्बन्धो विषय-विषयिभावलक्षणो यस्मिन् ज्ञाने, न तु साक्षादात्मना, तत्परोक्षं धूमादग्निज्ञानवत्। ××× उक्तं च—अक्खस्स पोग्गलमया जं दव्वेंदियमणा परा होंति। तेहिंतो जं नाणं परोक्खमिह तमणुमाणं व॥ (आव. नि. मलय. वृ. १, पृ. १३)। ३०. उपात्तानुपात्तपरप्रत्ययापेक्षं परोक्षम्। (गो. जी. मं. प्र. व जी. प्र. टी. ३६९)। ३१. शेषमवितथं ज्ञानं स्मृति-प्रत्यभिज्ञान-तर्कानुमानागमभेदभिन्नं परोक्षम्। (लघीय. अभय. वृ, पृ. १२)। ३२. अविशदप्रतिभासं परोक्षम्। (न्यायदी. पृ. ५१)। ३३. अक्षाणां परम्—अक्षव्यापारनिरपेक्षं मनोव्यापारेणासाक्षादर्थपरिच्छेदकं परोक्षमिति परशब्दसमानार्थेन 'परस्' शब्देन सिद्धम्। (षड्द. स. गु. वृ. ५५, पृ. २०४-५)। ३४. ××× मति-श्रुतज्ञानावरणक्षयोपशमश्च परमुच्यते, तत्परं बाह्यनिमित्तमपेक्ष्य अक्षस्यात्मनः उत्पद्यते यत् ज्ञानद्वयं तत्परोक्षम्। (त. वृत्ति श्रुत. ११-१)। ३५. ज्ञानस्यापि परोक्षस्यावैशद्यस्वरूपम्। (सप्तभं. पृ. ४७)। ३६. अक्षेभ्योऽक्षाद्वा परतो वर्तत इति परोक्षम्, अस्पष्टं ज्ञानमित्यर्थः। (जैनत. पृ. ११४)।

१ जो पर से—इन्द्रिय, मन, परोपदेश एवं प्रकाश आदि के निमित्त से—पदार्थ का ज्ञान होता है उसे परोक्ष कहा जाता है। ४ अक्ष अर्थात् जीव के जो पर से—इन्द्रिय व मन के द्वारा—वर्तमान ज्ञान उत्पन्न होता है वह परोक्ष कहलाता है। ५ अक्ष (जीव) की द्रव्य इन्द्रियां व मन चूंकि पुद्गलकृत हैं, अतएव वे पर हैं—उससे भिन्न हैं, उनसे जो ज्ञान होता है वह परोक्ष कहलाता है। जैसे—अनुमान ज्ञान।

परोक्ष-उपचारविनय—१. परोक्षेष्वप्याचार्यादिष्वंजलिक्रिया-गुणसंकीर्तनानुस्मरणाज्ञानुष्ठायित्वादिः काय-वाङ्मनोभिरवगन्तव्यः, राग-प्रहसन-विस्मरणैरपि न कस्यापि पृष्ठमांसभक्षणं करणीयमेवमादिः परोक्षोपचारविनयः प्रत्येतव्यः। (चा. सा. पृ. ६५-६६)। २. ××× गुरुणा विणा वि आणाए। अणुवट्टिज्जए जं तं परोक्खविणओ त्ति विण्णेओ॥ (वसु. श्रा. ३३१)। ३. ज्ञान-विज्ञान-सत्कीर्तिर्नतिराज्ञानुवर्तनम्। परोक्षे गणनाथानां परोक्षप्रश्रयः परः॥ (आचा. सा. ६-८२)।

१ परोक्ष में अर्थात् आचार्यादि के सम्मुख न होने पर भी काय, वचन व मन से क्रमशः उन्हें हाथ जोड़ नमस्कार करने, गुणगान करने और उनकी आज्ञानुसार चलने को परोक्ष उपचारविनय कहते हैं।

परोक्षदृष्टि—पुव्वुत्तसयलदव्वं णाणागुण-पज्जएण संजुत्तं। जो ण य पेच्छदि सम्मं परोक्खदिट्ठी हवे तस्स॥ (नि. सा. १६७)।

जो अनेक गुणों और पर्यायों से संयुक्त मूर्त-अमूर्त एवं चेतन-अचेतन सब द्रव्यों को भले प्रकार (अथवा एक साथ) नहीं देखता है उसे परोक्षदृष्टि जानना चाहिए।

परोक्षाभास—वैशद्येऽपि परोक्षं तदाभासं मीमांसकस्य करणज्ञानवत्। (परीक्षा. ६-७)।

विशद प्रतिभास के होने पर भी उसे परोक्ष मानना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इसे परोक्षाभास कहा जाता है। जैसे—मीमांसक के यहां करणज्ञान।

परोपरोधाकरण—१. परेषामुपरोधाकरणम्। (स. सि. ७–६; त. वा. ७–६)। २. स्वामित्वेन वसत्यादि परैः स्यादुपरुन्धितम्। परोपरोधाकरणमाहुः सूत्रविशारदाः॥ तत्स्वामिनमनापृच्छ्य स्थातव्यं न गृहिव्रतैः। स्थातव्यं च तमापृच्छ्य दीयमानं तदाज्ञया॥ (लाटीसं. ६, ४१–४२)।

१ दूसरों के ठहरने में बाधक न होना, अथवा दूसरों से ठहरने का आग्रह न करना, यह परोपरोधाकरण नाम की अचौर्यव्रत की भावना है। २ जो वसति (स्थान) आदि स्वामीरूप से दूसरों के द्वारा रोकी गई है, अणुव्रती श्रावक वहां स्वामी से पूछ कर ठहर सकते हैं, उसकी आज्ञा के बिना वहां न ठहरना, यह परोपरोधाकरण भावना है।

पर्यङ्कासन— १. स्याज्जंघयोरधोभागे पादोपरि कृते सति। पर्यंको नाभिगोत्तानदक्षिणोत्तरपाणिकः॥ (योगशा. ४–१२५)। २. वामान्तर्गुल्फवामस्य गुल्फो बाह्यः स्थितस्तयोः। पादयोरूरुमूलस्थं पल्यङ्के पार्ष्णियुग्मकम्॥ गुल्फस्थोत्तानवामस्थोत्तानावामकरः समः। पल्यङ्केऽत्रासने स्याच्चेत् कायोत्सर्गः सुसौष्ठवः॥ (आचा. सा. ९, ८५–८६)। ३. ××× उत्तराधरे। ते पर्यङ्कासनं ×××॥ (अन. ध. ८–८३)। ४. अन्तर्दक्षिणजंघोर्वोर्वामांह्रि यत्र निक्षिपेत्। दक्षिणं वामजंघोर्वोस्तत्पर्यंकासनं मतम्। (चैत्यवन्दन भा. वृ. १२ उद्.)।

१ दोनों जांघों के नीचे के भाग को पांवों के ऊपर करके नाभि के पास वाम हथेली के ऊपर दक्षिण हथेली के रखने पर पर्यंकासन होता है।

पर्याप्त, पर्याप्तक—१. षड्भिराहारादिपर्याप्तिभिर्ये पर्याप्तास्ते पर्याप्तकाः। (आव. नि. हरि. वृ. १५)। २. पर्याप्तकर्मोदयवन्तः पर्याप्ताः। (धव. पु. १, पृ. २५३–५४); पर्याप्तनामकर्मोदय-जनितशक्त्याविभावितवृत्तयः पर्याप्ताः। (धव. पु. १, पृ. २६७); पज्जत्तणामकम्मोदयवंतो जीवा पज्जत्ता। (धव. पु. ३, पृ. ३३१); पज्जत्तणामकम्मोदयं पडुच्च पज्जत्ता। (धव. पु. ६, पृ. ४१९)। ३. स्वजात्युचितपर्याप्तिलब्धियोग्याः पर्याप्तकाः। (पंचसं. स्वो. वृ. ३–९)। ४. पर्याप्तनामकर्मोदयतः पर्याप्ताः ये (पृथिव्यादयः) हि चतस्रः स्वपर्याप्तीः पूरयन्तीति। एताः (आहारादयः) पर्याप्तयः पर्याप्तनामकर्मोदयेन निर्वर्त्यन्ते, तद् येषामस्ति ते पर्याप्तकाः। (स्थाना. अभय. वृ. २, १, ७३)। ५. पर्याप्तयो विद्यन्ते येषां ते पर्याप्ताः। (पंचसंमलय. वृ. १–५; कर्मवि. दे. स्वो. वृ. ४८; षडशीति दे. स्वो. वृ. २, पृ. ११७)। ६. शरीरपर्याप्त्या पर्याप्ताः, मतान्तरेण सर्वस्वयोग्यपर्याप्तिपर्याप्ताः। (बृहत्सं. मलय. वृ. २००)। ७. पर्याप्तनामकर्मणः उदये सति जीवः निज-निजपर्याप्तिभिः स्व-स्वयोग्यपर्याप्तिभिः, निष्ठितः निष्पन्नः पर्याप्तो भवति। शरीरपर्याप्तिनिष्पत्तिसययादारभ्य इन्द्रियानपान-भाषा-मनःपर्याप्तीनां निष्पत्त्यभावेऽपि जीवः पर्याप्तक एव। (गो. जी. जी. प्र. १२१)। ८. पर्याप्तयः स्वयोग्या यैः सकलाः साधिताः सुखम्। पर्याप्तनामकर्मानुभावात् पर्याप्तकास्तु ते॥ (लोकप्र. ३–८)।

१ जो जीव आहारादि छह पर्याप्तियों से परिपूर्ण हो चुके हैं वे पर्याप्त या पर्याप्तक कहलाते हैं। २ जो पर्याप्तनामकर्म के उदय से युक्त हैं उन्हें पर्याप्त कहा जाता है। ३ जो अपनी जाति के योग्य पर्याप्तियों की प्राप्ति के योग्य हैं उन्हें पर्याप्तक जानना चाहिए।

पर्याप्तनाम, पर्याप्तकनाम— देखो पर्याप्तिनाम। १. पर्याप्तकनाम यदुदयादिन्द्रियादिनिष्पत्तिर्भवति। (श्रा. प्र. टी. २२)। २. जस्स कम्मस्स उदएण जीवो पज्जत्तो होदि तस्स कम्मस्स पज्जत्तेत्ति सण्णा। (धव. पु. ६, पृ. ६२); जस्स कम्मस्सुदएण जीवा पज्जत्ता होंति तं कम्मं पज्जत्तं णाम। (धव. पु. १३, पृ.३६५)। ३. एता यथास्वमेकेन्द्रियविकलेन्द्रिय-संज्ञिपंचेन्द्रियाणां चतुष्पंच-षट्संख्याः पर्याप्तयो यस्योदयाद् भवन्ति तत्पर्याप्तकं नाम। तद्विपाकवेद्यं कर्मापि पर्याप्तकनाम। (शतक. मल. हेम. वृ. ३८, पृ. ५०; कर्मस्त. गो. वृ. ९–१०, पृ. ८७)। ४. यदुदये जीवः स्वपर्याप्तिभिः पर्याप्तः परिपूर्णो भवति तत्पर्याप्तनाम। (कर्मवि. ग. पू. व्या. ७३)। ५. पर्याप्तकनाम यदुदयात् सर्वपर्याप्तिनिष्पत्तिर्भवति। (धर्मसं. मलय. वृ. ३१९)। ६. पर्याप्तकनाम यदुदयात् स्वयोग्यपर्याप्तिनिर्वर्तनसमर्थो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति। (प्रज्ञाप. मलय. वृ. २३–२९३, पृ. ४७४; पंचसं. मलय. वृ. ३–८; सप्तति. मलय. वृ. ६; प्रव. सारो. वृ. १२७२; कर्मप्र. यशो. वृ. १,पृ. ७)। ७. यदुदयात् स्वपर्याप्तियुक्ता भवन्ति जीवास्तत्पर्याप्तनाम। (कर्मवि. दे. स्वो. वृ. ४८)।

१ जिसके उदय से इन्द्रिय आदि की उत्पत्ति होती है उसे पर्याप्तक नामकर्म कहते हैं। २ जिस कर्म के उदय से जीव पर्याप्त होता है वह पर्याप्त नामकर्म कहलाता है। ३ जिसके उदय से एकेन्द्रिय, विकलेन्द्रिय और संज्ञी पंचेन्द्रिय जीवों के यथायोग्य चार, पांच और छह पर्याप्तियां होती हैं उसे पर्याप्तक नामकर्म कहा जाता है।

पर्याप्ता भाषा—१. पर्याप्ता या एकपक्षे निक्षिप्यते सत्या वा मृषा वेति तद्व्यवहारसाधनी। (दशवै. नि. हरि. वृ. ७–२७८, पृ. २१०)। २. अवहारेउं सक्कइ पज्जत्त ××× । (भाषार. १६, पृ. ७); तत्रावधारयितुं शक्यते या सा पर्याप्ता ××× तदुक्तं वाक्यशुद्धिचूर्णौ—पज्जत्तिगा णाम जा अवहारेतुं सक्कइ जहा सच्चा मोसा वा एसा पज्जत्तिगा। (भाषार. टी. १६, पृ. ७)।

१ जिस भाषा का निक्षेप सत्य या असत्य में से किसी एक पक्ष में किया जाता है, व्यवहार की साधनभूत उस भाषा को पर्याप्ता भाषा कहते हैं।

पर्याप्ति—१. पर्याप्तिः क्रियापरिसमाप्तिः आत्मनः। (त. भा. ८–१२)। २. इह पर्याप्तिर्नाम शक्तिः, सा च पुद्गलद्रव्योपचयादुत्पद्यते। ××× तत्र पर्याप्तिः क्रियापरिसमाप्तिः। (नन्दी. हरि. वृ. पृ. ४३)। ३. आहार-शरीरेन्द्रियानापान-भाषा-मनःशक्तीनां निष्पत्तेः कारणं पर्याप्तिः। (धव. पु. १, पृ. २५६); अथवा जीवनहेतुत्वं तत्स्थमनपेक्ष्य शक्तिनिष्पत्तिमात्रं पर्याप्तिरुच्यते। (धव. पु. १, पृ. २५७)। ४. पर्याप्तिः पुद्गलरूपात्मनः कर्तुः करणविशेषः। (त. भा. सिद्ध. वृ. ८–१२)। ५. आहार-सरीरिंदिय-णिस्सासुस्सास-भास-मणसाणं। परिणइवावारेसु य जाओ छच्चेव सत्तीओ॥ तस्सेव कारणाणं पुग्गलखंधाण जा हु णिप्पत्ती। सा पज्जत्ती भण्णदि छब्भेया जिणवरिंदेहिं॥ (कार्तिके. १३४-३५)। ६. यतो हि शरीरेन्द्रियादिनिष्पत्तिः सा पर्याप्तिः। (न्यायकु. ७६, पृ. ८५२)। ७. पर्याप्तीराहारादिकारणसम्पूर्णताः। (मूला. वृ. १२-१); पर्याप्तयः आहारादिकारणनिष्पत्तयः। (मूला. वृ. १२-२); पर्याप्तयः सम्पूर्णताहेतवः। (मूला. वृ. १२-४)। ८. इह च पर्याप्तिर्नाम शक्तिः सामर्थ्यविशेषः, सा च पुद्गलद्रव्योपचयाद् वर्तते। (स्थाना. अभय. वृ. २, १, ७३)। ९. आहार-सरीरिंदिअ-ऊसास-वउ-मणोऽभिनिव्वित्ती। होइ जओ दलिआओ करणं पइ सा उ पज्जत्ती॥ (संग्रहणी. २६९)। १०. पर्याप्तिराहारादिपुद्गलदलिकग्रहण-परिणमनहेतुः पुद्गलोपचयजः शक्तिविशेषः। (कर्मस्त. गो. वृ. १०, पृ. ८७)। ११. पर्याप्तिः स्वविषयग्रहणसामर्थ्यलक्षणा। (आव. नि. मलय. वृ. ८३१ [अन्यदीया १९ प्र.] पृ. ४५१)। १२. पर्याप्तिर्नामाहारादिपुद्गलग्रहण-परिणमनहेतुरात्मनः शक्तिविशेषः। स च पुद्गलोपचयादुपजायते। किमुक्तं भवति? उत्पत्तिदेशमागतेन प्रथमं ये गृहीताः पुद्गलास्तेषां तथाऽन्येषामपि प्रतिसमयं गृह्यमाणानां तत्संपर्कतस्तद्रूपतया जातानां यः शक्तिविशेषः आहारादिपुद्गलखल-रसरूपतापादनहेतुः। यथोदरान्तर्गतानां पुद्गलविशेषाणामाहारपुद्गलखल-रसरूपतापरिणमनहेतुः। (प्रज्ञाप. मलय. वृ. १–१२; जीवाजी. मलय. वृ. १–१२; पंचसं. मलय. वृ. १-५)। १३. पर्याप्तिर्नाम पुद्गलोपचयजः पुद्गलग्रहण-परिणमनहेतुः शक्तिविशेषः। (षडशी. मलय. वृ. ३, कर्मवि. दे. स्वो. वृ. ४८, पृ. ५५; षडशी. दे. स्वो. वृ. २)। १४. पर्याप्तिराहारादिपुद्गलग्रहण-परिणमनहेतुरात्मनः शक्तिविशेषः। (सप्तति. मलय. वृ. ६; प्रव. सारो. वृ. १३१७; संग्रहणी. दे. वृ. २६८; विचा. स. वृ. ४३, पृ. ९)। १५. पर्याप्ता व्यपदिश्यन्ते याभिः पर्याप्तयस्तु ताः। (लोकप्र. ३-७); याऽऽहारादिपुद्गलानामादान-परिणामयोः। जन्तोः पर्याप्तिनामोत्था शक्तिः पर्याप्तिरत्र सा॥ (लोकप्र. ३–१५)।

१ अपनी क्रिया की समाप्ति का नाम पर्याप्ति है। २ पर्याप्ति उस शक्ति का नाम है जो पुद्गलद्रव्य के उपचय से उत्पन्न होती है। ३ आहार, शरीर, इन्द्रिय, आनपान, भाषा और मन की शक्तियों की उत्पत्ति का जो कारण है उसे पर्याप्ति कहते हैं। अथवा इन्द्रियादि में स्थित जीवनहेतुता की अपेक्षा न करके शक्ति की निष्पत्तिमात्र को पर्याप्ति जानना चाहिए।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पर्याप्तिनामकर्म—देखो पर्याप्तनाम। १: यदुदयादाहारादिपर्याप्तिनिर्वृत्तिः तत्पर्याप्तिनाम। (स. सि. ८-११; त. श्लो. ८-११; मूला. वृ. १२-१९५)। २. पर्याप्तिनिर्वर्तकं पर्याप्तिनाम। (त. भा. ८, १२)। ३. यदुदयादाहारादिपर्याप्तिनिर्वृत्तिस्तत्पर्याप्तिनाम। यस्योदयात् आहारादिपर्याप्तिभिरात्मा अन्तर्मुहूर्तं पर्याप्तिं प्राप्नोति तत्पर्याप्तिनाम। (त. वा. ८, ११, ३१)। ४. पर्याप्तिः पुद्गलरूपा आत्मनः कर्तुः करणविशेषः येन कर्मविशेषेणाहारादिग्रहणसामर्थ्यमात्मनो निष्पद्यते, तच्च करणं यैः पुद्गलैर्निर्वर्त्यते ते पुद्गला आत्मनात्तास्तथाविधपरिणतिभाजः पर्याप्तिशब्देनोच्यन्ते। (त. भा. हरि. व सिद्ध. वृ. ८-१२)। ५. एयासिं (पज्जत्तीणं) निप्फत्ती उदएणं जस्स होइ कम्मस्स। तं पज्जत्तं नामं इयरुदये नत्थि निप्फत्ती॥ (कर्मवि. ग. १३७)। ६. षड्विधपर्याप्तिहेतुर्यत्कर्म तत्पर्याप्तिनाम। (मूला. वृ. १२-१९६)। ७. पर्याप्तकनाम—यदुदयवशात् स्वयोग्यपर्याप्तिनिर्वर्तनसमर्थो भवति तत्पर्याप्तिनाम—आहारादिपुद्गलग्रहण-परिणमनहेतुरात्मनः शक्तिविशेषः। (प्रज्ञाप. मलय. वृ. २३-२९३, पृ. ४७४)। ८. आहारादिपर्याप्तिनिर्वर्तकं पर्याप्ताख्यं नामकर्म। (भ. आ. मूला. २१२१)।

१ जिस कर्म के उदय से आहारादि पर्याप्तियों की रचना होती है उसे पर्याप्तिनामकर्म कहते हैं। २ पर्याप्तियों के उत्पादक कर्म को पर्याप्तिनामकर्म कहा जाता है।

